Gujarat University

# सांख्यसप्ततिवृत्तिः ($V_1$)

# Sāṁkhya-Saptati-Vṛtti ($V_1$)

*Edited by*

**Dr. Esther A. Solomon**
M. A. Ph. D,
School of Languages,
Gujarat University
**Ahmedabad**

Gujarat University
**Ahmedabad-9.**

First Edition ] [ 1973

© Gujarat University : 1973

**Price Rs. 6–00**

Printed by
Mahant Shree Tribhuvandasji Shastree,
Ramanand Printing Press,
Kankaria Road,
Ahmedabad-22.

Published by
Shri Kanchanlal C. Parikh,
Registrar,
Gujarat University,
Ahmedabad-9.

## FOREWORD

It gives me great pleasure, indeed, in publishing Dr. ( Miss ) Esther A. Solomon's book entitled "Sāṁkhya Saptati Vṛtti".

A single manuscript of this commentary on the Sāṃkhya-Kārikā is preserved in the Jesalmere Bhandar. This commentary is very much like what is known as Māṭhara's Vṛtti. Dr. Solomon is of the view that what is known as Māṭhara-Vṛtti is a revised version of the commentary edited by her. She has made a detailed comparative study of these two commentaries from the point of view of expression and contents.

I am most thankful to Dr. E. A. Solomon for agreeing to the publication of this book which was undertaken as a research project in the School of Languages of the Gujarat University.

I have no doubt that students, teachers and others interested in the study of the Sāṁkhya system of Philosophy will benefit much from this book.

Gujarat University,
Ahmedabad-9.
16th May 1973.

**K. C. Parikh**
University Registrar

# Preface

A palm-leaf manuscript of this hitherto unpublished vṛtti ($V_1$) on the Sāṁkhya Kārikā is preserved in the Jesalmere Grantha Bhaṇḍāra. An account of it is furnished by श्री जेसलमेरुदुर्गस्थ जैन ताडपत्रीय ग्रंथभंडार सूचीपत्र (Catalogue of the Palm-leaf Manuscripts in the Jaina Grantha Bhaṇḍāra of Jesalmere) as follows :

> "क्रमाङ्क ३९४; पत्र १०२; भाषा-संस्कृत;
> मूलकर्ता-ईश्वरकृष्ण; लेख सं. अनु. १२मी शताब्दी पूर्वार्ध [Copied in about the first half of the 12th cent. V. S. ];
>
> संहनन-जीर्णप्राय; दशा-श्रेष्ठ;
> ल. प. [Length and width]-12"×1¼";
> अन्त्य पत्रमां शोभन छे [there is an ornamental design on the last leaf]."

There are 3–4 lines to each side of the leaf and about 55 letters to a line.

Pulinbehari Chakravarti has in his Preface (pp. II-III) to 'Origin and Development of the Sāṁkhya System of Thought' (Calcutta, 1951) made a mention of two old manuscripts of two unknown commentaries on the Sāṁkhya Kārikā of Īśvarakṛṣṇa, displayed at an exhibition in New Delhi of some of the important manuscripts belonging to the Jesalmere Bhaṇḍāra. I have been fortunate enough to secure photo-enlargements of both these single manuscripts from microfilms deposited in the L. D. Institute of

Indology, Ahmedabad. This was made possible by the good offices of Pt. Dalsukhbhai Malavania, Director of the Institute. With the kind permission of Dr. Umashankar Joshi, the then Director of the School of Languages, Gujarat University, I took up the work of editing these commentaries as a part of my work in the School of Languages.

None of the leaves of the manuscript of $V_1$ is missing. The edges of the first few leaves are broken and consequently a letter or two at the end of the lines is missing. Similarly, the corners of the last two leaves are broken. It is very unfortunate that though the name of the author is mentioned at the end, yet since the leaf is broken just here, only आचार्यम followed by a fragment of some letter can be read. This last could be a remnant of ह or घ. Had we been in a position to know definitely the name of the author of this vṛtti, it would have been something significant for the history of the Sāṁkhya system. As I have pointed out at a number of places in the Notes, this vṛtti ($V_1$) is very much like what is known as Māṭhara-vṛtti. It can even be said that the latter is a revised and enlarged version of the vṛtti printed here. Knowledge of the name of the author of this Vṛtti would probably have provided a definite clue to some of the doubts and questions regarding the Māṭhara Vṛtti.

On the whole the manuscript can be easily deciphered. Scribal errors such as confusion of स् and श् (e. g. वर्षसहश्रे for वर्षसहस्रे, वसात् for वशात्, सारीरम् for शारीरम्, सान्त for शान्त), addition of some unwanted letter (e.g. समुमुवाच for समुवाच, प्रत्युववाच for प्रत्युवाच) and such errors as कपिलंमासुरिः (for कपिलमासुरिः), तृ for त्रि, कृ for क्रि, ऋ for रि (e.g. एकादशेंद्रयाणि for एकादशेन्द्रियाणि), or even र for ऋ are quite common and have mostly not been noted. आहोश्वित् is written for आहोस्वित्. The anusvāra ( ˙ ) and the visarga (:) are omitted at a number of places. Such cases also have mostly not been noted. Expressions are at places unnecessarily repeated. The emendation is given in round brackets ( ) after the incorrect letter or word or words as the case may be, and if some thing is to be supplied it is put within rectangular brackets [ ]. As this is a single manuscript, and as I feel that it should be compared very carefully with what is known as Māṭhara–Vṛtti, I have tried to see that the text as printed here is very faithful to the original, though I am conscious that this might result in some inconvenience to the reader.



The method of marking the kārikās varies in the manuscript. The numbering starts from the second kārikā, which is given No. 1. The subsequent kārikās are given serial numbers accordingly till kā. 23, which is numbered 22. Then from kā. 24 (अभिमानो॰ )we have the correct number (24). In place of this, I have started numbering right from the first, giving the first kārikā No. 1. Similarly, up to kā. 21, a छ is put at the end of the passage introducing a new kārikā, and the number of the kārikā is put at the end of the kārikā-text. From kā. 22 onwards the number is put at the end of the introductory

expression and 'ॐ' is put at the end of the kārikā-text. I have maintained the same procedure of putting ॐ at the end of the introductory expression and the number at the end of the kārikā-text.

I may state that I have used the abbreviation $V_1$ for this Vṛtti for no other reason than this that of the two single manuscripts of the two hitherto unpublished vṛttis that I edited, I took up this one first as all the leaves of this manuscript have been preserved. The other one (-I call it $V_2$-) has many leaves missing, though it also is very interesting inasmuch as of all the hitherto known commentaries on the Sāṁkhya Kārikā it seems to be the closest to Paramārtha's Version.

I have tried to arrive at some idea of the chronological order of the different commentaries on the basis of these two vṛttis that I have edited. I have discussed this and other allied problems in a separate study entitled—' The Commentaries of the Sāṁkhya Kārikā—A Study'. I have there also made a surmise regarding the author and the date of $V_1$. So I refrain from saying anything here. My editions of $V_1$ and $V_2$ and the 'Study' are meant to supplement each other, though many points may be found discussed in two or all of these.

I may simply mention here that in my view what is known as Māṭhara's Vṛtti (M) is only a revised and enlarged version of $V_1$. In order to help the reader arrive at his own judgment in this



respect I have given three appendices at the end : (i) Passages found in $V_1$, but not in M; (ii) Passages found in M but not in $V_1$; (iii) Noteworthy difference in expression in $V_1$ and M in certain passages. It is likely that some passages might have escaped my notice, and these appendices (-especially iii-) are not meant to be exhaustive. Their purpose will be served if the reader can detect the conscious improvement on the expression of $V_1$ in what is known as Māṭhara's Vṛtti and see for himself that the latter is based on $V_1$, which does not have any quotation from the Bhāgavata or the Viṣṇu Purāṇa or the like. In the Notes also I have at a number of places compared the expression and ideas in $V_1$ and M, as also in other commentaries where it was found necessary to do so. The text of M can be emended at places on the strength of $V_1$ and vice versa.

My heart-felt thanks are due to Dr. Umashankar Joshi, Vice Chancellor of the Gujarat University. It was due to his encouragement that I undertook the project of editing the above-mentioned vṛttis on the Sāṁkhya Kārikā. I am also thankful to Prof. K. R. Chandrashekharan, Director, School of Languages, Gujarat University, for providing the facilities required for my work. I would also like to put on record my gratitude to Prof. Dalsukhbhai Malavania, Director, L. D. Institute of Indology, Ahmedabad. It was he who suggested that I edit these manuscripts and got photo-enlargements of

these made for me. I may mention that on more than one occasion I have turned to Prof. H. C. Bhayani, Head of the Department of Linguistics, Gujarat University, for guidance on metrical and such other textual problems pertaining to the āryās and the commentaries and I am highly thankful to him for the same. I am grateful to all my friends- I may mention Dr. N. J. Shah in particular—who have been helpful to me in different ways in my work.

8-10-1971 **E. A. Solomon**

* * *

I owe a debt of gratitude to Shri Ishvarbhai Patel, Vice-Chancellor, Gujarat University, for expediting the publication of this work. But for his deep interest and active support this book would not have been out so soon. The Proprietor of the Ramanand Printing Press and all his colleagues have shown great promptness and patience in the printing of this book and I hereby express my hearty thanks to all of them.

16-2-1973 **E. A. Solomon**

## Abbreviations

$V_1$—The vṛtti published here.

$V_2$—Another vṛtti edited by me.

M—Māṭhara-vṛtti (Chowkhamba Sanskrit Series, 1922).

G—Gauḍapāda-Bhāṣya (Chowkhamba Sanskrit Series, 1963).

Y—Yuktidīpikā (Calcutta Sanskrit Series, 1938).

J—Jayamaṅgalā (Calcutta Oriental Series, 1926).

T—Tattvakaumudī (Poona Oriental Series, 1934).

P—Paramārtha's Chinese Version.
(The Saṁkhya Kārikā—Studied in the light of its Chinese Version—Translation into English by S. S. Suryanarayanan from M. Takakusu's translation into French—Madras, 1931).

*

# सांख्यसप्ततिवृत्तिः



[ Leaf १ ब ]



[ Leaf १०२ ]

## CONTENTS


| | Pages |
|---|---|
| (1) Foreword | 3 |
| (2) Preface | 5–10 |
| (3) Abbreviations | 11 |
| (4) Text of $V_1$ | १–८१ |
| (5) Notes | ८३–१४६ |
| (6) Passages found in $V_1$ but not in M | १४७–१४८ |
| (7) Passages found in M but not in $V_1$ | १४८–१५३ |
| (8) Noteworthy difference in expression in $V_1$ and M in certain passages | १५४–१६९ |
| (9) Index of Kārikās | १७०–१७२ |

# सांख्यसप्ततिः वृत्तिसहिता ($V_1$)

[१ ब] ॐ नमः सर्व्वज्ञाय ॥

कपिलाय नमस्तस्मै येनाविद्योदधौ जगति मग्ने ।
कारुण्यात् सांख्यमयी नौरिव विहिता प्रतरणाय ॥

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ ।
दृष्टे सापर्थाच्चेन्नै(साऽपार्था चेन्नै)कान्तात्यन्ततोभावात् ॥ १ ॥

अस्यामार्यायामुपोद्घात उच्यते ॥

इह हि भगवान् महर्षिः कपिलो नाम बभूव। तस्योत्पद्यमानस्याकस्माच्चत्वारो भावाः समुत्पन्नाः — धर्म्मो ज्ञानं वैराग्यमैश्वर्यमिति। स तेनात्मज्ञोऽनेन { or तेनात्मा(त्म)ज्ञानेन} सहोत्पन्नज्ञानो भगवानिदं जगदन्धे तमसि वर्त्तमानं ददर्श। तद् दृष्ट्वा तस्य कारुण्यमुत्पन्नम् — अहो खल्विदं जगदन्धे तमसि वर्त्तते संसारपारंपर्येणेति । स एवमुत्पन्नकारु[२ अ]ण्यो भगवान् महर्षिश्चिन्तयितुमारब्धः — कथं मयाऽस्यान्धस्य जगतोऽनुग्रहः कर्तव्येति [कर्तव्य इति]। स एवं विचिन्त्याऽऽसुरिसगोत्रं ब्राह्मणविशेषं वर्षसहस्रया[जि]नं दृष्ट्वाऽन्तर्हितो भूत्वो(त्वा) वाचमुवाच — भो भो आसुरे ! रमसे गृहस्थधर्म्मेणेति। स तमुवाच — रमेऽहं भोः। स एवमुक्तो निर्ज्जगाम । भूयोऽपि द्वितीयवर्षसहस्रे पूर्णे प्रत्यागम्योवाच — भो भो आसुरे! रमसे गृहस्थधर्म्मेणेति। स तमुवाच — रमेऽहं भोः। तत् श्रुत्वा पुनः स भगवान्निर्ज्जगाम। भूयोऽपि तृतीयवर्षसहस्रे पूर्णे प्रत्यागम्योवाच — भो भो आसुरे! रमसे गृहस्थधर्म्मेणेति। स तमुवाच — न भो रमेऽहम् । स तेनोक्तः — किं भूत्वा(कृत्वा), अब्रवीत् - दुःखत्रया [२ ब]-भिघाताद् इति। ततः स तेनोक्तो भगवता—उत्सहसे ब्रह्मचर्यवासं

वस्तुमिति (वस्तुं यदि ?) तदमीषां दुःखानां निरो(धमार्गं वय)-मुपदेष्या(क्ष्या)मः। सोऽब्रवीत् – बाढं शक्त इति। स एवं गृहस्थधर्म्मं परित्यज(ज्य) पुत्रदारांश्च प्रव्रजितो भगवन्तः(तः) कपिलस्य शिष्यो बभूव।

तत्र यदि कश्चिद् ब्रूयात् – कुतोऽस्य जिज्ञासा समुत्पन्ना यया जिज्ञासया गुरुकुलमभिगत इति, तस्यैवं वक्तव्यम् — दुःखत्रयाभिघाताज्जिज्ञासेति। तत्र दुःखानां त्रयं त्रीणि वा दुःखानि दुःखत्रयम्, दुःखत्रये[ण] अभिघातो दुःखत्रयाभिघातस्तस्मात् दुःखत्रयाभिघाताज्जिज्ञासा [स]मुत्पन्ना। ज्ञातुमिच्छा जिज्ञासा, यथा पातुमिच्छा पिपासा, सोऽ[३ अ]र्थः। किमिह परं, किं याथातथ्यं, किं नि[:]श्रेयसं, किं कृत्वा कृतार्थतामेती(मी)ति मत्वा गुरुकुलमभिगत इति।

अत्राह — कानि पुनस्तानि दुःखानि यैरभिहतो गुरुकुलमभिगत इति। अत्रोच्यते — आध्यात्मिकाधिभौतिकाधिदैविकानि त्रीणि दुःखानि। तत्राध्यात्मिकं द्विविधं शारीरं मानसं च। तत्र शारीरं तावद्वातपित्तश्लेष्मा(ष्म)णां वैषम्यनिमित्तेन यद् दुःखमुत्पद्यते तदाध्यात्मिकं वैद्या ब्रू(ब्रु)वते। आ नाभेर्वातस्थानम्, आ हृदयात् पित्तस्थानम्, आ मूर्द्धनः श्लेष्मस्थानमिति त्रयाणां त्रीणि स्थानानि। तत्र कदाचिद्वात उत्कटो भूत्वा पित्तश्लेष्माणावभिभवति तदा वात[नि]मित्ता दोषाः, कदाचित् पित्तमुत्कटं भू[३ ब]त्वा वातश्लेष्माणावभिभवति तदा पित्तनिमित्ता दोषाः, कदाचिच्छ्लेष्मोत्कटो भूत्वा वातपित्ते अभिभवति तदा श्लेष्मनिमित्ता दोषा इति। एतेषां वैषम्याद् ज्वरभ्रमातीसारापस्मारमदमूर्च्छायासशिरोरोगाक्षिरोगपार्श्वशूलकासश्वासहृद्रोगभगन्दराद्या व्याधय उत्पद्यन्ते। एतत् शरीरपर्यायेणाध्यात्मिकमुच्यते। मानसं वक्ष्यामः — प्रियविप्रयोगाद् अप्रियसंप्रयोगाद् ईप्सितस्यालाभान्मानसमुत्पद्यते दुःखं, यथा कश्चिद्देवदत्तः प्रियेन(ण) विप्रयुक्तः, तस्य तमनुस्मरतो मानसमुत्पद्यते दुःखम्। अथाप्रियसंप्रयोगं च वक्ष्यामो यथा कश्चिद्देवदत्तः संग्रामे शत्रुभिर्बद्ध[:] संकल्पयति — कि [४ अ]मस्माकममी करिष्यन्तीति



मानसमुत्पद्यते दुःखम्। ईप्सितस्यालाभं वक्ष्यामो यथा कस्यचिद् देवदत्तस्य सर्व्वकामसमृद्धिरासीद्। भाग्यवशात्तस्य भाग्य [वैषम्यं, or ० वेधि]तस्य पूर्व्वसुखान(न्य)भिध्यायत ईप्सितप्राप्तिर्न्न भवति, तस्येप्सितालाभान्मानसमुत्पद्यते दुःखम्। यत्प्रागभिहितं शारीरं दुःखं वातादीनां वैषम्येणेति तदुक्तम्। आधिभौतिकं वक्ष्यामः--मानुषपशुमृगपक्षिसरीसृपस्थावरनिमित्तम्। तत्र मानुषश्च पशुश्च मृगश्च पक्षी च सरीसृपश्च स्थावरं च तानीमानि मानुषपशुमृगपक्षिसरीसृपस्थावराणि, एतानि निमित्तानि यस्य दुःखस्य तद्भवति तन्निमित्तमिति। अ(आ)धिदैविकं वक्ष्या[४ ब]मः— अतिवृष्ट्यनावृष्टिग्रहपीडातपात्ययःप्रभृति(०यप्रभृति) यदष्टदेवयोनिभ्यः सकाशाद् उत्पद्यते दुःखं तद् अ(आ)धिदैविकम्, इत्येषा जिज्ञासा समुत्पन्नाऽऽसुरिसगोत्रब्राह्मणस्य। तस्मा[द्] दुःखत्रयाभिघाता[ज्] जिज्ञासा समुत्पन्नेति।

अत्राह — येयं जिज्ञासा त्रिभिर्दुःखैरभिहि(ह)तस्य सा कस्मिन्नर्थे समुत्पन्नेत्यत्रोच्यते — तदपघातके हेताविति। तेषामपघात[क]ः। 'तत्' शब्देन समनन्तरोक्तानि दुःखान्युपगृह्यन्ते। तस्मिन्नपघातके हेतौ वयं(हेतावियं) जिज्ञासा समुत्पन्ना — किं खल्विमानि दुःखानि शरीरस्य आहोस्वित् शरीरव्यतिरिक्तोऽस्ति कश्चिदन्यः पुरुषो यस्येमानि दुःखानि। तेषां दुःखानां कश्चिदस्त्युपायो येन दुःखा[५ अ]नि न स्युरिति। यस्तू(स्तु ?)-पायोऽस्ति तमुपायमास्थास्यामि येन दुःखानि न स्युरिति। अथ नास्त्युपायस्ततस्तूर्ष्णीं भूत्वा बलीवर्द्दव[द्] दुःखान्यनुभविष्यामि। यथा कश्चिद्देवदत्तो वृश्चिकेन दष्टस्तत्र तस्य जिज्ञासा समुत्पन्ना को नु खलु विषवैषम्यमपास्येद्। अयमपास्ये[दि]दमिति। एवं दुखाभिभूतस्यासुरेस्तदपघातके हेतौ जिज्ञासा समुत्पन्ना। ततः स जिज्ञासुः भगवन्तं कपिलाचार्यं शरणमुपगतोऽयमुपायं कथयिष्यतीति।

अत्राह — दुःखेभ्य एव जिज्ञासा समुत्पन्ना कथं दुःखानामेवाभावं करिष्यतीति। न हि मातुरुत्पन्नः पुत्रो मातुरेव वधं करोति। अत्रोच्यते — इहलोके [यो] यस्य सकाशादुत्पद्यते [५ ब] स तस्यैव वन्धं (वधं) करोतीति। तद्यथा कीटको मातुरुत्पन्नो

मातुरेव वधं करोति । यथा राजपुत्रो राज्ञः सकाशादुत्पन्नो राज्ञ एव वधं करोति। अथवा कश्चि[दा]शीविष[ः] शुष्कतृणबहलप्रदेशे स्थितः प्रतिसर्प्पं दृष्ट्वा क्रुद्धस्तस्य मुखादग्निर्निर्जगाम। सोऽयमग्निस्तृणानि सर्प्पं च ददाह। एवमिहापि दुःखेभ्यः सकाशाज्जिज्ञासा समुत्पन्ना दुःखानामेवाभावं करोतीति ।

अत्रोच्यते। दृष्टे साऽपार्था चेदिति। चेदित्ययं निपात आशङ्कायां वर्त्तन्ते( वर्त्तते )। एषामिति चोदक[ः]-इहलोके सर्व्वदुःखप्रतीकारसमर्थो हेतुर्दृष्टस्तस्मिन् सति साऽपार्थिका जिज्ञासेति। कोऽसौ हेतुः। उच्यते — श(शा)रीरस्य तावदष्टाङ्ग आयुर्वेदः [६ अ] कायशल्यस्य शलाकी(का or को) विषोन्मादि(द)क्लीबजराणां च कुमारचिकित्सितानि। यदि काये दुःखमुत्पद्यते तत्र कायचिकित्सितो(ता) वैद्या दुःखप्रतीकारं करिष्यन्तीति। अथ खड्गशक्तितोमरैरभिहतस्य दुःखमुत्पद्यते तत्र शलाकी दुःखप्रतीकारं करिष्यतीति। क्लीबस्यापि सर्व्वमिदं दृष्टम्।—

गोधूमचूर्ण्णं सघृतं माहिषं च तथा दधि ।
सप्ताहमुपयुञ्जानो वृद्धोऽपि तरुणायते ॥

चटकशिरं (०शिरः) सकुलीरं मेषवृषणं च वराहमेदश्च ।
सर्षपतैलविपक्वं पादाभ्यङ्गोऽसतोऽध्वाय (?) ॥

एवमपि जरागृहीतस्य प्रयोगोऽस्ति येन वर्षशतिकोऽपि द्विरष्टवर्षा(०र्षो) भवति ।

भृङ्गराजरसप्रस्थद्वयं पञ्चमधुयष्ट्या ।
तैलकुडवविपक्वं कुर्यात् कृष्णामपि बलाकाम् ॥

बलाकानां तदर्थवमनविरेच[६ ब]नं कृत्वा प्रतीकारं करिष्यतीति। एवं शारीरिकस्य दुःखस्याष्टांग आयुर्वेदो, मानसस्यापि रम्याः शब्दस्पर्शरूपरसगन्धादयो विषयाः। अ(आ)धिभौतिकस्यापि व्याधेर्नगरनिगमजनपदसंनिवेशवप्राकारपरिखाक्रियाप्रहरणावरणसान्निध्यं तद्विद्याकौशलं सामोपप्रदानभेददण्ड-



प्रणिधानमिति। तथाधिदैविकस्यापि – – – अपाश्रयनिवातशान्तिज्वलनाहुतिप्रभृतिः सर्व्वदुःखप्रतीकारसमर्थो हेतुरतः साऽपार्था जिज्ञासेति।

अत्रोच्यते—नैकान्तात्यन्ततोभावादिति। किञ्चिद्वयं ब्रूमो-[ऽष्टां]ग आयुर्वेदे द्वौ दोषौ संभाव्येते नैकान्तभावो नात्यन्तभावश्चेति। इदं निदर्शनं—यथा कश्चिद्राजा ज्वरेण महता गृहीतः स वैद्यमाहूय ब्रवीति—भो वैद्य[यदि] [७ अ] ज्वरमपनयसि मे तदद्यैव ग्रामशतं दास्यामि। स एवमुक्तो वैद्यः शास्त्रोक्तेन विधानेन ज्वराभिघाते यत्नमकरोदौषधैर्मन्त्रैश्च। एवमेव क्रियमाणे कदाचिज् ज्वरोऽपैति वा न वा। एवं तावदनैकान्तिकम्। किंचान्यद्यथा पृथिव्या[म ?] पगतः स्वप्ने पुनरुपैति। शरद्यपगतो हेमन्ते ग्रीष्मे वा पुनरुपैति। वर्षास्वपगतः शरद्युपैति।* पुनरेवोच्यते। व्यभिचारदर्शनात्। यस्मादिह हि भिषक्(ग्)भेषजपरिचारकसंपन्नोऽपि कदाचिन्नैवं शर्म्म लभते। भवति चात्र श्लोकः।—

पुनर्दाहः [७ ब] समुत्पन्नः पुनर्जातश्च वेपथुः ।
बाधते च पुनर्हिक्का ज्वरश्च पुनरागतेति ॥
(पुनरागतः ॥ इति)।

एवं तावदनैकान्तिकम्। अनात्यन्तिकं च यथाऽऽह॥—

पुष्पिताक्षस्तु शलाकी कुष्ठी कायचिकित्सकः ।
पृच्छते बालभिषजं कथं ते दारका मृता इति॥
(मृताः ॥ इति)।

तस्मान्न ह्येते आत्यन्तिकीं दुःखनिवृत्तिं कुर्व्वन्ति।* एवं मानसमधि(पि) दुःखं शब्दादिभिर्व्विषयैः कदाचिद् व्यपैति कदाचिन्नेति। तथाधिभौतिकमपि जनपदसन्निवेशादिभिरुपायैः कदाचिद् व्यपैति कदाचिन्नेति। एवम(मा)धिदैविकमपि प्रवातनिवातादिभिः शान्तिकर्म्मभिः [८ अ] कदाचिद् व्यपैति कदाचिन्नेति।

* * See Notes.

अस्य शिष्यनै(स्यै)कान्तिकफलश्चात्यन्तिकफलश्च दुःखप्रतीकारे हेतुरिष्टः। अष्टाङ्गे आयुर्वेदे द्वौ दोषौ। तदन्योऽसौ दुःखापघातसमर्थो हेतुर्वेदविहित आनुश्रविको यस्यैकान्तिकमात्यन्तिकं च फलं श्रूयते। एवं ह्याह—तरति मृत्युं तरति शोकं तरति पाप्मानं तरति ब्रह्महत्यां[योऽश्वमे]धेन यजते [शतपथ ब्रा. १३·३·१·१]। यच्चैते वेदाः पुनरप्याहुः।—

अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान्।
किं नूनमस्मान् कृणवदरातिः किमु धूर्त्तिरमृत मर्त्यस्य ॥

[ऋग्वेद ८·४८·३; अथर्वशिरस्, ३] इति।

इहैकान्तिकमात्यन्तिकं च फलं श्रूयते। अत्र व्याख्या—कदाचित् किलेन्द्रो देवानुपस्थितान् इष्टेवमुवाच—भो भो देवाः। देवत्वादन्य [८ ब] त्सुखमस्ति किंचित्। ततस्ते देवा एकान्ते गत्वा संचिन्त्योचुः—नास्ति देवत्वादन्यत्सुखमिति। ततः इन्द्रेणोक्तम्—केन हेतुना। देवा ऊचुरनेन हेतुना यदपाम सोममिति। 'पा पाने' धातुरस्य धातोः खल्वपामेति भवति, पीतवन्तो वयमित्यर्थः। इन्द्रेणोक्तम्—ततः किममृता इति। तैरुक्तं य[द]स्माभिर्यज्ञे सोमरसः पीतस्तेन सोमरसेनामृता अभूम। 'मृङु (ङ्) प्राणत्यागे'। न मृताः अमृताः। 'भू सत्तायाम्' धातुरस्य धातोरभूम इति। अगन्मेति 'गम्लृ सृप्लृ गतौ' धातुरस्य धातोरगन्मेति। ज्योतिरिति स्वर्गग्रहणं, सोमं पीत्वा अमृता भूत्वा स्वर्गं प्राप्ताः स्म इति। किं चान्यदविदाम देवानिति। 'विद ज्ञाने' धातुरस्य धातोरविदामेति भवति। अस्मिन् स्वर्गे इयन्तो [९ अ] देवा इति विद्मः। किं तमस्मान (नूनमस्मान्) पुनर्दुःखं भविष्यतीति। एवं यः सोमं पिबति तस्यैकान्तिकमात्यन्तिकं भवति। तस्माद्ब्रवीमि—सोमं पास्यामीति। किं प्रव्रज्यया प्रयोजनं सांख्यज्ञानेन वा। वेदोक्तं करिष्यामि। वेदे चैकान्तिकफलं श्रूयते। पशुवधेनेष्ट्वा सर्व्वान् कामानभिजयति। तस्माद्वेदविहितेषु दुःखप्रतीकारेषु साऽपार्थिका जिज्ञासेति वेदवादिनाप्युक्ते सांख्याचार्योऽब्रवीत् ॥ छ॥



दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् ॥२॥

'दृशिर् प्रेक्षणे' धातुर्दृष्टवदानुश्रविको दृष्टेन तुल्यो दृष्टवत्, य एष भवता आनुश्रविको हेतुरुपदिष्ट एषोऽपि दृष्टवत् प्रत्येतव्यः। [९ ब] यथाऽष्टांगे आयुर्व्वेदे अनैकान्तिकमनात्यन्तिकं च फलमेवम(मा)नुश्रविकेऽपि, स च वेदः। को दृष्टान्तः—इहलोके प्रत्यक्षं तावत् 'मध्यमपिण्डं पत्नी पुत्रकामा प्राश्नीये(या)त्' [आ.श्रौ. २. ७·१४]। सा च श्रुतिवचनादनै(ने)कानि पिण्डशतान्यस्मा(श्ना)तीति यावदेके(कोऽपि) पुत्रो नोत्पद्यते। तथा टनुमखे (अनुमन्त्रेऽ?)प्युक्तं—जीवेम शरदः शतं पश्येम शरदः शतम्। यावत् गर्भस्थ एव म्रियते। अथ सद्यो जातो म्रियते। तस्मादनैकान्तिकफलानि कर्म्माणि। अविशुद्धिक्षयातिशययुक्तमिति (०युक्त इति)। कथमिति चेत्तिर्यग्योनिमानुषवधाश्रयात्। तिर्यग्योनि[ःपशुः], [अग्निष्टोमे] तावत्पशुवधोऽश्वमेधे मानुषवधोऽपि। यथा 'ब्रह्मणे ब्राह्मणमालभेत क्षत्राय राजन्यं मरुद्भ्यो वैश्यं तपसे च शूद्रं नारका[१० अ]य वीरहणं, [तै. ब्रा. ३·४·११] मधुपाकेषु कायां (मधुपर्केषु यूनां?) चा (च) गवामालंभस्तेषामपि वधानामसन्तोषः—

षट् शतानि तु पुष्टान्ते (पुष्ट्यन्ते) पशूनां मध्यमेऽहनि।
अश्वमेधस्य वचना[न्] न्यूनानि पशूनिस्त्रिभिरिति ॥
(पशुभिस्त्रिभिः ॥ इति।)

युक्तं च—

वृक्षं छित्त्वा पशून् हत्वा कृत्वा रुधिरकर्दमम्।
यद्येवं गच्छसि स्वर्गं नरकं ये(के)न यास्यसि ॥

अगम्यगमनाच्चैव स्त्रिह्याह (स्त्रियां ह्याह) गोसवे ख्यापनीयानां(यां?)—ब्राह्मणो गोसखे जेष्ट्वा (गोसवेनेष्ट्वा) संवत्सरं गोव्रतीभवति उपह्वारमुदकं दूषयति (चूषयति?) तृणानि छिनत्ति।

उपैति मातरम्। उपैति सगो(त्रा)म्। [१० ब] यत्र यत्र चैनामुपविष्टां विन्दति तत्र तत्रोपविशति। तदेव मर्त्यलोके कुप्यति। अपेयपानं च सुरपानम्। काष्ठकेनैव विद्वान् सुरां पीत्वा हिनस्ति। य एवं विद्वान् सुरां पिबति प्रजायते वा तनुर्ब्बीजं अस्मै दधाति। तदेवं काम्यनिमित्तकाभिचारु(र)केषु कर्म्मसु भूतवधो दृष्टः अगम्य[गमन]मपेयपानानि च। तस्मादविशुद्धियुक्तः। अथ स्मृतावप्युक्तम्—

न ध(न)र्म्मयुक्तममृ(नृ)तं हिनस्ति
न स्त्रीषु राजन्न विवाहकाले।
प्राणात्यये सर्व्वधनापहारे
पंचानृतान्याहुरपा [११ अ] तकानि॥

इत्येवं पापादीनां कर्म्मणां च मिश्रीभावादविशुद्धियुक्तो वेद इति। यदप्युक्तमपाम सोममित्येवमादि तत्राप्युक्तम्। सोमपीनां ०पायिनां)नृगनहुषंडा (०षेन्द्र) ययातिप्रभृतीनां वधबन्ध-परिक्लेशात् सोमपानां(ने) सति (or सोमपा[यि]नां सतां) कर्मफलोपभोगो(गा)त्पतनं दृष्टम्। तस्मादाह—

बहूनीन्द्रसहस्राणि आ(०ण्या)दितेयानां युगे युगे।
कालेन समतीतानि कालो हि दुरतिक्रमः॥

इत्येवमिन्द्रादीनां पतनं दृष्टम्। परिमाणवतां(त्तां) चाह—एकरात्रं द्विरात्रं त्रिरात्रं षड्रात्रं माससहस्रं संवत्सरम्। कुतः परिमाणवतां च लोके कारणानामपरिमाणवत्कार्यं दृष्टम्। यथा मृत्पिण्डादीनां घटादयस्तस्मात् प्राप्तमेषामानुश्रविकाणां हेतूनां (फलानां) परिमाणत्वं फलपरि[११ ब]माणत्वाच्च क्षयो भवति।

[अतिशयतामाह or अतिशययुक्त इति।] यथेह लोके आढ्यं दृष्ट्वा दरिद्रस्य दुःखमुत्पद्यते सुरूपं दृष्ट्वा विरूपस्य प्राज्ञं दृष्ट्वा मूर्खस्य तथा देवलोकेऽपि। एको यजमानः एकोप्सरसा (एकया-प्सरसा) सह विचरति। अथापरो यजमानः पञ्चभिरप्सरोभि-रुपगीयमानः। दिव्यविमानारूढमुत्कृष्टं दृष्ट्वेतरस्यैकविमानाधिरूढस्य दुःखमुत्पद्यते—अहो मत्सकाशाद्विशिष्टोऽयमिति। तस्य पञ्चविमान-



स्यैकविमानं दृष्ट्वा तोषमु(तोष उ)त्पद्यते—अहमस्य सकाशा-द्विशिष्टतर इति। तस्य पञ्चविमानस्योपरि दृष्ट्वा दिव्यविमानाधिरूढं परितो दशभिरप्सरोभिरुपगीयमानं विषाद उत्पन्नो मत्सकाशादयं विशिष्टतर इति। एवं शतविमानः सह[१२ अ]स्रविमानश्चेति। त(य)त्र चान्योन्यातिशयस्तत्र दुःखमव्यावृत(०वृत्तम्)। तदेवमविशुद्धिक्षयातिशययुक्तत्वात् आनुश्रविकेऽपि हेनावस्य नाधीयते परितोषः। यदुक्तं—वेदोक्तं करिष्यामीति न मे प्रव्रज्यया प्रयोजनं सांख्यज्ञानेन वा, तन्मिथ्या। य एवाष्टाङ्ग आयुर्वेदो वेद-विधिश्च न एकान्तेन नात्यन्तेन च स दुःखापघातसमर्थो भवतीति कृत्वाऽस्य शिष्यस्य नाधीयते परितोषः।

कीदृशः पुनः सो(स) हेतुर्यः श्रेयानि[ति] यत्रास्याधीयते परितोषः। अत्रोच्यते—तद्विपरीतः श्रेयानिति। तच्छब्देन समनन्त-रोक्तैर्द(०क्तौ द)ष्टानुश्रविकौ अभिसंबध्येते ताभ्यां विपरीतः। कतराभ्याम्? दृष्टानुश्रविकाभ्यां विपरीतो विपरीतलक्षण [१२ ब] इत्ययमर्थः। ऐकान्तिकश्चात्यन्तिको विशुद्धोऽक्षयोऽनन्तफलः कैवल्यान्निरतिशयश्च यो हेतुः स श्रेयानिति अत्रास्याधीयते परितोषः।

अत्राह—कथं पुनरसौ हेतुरवाप्यत इत्याह—व्यक्ताव्यक्तज्ञ-विज्ञानादिति। व्यक्तं च अव्यक्तं च ज्ञश्च व्यक्ताव्यक्तज्ञास्तेषां विज्ञानं व्यक्ताव्यक्तज्ञविज्ञानं तस्माद् व्यक्ताव्यक्तज्ञविज्ञानात् स हेतुरवाप्यते। स ह्यावस्य (ह्यवश्यं) फलस्य दानात् ऐकान्तिकः प्रकृति-हा(ज्ञा)नादात्यन्तिको यमनियमत्वाच्छुद्धः शरीरभेदे पुनरना-वेशात् अक्षयफलः कैवल्यादुत्तर (दनुत्तर)त्वाच्च निरतिशयं इति वाक्यशेषः। तत्र बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशे-न्द्रियाणि पञ्चमहाभूतान्येतद् व्यक्तम्, अव्यक्तं प्रधानं, ज्ञः पुरुष एतानि पञ्चवि [१३ अ] शतितत्त्वानि॥ उक्तं च—

पञ्चविंशतितत्त्वज्ञो यत्र यत्राश्रमे रतः।
प्रकृतिज्ञो विकारज्ञः सर्व्वैर्दुःखैर्विमुच्यते॥

अत्राह—एषां व्यक्ताव्यक्तज्ञानां कतिविधः प्रविभाग इत्यत्रो-च्यते—चतुर्व्विधः। कथमिति चेत्तदुच्यते॥ छ॥

मूलप्रकृतिरविकृतिर्महदाद्या[:] प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ ३ ॥

मूलप्रकृतिरिति प्रधानमधिकुरुते। प्रकरणात्प्रकृतिः, सप्तानां प्रकृतीनां मूलभादिरिति मूलप्रकृतिरित्युच्यते, सर्वेषां मूलप्रकृति-[१३ ब]रेव न विकृतिः, कारणमेव न विकार्यमित्यर्थः। कस्मादुत्पादकत्वादनुत्पन्नत्वाच्च। महदाद्यः(द्याः) प्रकृतिविकृतयश्च—यस्मात्प्रधाना[द्] बुद्धिरुत्पद्यते तस्माद्विकृतिर्यस्मादहङ्कारमुत्पादयति तस्मात्प्रकृतिरहंकारोऽपि बुद्ध्या उत्पद्यते यस्मात्तस्माद्विकृतिर्यस्मादेकादशेन्द्रियाणि पञ्च तन्मात्राण्युत्पादयति तस्मात्प्रकृतिर्यस्माच्छब्दतन्मात्रमहङ्कारादुत्पद्यते तस्माद्विकृतिराकाशमुत्पादयति यस्मात्तस्मात् प्रकृति[:]। स्पर्शतन्मात्रमपि यस्मादहङ्कारादुत्पद्यते तस्माद्विकृतिर्व्वायु[१४ अ]मुत्पादयति यस्मात्तस्मात् प्रकृतिः। रूपतन्मात्रमपि यस्मादहङ्कारादुत्पद्यते तस्माद्विकृतिरग्निमुत्पादयति यस्मात्तस्मात् प्रकृतिः। रसतन्मात्रमपि यस्मादहङ्कारादुत्पद्यते तस्माद्विकृतिरप उत्पादयति यस्मात्तस्मात्प्रकृतिर्गन्धतन्मात्रमपि यस्मादहङ्कारादुत्पद्यते तस्माद्विकृतिः पृथिवीमुत्पादयति यस्मात्तस्मात् प्रकृतिः।* [१४ ब] तेन ते महदाद्याः गन्धतन्मात्रपर्यन्ताः सप्त प्रकृतिविकृतयो भवन्तीति। षोडशकस्तु विकारः इति। 'तु'शब्दोऽवधारणे, एकादशेन्द्रियाणि पञ्च महाभूतान्येष षोडशको गणो विकृतिरेव न प्रकृति[:], कार्यमेव न कारणमित्यर्थः। कस्माद् अनुत्प(०दुत्प न्नत्वादनुत्पादकत्वाच्च तस्माद् विकृतिरित्युच्यते। न प्रकृतिर्न्न विकृतिः पुरुषा(ष) इति नैव कारणं नापि कार्यमित्यर्थः। कस्माद्, अनुत्पन्नत्वादनुत्पादकत्वाच्च। एष व्यक्ताव्यक्तज्ञानां चतुर्विधः प्रविभागो व्याख्यातः ॥

अत्राह। एतेषां व्यक्तादीनां त्रयाणां पदार्थानां केन प्रकारेण समधिगमः एवमेवं प्रमाणेभ्यः एषां समधिगमः करणीय इति।

अत्राह—कानि पुनस्तानि प्रमाणानि। तदुच्यते ॥ छ ॥

* See Notes.



दृष्टमनुमानमाप्तवचनं च सर्व्वप्रमाणसिद्धत्वात् ।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥ ४ ॥

दृष्टमनुमानमाप्तवचनं त्रीणि प्रमाणानि। तत्र दृष्टं नाम यत्प्रत्यक्षम्। श्रोत्रं त्वक् चक्षुर्जिह्वा घ्राणमिति पञ्च बुद्धीन्द्रियाणि। शब्दस्पर्शरूपरसगन्ध(न्धा) एते पञ्चेन्द्रियार्थाः। तत्र श्रोत्रेण शब्दो गृह्यते इत्यादि।* तत्र श्रोत्रेण शब्दः, त्वचा स्प[१५ अ]र्श[:], चक्षुषा रूपं, जिह्वया रसो, नासिका(०कया) गन्धो गृह्यत इति। एवमेतैः पञ्चभिरिन्द्रियैः पञ्चेन्द्रियार्था गृह्यन्ते। एतद् दृष्टमित्युच्यते प्रमाणम्। प्रत्यक्षेण च प्रमाणेन योऽर्थो न गृह्यते सोऽनुमानाद् ग्राह्यः। यथा धूमेनाग्निरेतदनुमानं प्रमाणम्। प्रत्यक्षेणानुमानेन च योऽर्थो न साध्यते स आप्तवचनात् साध्यस्तद्यथा स्वर्गेऽप्सरसः, इन्द्रो देवराट्, नन्दनं वनम्, उत्तरां(राः) कुरवः न प्रत्यक्षानुमानाभ्यां साध्या[:] किन्त्वाप्तानां वचनं श्रुत्वा प्रमाणीक्रियन्ते। अपि चोक्तम्—

आगमो ह्याप्तवचनमाप्तं दोषक्षयं(०क्षयाद्) विदुः।
क्षीणदो[षोऽ] मृ(नृ)तं वाक्यं न ब्रूयाद्धेत्वसंभवात् ॥

अथवा यो यस्मिन् कस्मिंश्चिन्कर्मणि कुशलो मन[१५ ब]साऽप्यदृष्टस्तेन (० प्यदृष्टदोषस्तेन) य उपदेशः क्रियते स आप्त-वचनम्। एवमेतान्याप्तवचनादीनि (०नान्तानि) त्रीणि प्रमाणान्युक्तानि।

अत्राह यदा तन्त्रान्तरीयाश्चत्वारि षडष्टौ दश च प्रमाणानीच्छन्ति, अर्थापत्तिसंभवाभावप्रतिभास(नै)तिह्यौपम्यचेष्टेति (०चेष्टा इति) कथमिह त्रिविधमेवेष्यते। अत्रोच्यते। सर्व्वप्रमाणसिद्धत्वात्। सर्व्वाणि तानि प्रमाणत्रयेऽविरुद्धानि। तत्रार्थापत्तिर्न्नाम यथा देवदत्तो दिवा न भुंक्ते बलवांश्चेति रात्रौ भुंक्त इत्यनुमानमेव। संभवः—प्रस्थ इत्युक्ते चत्वारः कुडवा इति गम्यते तदस्यानुमानत्वमेव। अभावोऽस्माद्देशादन्यद्देशान्तरं गत्वा देवदत्त[:]

*See Notes.

[ १६ अ ] शरत्काल(ले) व्रीही[न्] छुष्कान् पश्यति तांश्च दृष्ट्वा वृष्टेरभावं साधयति—नूनमस्मिन् देशे न वृष्टोऽयं देव इत्यनुमानमेव। प्रतिभा यथा—

दक्षिणस्य च विन्ध्यस्य सह्यस्य च यदन्त[रम्] ।
पृथिव्यां रमणीयानां रमणीयतमं मतम् ॥

एवमुक्तेऽस्मिन् देशे गुणाः सन्त्यस्मिन् देशे न सन्तीत्येवं प्रतिभोत्पद्यते। प्रतिज्ञा(भा)नमित्यनर्थान्तरम्। तदिदमनुमानमेव। ऐतिह्यं वेदयते(वेदश्रुते ? )र्यस्मिन् शास्त्रेऽविपरीता स्मृतिः सा ऐतिह्यमित्युच्यते धर्म्मशास्त्रा[ १६ ब]णीत्यर्थः ॥

अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणी ।
गुरौ शिष्यश्च याज्यश्च ते(स्ते)नो राजनि किल्बिषम् ॥
[ मनुस्मृति ८·३१७ ]

इदमाप्तवचनम्। औपम्यं यथा गौस्तथा गवय इति अनुमानमेव। चेष्टेति यथा मूकस्य क्षुधितस्य हस्तकर्मणा क्षुत् साध्यते इत्यनुमानमेव। एवमेतान्यष्टौ प्रमाणानि त्रिष्वेव प्रमाणेष्वन्तर्भूतानि। तस्मात् त्रिविधं प्रमाणमिष्टम् अभिमतमित्यर्थः।

अत्राह—तेन त्रिविधेन प्रमाणेन किं प्रममीयते(प्रमीयते)। तत्रोच्यते प्रमेयसिद्धिः [१७ अ] प्रमाणाद्धिः(द्धि)। प्रमेयस्य सिद्धिः प्रमेयसिद्धिः। उक्तं प्रमाणात् सिद्ध्यति। प्रमेय इति जात्याख्या कृता। तस्मात् त्रिविधप्रमाणात् प्रमेयः सिद्ध्यति। प्रमेयोपरि जात्याख्या कृता, व्यक्तं च प्रमेयम्, अव्यक्तं [च] प्रमेयं, ज्ञश्च प्रमेयः तदिदं प्रमेयं प्रभिन्नं--प्रधानं बुद्धिरहङ्कारः पञ्च तन्मात्राणेका(ण्येका)दशेन्द्रियाणि पञ्चमहाभूतानि पुरुषश्चेति। एवमेतानि पञ्चविंशतितत्त्वानि प्रमेयमित्युच्यते। कैश्चित् (केचित्) प्रत्यक्षेण प्रमीयन्ते केचिदनुमानेन केचिदाप्तवचनेनेति। तस्माद् उपपन्नमेतद् यथोक्तं प्रमेयसिद्धिरिति।

अत्राह—त्रिविधं प्रमाणमुक्तं तस्य त्रिविधस्य किं कस्य लक्षणमित्यत्रोच्यते ॥ छ ॥



प्रतिविष[१७ ब]याध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्।
तल्लिंगलिंग(गि)पूर्व्वकमाप्तश्रुतिराप्तवचनं च ॥ ५ ॥

प्रतिविषयाध्यवसाय इति। विषयं विषं (विषयं) प्रति योऽध्यवसायः। श्रो(ने ?)त्रादीनामिन्द्रियाणां रूपादिषु पञ्चसु पञ्चैवाध्यवसायाः। निश्चयप्रतिपत्तिरेतद् दृष्टस्य लक्षणम्। अनुमानं वक्ष्यामः। त्रिविधमनुमानमाख्यातमिति। आख्यातं कथ(कथित)मित्यर्थः। यदनुमानं पूर्व्वमाख्यातं तत् त्रिविधं कथमिति। पूर्व्ववत् शेषवत् सामान्यतोदृष्टम्। तत्र पूर्व्वपूर्व्वस्यार्थेऽस्तीति पूर्व्वं( ? )चानुमानम। तद्यथा—प्रावृट्काले मेघमुत्थितं दृष्ट्वा वृष्टिर्भविष्यतीति अनुमानम्। यस्मात् पूर्व्वं मेघः पश्चाद् वृष्टिरिति एतत्पूर्व्ववन्नामानु[ १८ अ ]मानम्। शेषवत्तद्यथा — लवणसमुद्रोदकविप्रुषः प्राश्य शेषस्य लवणभावोऽनुमीयते। एतच्छेषवन्नामानुमानम्। *

तल्लिंगलिंगिपूर्व्वकमिति – तद्यथा त्रिदण्डं लिंगं दृष्ट्वा लिंगी परिव्राट् साध्यते अस्त्यसौ परिव्राट् यस्येदं त्रिदण्डमिति। एतल्लिंगपूर्व्वकमनुमानम्। लिंगिनं परिव्राजकं परं दृष्ट्वा त्रिदण्डं लिङ्गं साध्यते। अस्त्यसौ परिव्राजसौ(को) यस्य त्रिदण्डमिति। एतल्लिङ्ग(ङ्गि)पूर्व्वकमनुमानमिति। [ १८ ब ] आप्तवचनस्य किं लक्षणमित्यत्रोच्यते — आप्तश्रुतिराप्तवचनम्। तत्र आप्त(प्ता) नाम हरिहरहिरण्यगर्भादयस्तेषां स्वा (ष्वामा)प्तानां [श्रुति]राप्तश्रुतिः। आप्तश्रुतिर्वेद इत्यर्थः। मन्वादयो धर्म्मशास्त्राणां कर्त्तार आप्त(प्ता) स्तेषामाप्तानां वचनमाप्तवचनमिति।

अत्राह — त्रिविधस्य प्रमाणस्य लक्षणमुक्तमिदम्। इदानीं ब्रूहि तस्य त्रिविधस्य प्रमेयस्य विषयतामनुशास्त्रे(स्त्र) तेन कतमं(मत्) प्रमेयं कतमेन प्रमाणेन साध्यत इति ॥ छ ॥

सामान्यव(त)स्तु दृष्टा[१९ ब]दतीन्द्रियाणां प्रसिद्धिरनुमानात्।
तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम् ॥ ६ ॥

* Sāmānyatodṛṣṭa is omitted.

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रसिद्धिरनुमानादिति । 'तु' शब्दोऽवधारणे। यदेतत् सामान्यतोदृष्टमनुमानं पूर्व्वं व्याख्यातं तस्मादनुमानात् प्रधानपुरुषावतीन्द्रियौ साध्येते। यस्मान्महदादि लिंगं त्रिगुणं तद् दृष्ट्वा प्रधानं साध्यते नूनमस्ति प्रधानं त्रिगुणं यस्मादिदं त्रिगुणमेव महदादि लिङ्गमुत्पन्नमिति। एवं तावत् प्रधानं साम्य(सामान्य)तोदृष्टादनुमानात् सिद्धम्। को दृष्टान्तो, यथा स्त्री विकारेण साध्यते। तथा पुरुषोऽप्यनुमानात्साध्यो नूनमस्ति पुरुषो यस्यार्थं प्रधानं महदादि लिंगमुत्पादयति। को दृष्टान्तो, यथा निमित्ते[१९ ब]न नैमित्तिकं साध्यते। एवं तावत् प्रधानपुरुषावतीन्द्रियावनुमानात् साध्यौ। व्यक्तं प्रत्यक्षसाध्यम्।

अत्राह—प्रत्यक्षेण प्रमाणेन योऽर्थो न साध्यते स नास्तीति गम्यते यथा द्वितीयमवनीश्वरस्य शिरस्तृतीयः पाणिः [श]शविषाणादयो वा। एवं प्रधानपुरुषौ नोपलभ्येते तस्मात् तावपि न स्त इति। उच्यते—इहलोके सतामप्यर्थानामष्टविधा ह्यनुपलब्धिरसतां च चतुर्व्विधा। कथमिति चेदुच्यते ॥ छ ॥

अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्याद् व्यवधानादभिभव(वा)त्समानाभिहाराच्च ॥ ७ ॥

इह सतोऽप्यर्थस्यानुपलब्धिर्दृष्टा। तद्यथा विप्रकृष्टदेशस्थस्य वै शकुनेः; किमसौ नास्ति, अतिदूरान्नोप[२० अ]लभ्यते। अत्राह—यन्नातिदूरे तत् कस्मान्नोपलभ्यते। अत्रोच्यते सामीप्यात्। तद्यथा स्वचक्षुरञ्जनचक्षुर्दूषिका पक्ष्मलप्रभृतयश्च। किं ते न सन्ति। अत्राह—यन्नातिदूरे नातिसमीपे तत् कथं नोपलभ्यत इति। अत्रोच्यते—इन्द्रियघातात्। यथा बधिरः शब्दं न शृणोति, अन्धो वा रूपं न पश्यति। किं ते शब्दादयो न सन्ति। अत्राह—यस्य नोपहतमिन्द्रियं स कस्मान्नोपलभ्य(भ)ते। अत्रोच्यते—मनोऽनवस्थानात्। यथा कस्यचिद्देवदत्तस्य मनोऽनवस्थितस्य नरनार्यादयोः(यः) सत्त्वात्त(स्त[२० ब]स्याग्रतो व्रजितास्तेन नोपलब्धानिति (०ब्धा इति) किं ते नरादयोः(यो) न सन्ति। अत्राह यस्य मनोऽनवस्थानं नास्ति स कस्मान्नोपलभ्य(भ)ते। अत्रोच्यते—व्यवधानात्। तद्यथा कुडयपटादिभिर्व्यवहिता घटादयो नोपलभ्यन्ते। किं ते न सन्ति। अत्राह—ये न व्यवहितास्ते कस्मान्नोपलभ्यन्ते। अभिभवात्। यथाऽऽदित्यप्रकाशेन ग्रहनक्षत्रोल्कातारारूपाणि नभसि रवितेजसाऽभिभूतानि नाभिव्यञ्जने(०व्यज्यन्ते) किं ते न सन्ति। अत्राह—ये नाभिभूतास्ते कस्मान्नोपलभ्यन्ते। [२१ अ] अत्रोच्यते—स[मा]नाभिहाराच्च। समानाः सदृशा इत्यर्थः। तथा माषराशौ माषाः प्रक्षिप्ताः, मुद्गराशौ मुद्गा[:] कपोतगणमध्यगो वा कपोतः। किं ते माषादयो न सन्ति। समानाभिहारान्नोपलभ्यन्ते।



तदेवं सतामप्यर्थानामष्टविधा ह्यनुपलब्धिन(र)सतां च चतुर्व्विधा। प्रागभावात् प्रध्वंसाभावादितरेतराभावादत्यन्तो-(न्ता)भावादिति। तत्र प्रागभावाद्यथा मृतपिण्डे घटः प्रागुत्पत्तेर्नोपलभ्यते। प्रध्वंसाभावात् तद्यथा मुद्गराभिघातात् स एव घटो भग्नो न्नो(नो)पलभ्यते। इतरेतराभावा[त्] तद्यथाऽश्वि(श्वे) गोत्वं गवि चाश्वत्वमिति। अत्यन्ताभावाद्यथा द्वितीयमवनीश्वरस्य [२१ ब] शिरस्तृतीयः पाणिः शशविषाणादयो वा। एवमियं द्वादशविधा ह्यनुपलब्धिः। सतामष्टविधा ह्यसतां च चतुर्व्विधेत्येवं प्रधानपुरुषावपि सन्तौ नोपलभ्य(भ्ये)ते। तत्र यदुक्तं यस्मात् प्रधानपुरुषौ नोपलभ्य(भ्ये)ते य(त)स्मान्न स्त इत्येवं तदयुक्तम्।

अत्राह—द्वादशानामनुपलब्धिकारणानां मध्ये कस्मात् कारणात् प्रधानस्यानुपलब्धिरित्यत्रोच्यते ॥ छ ॥

सौक्ष्म्यात्तदनुपलब्धिर्न्नाभावात् कार्यतस्तदुपलब्धिः ।
महदादि तच्च कार्यं प्रकृतिविरूपं सरूपं च ॥ ८ ॥

सौक्ष्म्यात्तदनुपलब्धिः। तच्छब्देन समनन्तरोक्तं प्रधानमभिसंबध्यते। तस्य खलु प्रधानस्य सौक्ष्म्यादनुपलब्धिः। सूक्ष्मं हि प्रधानं, कुतः, शब्दाद्य[२२ अ]लक्षणकत्वात्। तस्मात् सूक्ष्मत्वात्

कारणान्नोपलभ्यते, त्रुटिनीहारा भ्रमन्नेति प्रतिषेधो न्याय्यभात् ( त्रुटि-नीहाराभ्रवत् । नेति प्रतिषेधः। नाभावात् । प्रधानस्यानुपलब्धिर्यथा द्वितीयमवनीश्वरशिरस्तृतीयः पाणिः शशविषाणादयो वा, किन्तु सूक्ष्मत्वान्नोपलभ्यते इत्युक्तं प्राक् तस्मादस्ति प्रधानम्। तत्र यदुक्तमनुपलम्भो(ऽम्भान् । नास्ति प्रधानं तदयुक्तम्।

अत्राह—सूक्ष्मत्वादनुपलब्धिरित्युक्तं भवता तत् कथमनुपलभ्यस्वभावस्य प्रधानस्योपलब्धिरित्यत्रोच्यते कार्यतस्तदुपलब्धिः। कार्यं दृष्ट्वा कारणमनुमीयते वटाधानव[२२ ब]त् (वटधान्यवत् or वटधानावत्)। तद्यथा मूलं(ल) गण्डस्कन्धशाखाविटपप्रशाखाङ्कुरपल्लवपुष्पफलप्रतानबाहुस्कंधावरोहणप्रतिस्वरथचक्रपरिमण्डलं सत्व(त्त्व)शतसहस्राणामाश्रयभूतं न्यग्रोधपादपं दृष्ट्वाऽनुमीयते अस्त्यसौ जनाश्रयः समर्थो वटाधाता यस्येदं कस्येदं* कायम् इति। न तु खलु शशविषाणकार्यमस्ति यतोऽनुमीयते अस्तीति तस्मात् सदेव प्रधानं कारणं कार्यतोऽनुमीयते।

अत्राह—कतरं(रत्) कार्यं दृष्ट्वा प्रधानमनुमीयते अस्तीति। अत्रोच्यते महदादि तच्च कार्यम् इति। महांस्तस्य[२३ अ] कार्यस्यादिस्तदिदं कार्यं महदादि। महानहंकारः पञ्चतन्मात्राण्येकादशेन्द्रियाणि पञ्च महाभूतानि एतन्महदादिकार्यं त्रिगुणं दृष्ट्वाऽनुमीयते अस्ति तत् प्रधानं त्रिगुणं यस्येदं महदादिकार्यं त्रिगुणमेव। किं चान्यत्। तच्च कार्यं प्रकृतिविरूपं सरूपं च। मूलप्रकृतिः प्रधानं तेन प्रधानेन विरूपं प्रकृतिविरूपमसदृशमित्यर्थः। सन्ति ते हेतवो यैर्हेतुभिः प्रधानस्य सदृशं महदादि कार्यं, सन्ति ते यैरसदृशं यथा लोके दृष्टं पितुस्तुल्यश्चातुल्यश्च पुत्र इति। यदि रूपेण तुल्यो न गुणैर्यदि गुणै[र्न] रूपेण एवं महदादि कार्यं प्रधानेन सदृशमसदृशं च। तांश्च हेतून्[२३ ब]परिष्टाद् वक्ष्यामः।

---

* कस्येदम् is superfluous.



तिष्ठतु तावन्महदादिकार्यस्य सारूप्यं वैरूप्यं च। अनन्तरं प्रश्नं ब्रूहि। अत्राप्येष समयसमर्थः शिष्यः पृच्छत्याका(चा)र्यम्। तस्य पृच्छतो वक्तव्यं प्रकरणमपि परित्यज्यो(ज्ये)त्याचार्य आह—कोऽयमनन्तरः प्रश्न इति। अत्राह चोदको यत्तन्महदादि भवतोक्तं तत्प्रागुत्पत्तेः किं प्रधाने न सत् [सत्] सदसदिति। कुतः संशय इति चेदाचार्यमाह शिष्यः—आचार्यविप्रतिपत्ति(त्तेः) संशयः। इह वैशेषिको(०का) विप्रतिपन्नाः प्रागुत्पत्तेर्मृत्पिण्डे घटो नास्तीति व्यवसिताः। अस्ति च नास्तीत्यार्हताः। नैव नास्ति न वास्तीत्यभ्युपगमपक्ष एष बौद्धानाम्। एवमन्योन्य[विरुद्ध] स्वरूपपरिकल्पिते कोऽत्र निश्चयो [२४ अ] भविष्यत्ययमनन्तरप्रश्नः।

अत्रोच्यते तत्र यदुक्तम(मा)र्हतानां सदसत्कार्यमिति तस्य प्रतिषेधं वक्ष्यामः। यदि तावत् सद् असन्न भवति; अथासत् सन्न भवति। कस्मात्, सदसतोर्विरोधात्। को दृष्टान्तः। यथा देवदत्तो मृतो न मृत इति। एवं मृतकजीवको नास्ति। बौद्धानां न वास्ति न नास्तीत्येवं पक्षपरिग्रहाभावस्तैः सह संजल्पो नास्ति। वैशेषिकाणास(म)सत्कारणप्रतिषेधं(?) वक्ष्यामस्तदुच्यते ॥ छ ॥

असदकरणादुपादानग्रहणा[त्] सर्व्वसंभवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च य(स)त्कायम् ॥ ९ ॥

असदकरणात्। न सद् असत्, तस्याकरणम् असदकरणम्, तस्मादसदकरणात्। इह लोके असत्करणं नास्ति तद्यथा सिकतातैलवत्, कू[२४ ब]र्म्मरोमपटप्र(प्रा)वरणवत्, वन्ध्यादुहितृवत्, श[श]विषाणवत्। यदि वाऽसत् कार्यं स्यात् सिकताभ्यस्तैलनिष्पत्तिः स्यान्न चास्ति तस्मादनुमीयते प्रधाने महदादिकार्यमस्ति प्रागुत्पत्तेरिति। कुतश्चास्ति उपादानग्रहणात्। उपादानस्य ग्रहणमुपादानग्रहणं तस्माद् उपादानग्रहणात्। इह लोके येन योऽर्थी भवति स तन्निमित्तमुपादानं करोति। तद्यथा

दध्यर्थी क्षीरस्योपादानं कुरुते यदि चासत्कार्यं स्यात्तदा दध्यर्थी हृदकस्योपादानं कुर्या[त्], न च कुरुते, तस्मादुपादानग्रहणादपि पश्यामः प्रधाने महदादि कार्यमस्तीति । कुतश्चास्ति, सर्व्वसंभवाभावात्। सर्व्वस्य संभवः सर्व्वसंभवस्तस्याभावः सर्व्वसंभवाभावस्तस्मात् सर्व्वसंभ[२५ अ] वाभावात्। इह लोके यद् यस्मिन् विद्यते तस्मात्तदेवोत्पद्यते। तद्यथा तिलेभ्यस्तैलं दध्नो घृतम् । यदि चासत्कार्यं स्यात्तदा सर्व्वं सर्वत्र संभवे[त्], तृणपांशुवालुकादिभ्यो रजतसुवर्ण्णमुक्ताप्रवालादीनि क्रियन्ते( क्रियेरन्) । तस्मात् सर्व्वसंभवाभावादपि पश्यामो महदादि कार्यं प्रधाने विद्यत इति। कुतश्चास्ति, शक्तस्य शक्यकरणात्। इतरस्य करणं * शक्तस्य शक्यकरणं तस्मात् शक्तस्य शक्यकरणात्। इह लोके शक्तः खलु शिल्पी करणोपादानकालोपाय[२५ ब]संपन्नः शक्यादेव शक्यकरणमारभते नाशक्येनाशक्यम्। तद्यथा शक्तः कुम्भकारः शक्यादेव मृत्पिण्डाद् दण्डचक्रसूत्रोदकविदलानलादिभिः संपन्नो घटशरावोदुत्व(०दञ्च)नादीनारभमाणो दृष्टो न मणिकादीनशक्यान् । यदि चासत्कार्यं स्यात्तदा करणनियमो न स्यात्। अशक्यैरेवाशक्यमारभेत्(०त)। न चारभते तस्मात् सत्कार्यं नासत् । कारणभावाच्च सत् कार्यम्। कारणस्य भावः कारणभावस्तस्मात् कारणभावात् कार्यं सत्। इह लोके यल्लक्षणं कारणं तल्लक्षणं [२६ अ] कार्यमपि भवति यथा कोद्रवेभ्यः कोद्रवा व्रीहिभ्यो व्रीहयो निष्पद्यन्ते। यदि चासत्कार्यं स्यात् कोद्रवेभ्यः शालीनां निष्पत्तिः स्य(स्या)न्न च भवति, तस्मात् कारणभावादपि पश्यामः प्रधाने महदादि कार्यमस्तीति। तदेवमेभिः पञ्चभिर्हेतुभिः प्रधाने महदादि कार्यमस्तीति साधितम् ।

अत्राह — तत्कार्यमन(तत्कार्योऽन)न्तरप्रश्नः । सिद्धान्तस्तत्र यदुक्तं पूर्व्वस्यामार्यायां महदादिकार्यं प्रकृतिविरूपं सरूपं चेति[तद्] ब्रूहि । अत आर्यामाह ॥ छ ॥

* इतरस्य करणम् seems to be superfluous here. Or it should be शक्यस्य करणं शक्यकरणम् ।



हेतुमदनित्य[म]व्यापि सक्रियमनेकमाश्रित लिङ्गम् ।
सावयवं परतन्त्र[२६ ब]व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥

हेतुमदिति यस्योत्पत्तिकारणमस्ति तद् । हेतुरपदेशो निमित्तं प्रकृतिः कारणमित्य[न]र्थान्तरम् । प्रधानस्यैते पर्यायशब्दास्तस्मात् प्रधानं हेतुर्महदादिभूतपर्यन्तं तद्धेतुमत् । महानिति बुद्धिः, सा प्रधानेन हेतुमती। अहङ्कारो बुद्ध्या हेतुमान्। पञ्चतन्मात्राण्येकादशेन्द्रियाणि चाहङ्कारेण हेतुमन्ति। आकाशं शब्दतन्मात्रेण हेतुमत(त्), वायुः स्पर्शतन्मात्रेण हेतुमान्, तेजो रूपतन्मात्रेण हेतुमद्, आपो रस[त्]न्मात्रेण हेतुमत्यः, पृथिवी गन्धतन्मात्रेण हेतुमती । एवं महदादि लिङ्गं हेतु[२७ अ]मत्।

अर्थ(अथ) द्विविधो हेतुः — कारको ज्ञापकश्च । तत्र प्रधानबुद्ध्यहङ्कारतन्मात्रलक्षणश्चतुर्व्विधः कारको, विपर्ययाशक्तितुष्टिसिद्ध्यनुग्रहणात् (०नुग्रहभेदात्) पञ्चविधो ज्ञापको, वि(द्वि)विधेन हेतुना युक्तं हेतुमद्। अनित्यं प्रलयधर्म[क]मित्यर्थः। त(य)स्मादुत्पद्यते तस्मादनित्यं तद्यथा मृत्पिण्डादुत्पन्ना(न्नो) घटः स चानित्यो दृष्ट एवं महदादि कार्यं प्रधानादुत्पन्नं तस्मिन्नेव प्रलयं गच्छति। प्रलयकाले पञ्च महाभूतानि तन्मात्रेषु लीयन्ते, तन्मात्राणीन्द्रियाणि [च] अहङ्कारे। अहङ्कारो बु[२७ ब]द्धौ, [सा] हेतुरपि प्रधाने तस्मात् सर्व्वमनित्यं महदादि कार्यम् । अव्यापि न व्यापि न(अ)व्यापि असर्व्वगतमित्यर्थः। यथा प्रधानपुरुषौ दिव्यं(वं) भुवं चान्तरिक्षं च व्याप्यावस्थितौ न तथा महदादि कार्यं सर्व्वगतं, कुतः प्रदेशकत्वाद्, यस्मिन् प्रदेशेऽवस्थितं महदादि कार्यं तस्मिन्नेव वर्त्तन्ते(०ते) न सर्व्वत्र तस्मादव्यापि। सक्रियं शान्तं घोरं मूढोपनयत्वाद्(?)। यस्मात् संसरणकाले महदादि कार्यं त्रयोदशविधेन करणेन संयुक्तं सूक्ष्मशरीरमाश्रित्य संसरति [२८ अ] तस्मात् सत्क्रि(०क्रि)यम्। अनेकमेक(अनेकं न एक)मनेकं बहुविधमित्यर्थः। बुद्धिरहङ्कारः पञ्च-

तन्मात्राण्येकादशेन्द्रियाणि पञ्चमहाभूतान्येवमनेकम्। आश्रितम् यद् यस्मादुत्पद्यते तत्तत्रैवाश्रितं, बुद्धिः प्रधानमाश्रिता, अहङ्कारो बुद्धिमाश्रितः, पञ्चतन्मात्राण्येकादशेन्द्रियाणि चाहङ्कारमाश्रितानि, पञ्चमहाभूतानि तन्मात्राश्रितानि, एवमाश्रितं महदादिकार्यम्। लिङ्गं लयं गच्छति, लीनं परतन्त्रं भवति, लीनमर्थं लिङ्गयतीति वा लिङ्गम्। पञ्च महाभूतानि तन्मात्रेषु लयं गच्छति(॰न्ति), तन्मात्राणीन्द्रियाणि चाहङ्कारे, अहङ्कारो बुद्धौ, बुद्धिरपि प्रधाने लयं गच्छतीत्येवं महदादि कार्यं लिङ्गम्। सावयवम्। अवयवन्तीत्यवयवाः श[२८ ब]ब्दस्पर्शरूपरसगन्धास्तैर्युक्तं महदादिकार्यमित्येवं सावयवम्। परतन्त्रं पराधीनमित्यर्थः। स्वतन्त्रं न भवति। यथा लोके पितरि जीवति पुत्रो न स्वतन्त्र एवं महदादि कार्यं परन्त्रम्। प्रधानतन्त्रा बुद्धिर्बुद्धितन्त्रोऽहङ्कारोऽहङ्कारतन्त्राणि तन्मात्राणीन्द्रियाणि च *तन्मात्राणीन्द्रियाणि* तन्मात्रतन्त्राणि महाभूतानि। एवं परतन्त्रं महदादि व्यक्तम्।

†किं चान्यदनित्यं व्यक्तं नित्यमव्यक्तं कस्मादनुत्पत्तिधर्म्मकत्वात्। न हि प्रधानं कुतश्चिदुत्पद्यते तस्मान्नित्यमव्यक्तम्। किं चान्यद् अव्यापि [व्यक्तं व्यापि] प्रधानं कस्मात्सर्व्वगतत्वात्। यस्मात् प्रधानमाब्रह्मस्तम्बपर्यन्तं त्रैलोक्यं व्याप्य तिष्ठति तस्माद्व्याप्यव्यक्तम्। सक्रियं व्यक्तं [२९ अ] निःक्रि(निष्क्रि)यमव्यक्तं कस्मात् सर्व्वगतत्वादेव। किंचान्यदनेकं व्यक्तमेकं प्रधानं कस्माल्लोकानां त्रयाणामपि कारणं तस्मादेकम्। किंचान्यचा(दा)श्रितं व्यक्तमनाश्रितमव्यक्तं कस्मादकार्यक(॰दकार्य)त्वान्न हि प्रधानात्परं किंचिदस्ति यस्य प्रधानं कार्यं स्यात्तस्मान्निराश्रितमव्यक्तम्। किंचान्यलि(॰ल्लिं)गं व्यक्तम्, अलिङ्गं प्रधानं कस्माद्यस्मान्न हि प्रलयकाले प्रधानं कुत्रचिल्लयं गच्छति तस्मादलिङ्गम्। किंचान्यत्सावयवं व्यक्तं निरवयवं प्रधानम्। किंचान्यत् परतन्त्रं व्यक्तं स्वतन्त्रमव्यक्तं कस्मादात्मनः प्रभावत्वात्। न हि प्रधानस्य कश्चित् प्रभुरस्ति। तस्मात् स्वतन्त्रम्।

* * Superfluous.

† A line or two might be missing here. See Notes.



एवम(एवं) व्यक्ताव्यक्तयोर्विरूपं(॰वैरूप्यं) व्याख्यातम्। स्वरूप(सारूप्य)मिदमुच्यते ॥ छ ॥

[२९ ब] त्रिगुणमविवेक(कि) विषय[ः]
सामान्यमचेतनं प्रसवधर्म्मि।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा
च पुमान् ॥ ११ ॥

यैर्हेतुभिः सदृशं व्यक्तं तदुच्यते। त्रिगुणं व्यक्तं, सत्त्वरजत(॰स्त)मांसि त्रयो गुणास्तैर्गुणबु(॰णैर्बु)द्ध्यहङ्कारतन्मात्रेन्द्रियभूतानि संयुक्तानि अतस्त्रिगुणं व्यक्तं, तथा प्रधानमपि त्रिगुणं, कस्माद् यस्मादाह यदात्मकं कारणं तदात्मकं य(कार्य)मपि भवति यथा कृष्णैस्तन्तुभिः कृष्ण एव पटो भवति। एवं महदादि लिंगं त्रिगुणं दृष्ट्वाऽनुमीयते तदपि प्रधानं त्रिगुणमेव। यदि प्रधाने सत्त्वरजस्तमांसि त्रयो गुणाः न स्युर्बुद्ध्यादयोऽपि न तथा भवे[युः]। परिस्ति च (परं सन्ति च) तस्मात् प्रधान[३० अ]मपि त्रिगुणम्। किं चान्यत्। अविवेकि व्यक्तं, न विवेकि अविवेकि। सत्त्वरजस्तमांसि त्रयो गुणास्तेभ्यो गुणेभ्य इदं महदादि लिङ्गं पृथक् न शक्यन्ते(॰ते) कर्तुम्। यथाऽयं गौरयमश्व इति विभागः क्रियते एवं व्यक्तगुणयोरपि विभागो न शक्यते कर्तुं, यस्मादे गुणाद्व्यक्तं(यस्माद्ये गुणास्तद्व्यक्तं) यद्व्यक्तं ते गुणा एवमविवेकि व्यक्तं, तथा प्रधानमपि अविवेकि त्रिभिर्गुणैर्न विभज्यते, अन्ये गुणा अन्यत्प्रधानमिति। किं[३० ब] चान्यद्, विषयो व्यक्त(व्यक्तं) सुखदुःखमोहात्मता(॰त्मतया) पुरुषभोग्यत्वाद्विषयः। तदपि* सर्व्वपुरुषभोग्यम्। किं चान्यत् सामान्यं व्यक्तं सर्व्वपुरुषाणाम्, यथा मल्लदासी सर्व्वेषामेव मल्लानाम्। सामान्यविषयत्वाद् व्यक्तं सर्व्वपुरुषाणां सामान्यं तथा प्रधानमपि विषयत्वात् सर्व्वपुरुषसामान्यम्। किं चान्यद् अचेतनं व्यक्तं सुखदुःखमोहान्न

* I.e. प्रधानमपि।

वेदयतीत्यर्थः। तथा प्रधानमप्यचेतनं सुखदुः[३१ अ]खमोहान(न्न) वेदयतीत्यर्थः। किं चान्यत् प्रसवधर्म्मि व्यक्तं यस्माद्बुद्धिरहङ्कारं प्रसवति, अहङ्कारस्तन्मात्राणीन्द्रियाणि च, तन्मात्राण्यपि महाभूतानि प्रसवन्ति। तथा प्रधानमपि प्रसवधर्म्मिः(र्म्मि)। एवं व्यक्ताव्यक्तयोः सारूप(प्यं) व्याख्यातम्।

यत्पूर्व्वस्यामार्यायामुक्तं प्रकृतिविरूपं [सरूपं] चेति। अतः ऊर्ध्वं व्यक्ताव्यक्तयोः पुरुषस्य च साधर्म्यं वैधर्म्यं च व्याख्यास्यामस्तदुच्यते—तद्विपरीतस्तथा च पुमानिति। ताभ्यां विपरीतस्तद्विपरीतः। कतराभ्यां, व्यक्ताव्यक्ताभ्यां विपरीत इत्यर्थः। कः पुमान्। त्रिगुणं व्यक्तमव्यक्तं च, निर्गुणः पुरुषः। सत्त्वरजस्तमांसि त्रयो गुणाः पुरुषे न सन्ति। अव्यक्ते व्यक्ते च सन्ति। [३१ ब] किं चान्यदविवेकि व्यक्तमव्यक्तं च, विविक्तः पुरुषो गुणैर्व्वियुक्तो विशुद्ध इत्यर्थः। किं चान्यद्विषयो व्यक्तमव्यक्तं च, विषयी पुरुषो भोक्तेत्यर्थः। किं चान्यत् सामान्यं व्यक्तमव्यक्तं च, निःसामान्यः पुरुषः †पुरुषवद्बहुत्वाद्, अचेतनं व्यक्तमव्यक्तं च, चेतनः पुरुषः वेदयतीत्यर्थः। किं चान्यत् प्रसवधर्म्मि व्यक्तमव्यक्तं च, अप्रसवधर्म्मी पुरुषो न हि पुरुषात् किंचिदुत्पद्यत *इत्पद्यत* इत्यर्थः। तस्मादुच्यते विपरीतः पुमानिति।

किं चान्यत्तथा च पुमान्। यथा पूर्व्वस्यामार्यायामुक्तं व्यक्ताद्विपरीतमव्यक्तं, तथा पुरुषो ऽपि व्यक्ताद्विपरीत इति। यथा ऽव्यक्तमहेतुमदनुत्पन्नत्वादेवं पुरुषो ऽप्यहेतुमाननुत्पन्नत्वाच्च (०त्वादेव)। [३२ अ] किं चान्यत् नित्यमव्यक्तम् अनित्यंति(अनुत्पत्ति)धर्म्मकत्वात्, पुरुषो ऽपि नित्योऽनुत्पत्तिधर्मकत्वादेव। किं चान्यद्व्यापि अव्यक्तं सर्व्वगतत्वात् *पुरुषोऽपि व्यापी सर्वगतत्वात्* पुरुषोऽपि व्यापी सर्व्वगतत्वादेव। किं चान्यदनेकं व्यक्तमेकं प्रधानं, पुरुषोऽप्यनेकः। अनेनानेक[त्व]गुणेन पुरुषस्य व्यक्तसाधर्म्यं सादृश्यमित्यर्थः। किं चान्यदनाश्रित-

† See Notes

* * Superfluous.



[म]व्यक्तमकार्यत्वात्, पुरुषोऽपि नाश्रितो ऽनुत्पन्नत्वाच्च (०त्वादेव)। किं चान्यदलिङ्गमव्यक्तं न कुत्रचिल्लयं गच्छति [पुरुषोऽप्यलिङ्गः न कुत्रचिल्लयं गच्छति]। निरवयवमव्यक्तं नह्यव्यक्ते शब्दस्पर्शरूपरसगन्धादयोऽवयवाः सन्ति। तथा पुरुषोऽपि निरवयवः, न हि पुरुषे शब्दादयः सन्ति। किं चान्यत् स्वतन्त्रमव्य[३२ ब]क्तम्। स्वयं प्रभू(प्रभव)तीत्यर्थः। पुरुषोऽपि प्रधानवदात्मनः प्रभवतीत्येवमेतद्व्यक्ताव्यक्तयोरार्याद्वयेन साधर्म्यं वैधर्म्यं च व्याख्यातम्। तथा पुरुषस्यापि व्यक्ताव्यक्तसाधर्म्यं वैधर्म्यं च व्याख्यातम्।

अत्राह—त्रिगुणं व्यक्तमव्यक्तं च निर्गुणः पुरुष इति व्याख्यातस्तत्र(०तं तत्र ?) किमात्मका गुणाः किमर्थाः किंवृत्तयश्चेत्यत्रोच्यते ॥ छ ॥

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।
अ[न्यो]न्याभिभवाश्रयजननमिथुनवृत्ते(त्त)यश्च गुणाः ॥ १२ ॥

अत्रायं समासः। प्रीतिश्च अप्रीतिश्च विषादश्च [आत्मा] येषां गुणानां ते भवन्ति गुणाः प्रीत्यप्रीतिविषादात्मकास्तेषां प्रीत्यप्रीतिविषादात्मकानां लक्षणमुच्यते।* तत्र प्री[३३ अ]त्यात्मकं सत्त्वम्। आत्मशब्दः स्वभावे वर्त्तते। कस्मात् सुखलक्षणत्वा[त्]।* यो हि कश्चित् प्रीतिमुपलम्य(भ)ते आर्य(आर्ज्जव)मार्दवसत्यशौचह्रीबुद्धिशुद्धिक्षमाम(०क्षमा)नुकम्पाज्ञानादि च, तत् सत्त्वं प्रत्येतव्यम्। अप्रीत्यात्मकं रजः। कस्मादुप(कस्माद् दुःख)लक्षणकत्वात्। यो हि कदाचित् कश्चिदप्रीतिमुपलभ्य(भ)ते तद्द्वेषद्रोहमत्सरनिद्रा(न्दा)स्तम्भोत्क्षुधा(०स्तम्भोत्कण्ठा)निः(नि)कृतिवधबन्धनच्छेदनादि तद्रजः प्रत्येतव्यम्। विषादात्मकं तमः। कस्मात् मोहलक्षणकत्वात्। यो हि कश्चित् कदाचिन्मोहमुपलभ्य(भ)ते [३३ ब] अज्ञानमदआ(०मदा)लस्यभये(य)दैन्यवानास्तिका(दैन्यवाननास्ति-

* * आत्मशब्दः स्वभावे वर्त्तते। तत्र प्रीत्यात्मकं सत्त्वम्। कस्मात् सुखलक्षणत्वात्।—This would be better.

कय ? )विषादोन्मादस्वप्नादि तत्तमः प्रत्येतव्यम् । किं चान्यत्, प्रकाशप्रवृत्तिनियमार्थाः । प्रकाशश्च प्रवृत्तिश्च नियमश्च तेषामर्थाः [ इति ] प्रकाशप्रवृत्तिनियमार्थाः । तत्र प्रकाशयितव्यमिति सत्त्वस्यार्थः, प्रवर्तयितव्यमिति रजसोऽर्थः, नियमयितव्यमिति तमसोऽर्थः । किं चान्यद् अन्योन्याभिभवाश्रय-*विजनन( ०जनन ) मिथुनप्र*वृत्तियश्च(०वृत्तयश्च) गुणाः । अत्रापि समासः । अन्योन्याभिभवश्च अन्योन्याश्रयश्च [अन्योन्यजननं च] अन्योन्यमिथुनं च अन्योन्यवृत्तयश्च [३४ अ] येषां गुणानां विद्यन्ते ते भवन्त्यन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च । 'च' शब्दः समुच्चये द्रष्टव्यः प्र(प्री)त्यादयश्च तावत् प्रागभिहिताः । अन्योन्याभिभवादयश्चेति । रजस्तमसोरभिभवाच्छान्त( न्ता ) वृत्तिरुत्पद्यते सत्त्वस्य धर्माद्या । सत्त्वतमसोरभिभवाद् रजसो घोरा वृत्तिरुत्पद्यते अधर्माद्या । सत्त्वरजसा( ०सोर )भिभवात्तमसो मु( मू )ढा वृत्तिरुत्पद्यते अज्ञानात्( अज्ञानाद्या ) । किं चान्यद् अन्योन्याश्रय(या)श्च गुणाः । सत्त्वं हि प्रवृत्तिनियमावाश्रित्य प्रकाशयति । रजः प्रकाशनियमावाश्रित्य प्रवर्त्तयति । तमः प्रकाशप्रवृत्ती आश्रित्य नियमयति । त्रिदण्डविष्टम्भवद् वेदितव्या इति । किं चान्यद् अन्योन्यजननवृत्तयश्च गुणा इति । अ [३४ ब]-न्योन्यं जनयन्ति । कदाचित् सत्त्वं रजस्तमसी जनयन्ति( ति ) कदाचिद्रजः सत्त्वतमसी जनयति कदाचित्तमः सत्त्वरजसी जनयन्ति( ति ) । यथा सपरिकरः( र )कुम्भकाराधिष्ठितो मृत्पिण्डो घटं जनयन्ति( ति) । अन्योन्यं बोधयन्तीत्येतत् परिगृह्यते । यथा देवदत्तयज्ञदत्तौ परस्परं बोधयति( त ) एवं बुद्धिस्था गुणाः सत्त्वरजस्तमांसि परस्परं बोधयन्ति । एवमन्योन्यजननका गुणाः । किं चान्यद् अन्योन्यमिथुनवृत्तयश्च गुणा [ अ ]वियोगधर्म्मकत्वाद् । एवं ह्याह—

रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः ।
उभे [ते] सत्त्वरजसी तमसो मिथुनं विदुः ॥

[ देवीभागवत ३·५० ]

---

* वि and प्र are superfluous.



किं चान्यत्, अन्योन्यवृत्तयश्च गुणा अन्योन्यस्य वृत्तिं जनयन्ति । यथा काचिस्त्रि ( काचित् स्त्री ) नय विज(न)यविलासलीलावती भर्तुरा[ ३५ अ ]त्मनो बन्धुवर्गस्य [च] प्रीतिं जनयन्ति(ति), सैव च सपत्नीषु दुःखमोहान्(हौ) जनयति । एवं सत्त्वेन स्त्रीभूतेन रजस्तमसोर्वृत्तिर्जनिता । एवमन्येष्वपि योज्यम् ।

अत्राह—न खलु सत्त्वरजस्तमांसि क( जा)त्यन्तराणि । कुतः, स्वभावेष्ववस्थानात् । इह खलु रूपयौवनदाक्षिण्यमतिसाधुत्वस्मृत्युग्रहाच्च( ०भावा)भावलीलाविलाससंपन्ना स्त्री सत्त्वरूपमित्युपदिश्यते । सा च भर्तुः सुखावहा भवति सपत्नीनां दुःखमूढा च । तथा क्षत्रियाः सज्जप्रहरणाः कुतः(कृता)पराधां दस्युसेनामपि(भि)निघ्नन्ति । रजोरूपमित्युपदिश्यते( न्ते ) । ते च दस्युभिरुपद्रुतानां दार्यमाणानां सुखावहा भवन्ति । दस्यूनां दुःखा मूढाश्च । तथा महाकालमेघा(घ)स्तोया[३५ ब]म्माध्वो(नोऽ)वलम्बी ग्रसमान इव नभो भूमिं चाभिवर्द्धमान[ः] सबलाहक[ः] सविद्युद्गंभीरस्तयित्नुमात्तमेरु( सविद्युद्गंभीरस्तनयित्नुमांस्तमोरूप )मित्युपदिश्यते । स च का(क)र्षकाणां सज्जीकृतबीजोपस्कराणां सुखावहो भवति । स च प्रस्थ(स्था)नाशरणा-( or प्रस्थिताशरणा)नामनुपार्ज्जितभक्तस्नेहलवणतृणकाष्ठानां प्रोषितवधूनां[च] दृष्टो(दुःखो) मूढश्च । तदेवमवस्थितस्वभावत्वादेकं सत्त्वरजस्तमांसि ।

अत्रोच्यते — जात्यन्तराण्येव सत्त्वरजस्तमांसि लक्षणव्यवस्थानात् । कथमिति चेत्तदुच्यते ॥ छ ॥

सत्त्वं लघु प्रकाशकमिष्टमुपस्त(ष्ट)म्भकं चल च रजः ।
गुरु वरणकमेव तम[ः]प्रदीपवच्चाथतो वृत्ति[ः] ॥ १३ ॥

तत्र यः( यत् ) पूर्व्वस्य( स्या)मार्यायामभिहितं सत्त्वलक्षणं तल्लघुत्वं प्रकाशलक्षणं च । यदा सत्त्वमुत्कटं भवति [३६ अ] देवदत्ते तदा लघून्यङ्गानि भवति(न्ति) विशुद्धानीन्द्रियाणि भवति(न्ति) स्वविषयग्रहणसमर्थानि । तदा मन्तव्यमद्य मे व(च ? or superfluous) सत्त्वमुत्कटत्वेन वर्त्तते । उपस्त(ष्ट)म्भकं च* चलं च रजः ।

---

* च is superfluous.

उपस्त(ष्ट)म्भकं प्रेरण(क ?)मित्यर्थः । अथ वा गर्व्वश्च चलता क्रियेत्यर्थस्तद्यथा युद्धार्थी वि(वृ षः प्रतिवि(वृ)षमुपस्त(ष्ट म्भयति एवं यस्मिन् देवदत्ते यज्ञदत्ते वा रज उत्कटं भवति स कलहं मृगयति । किं चान्यत्, चलचित्तश्च भवति, ग्रामं गच्छामि, नगरं गच्छामि[इति] नित्यमौत्सुक्यमना भवति, एतद्रजसो लक्षणम् । तमसो लक्षणं वक्ष्यामस्तदुच्यते—गुरु वरणकमेव तमः । यद्य( यद् ) गुरुत्वमावरणत्वं चास्ति तत्तमः; यथा(दा) गुरूण्यंगानि भवन्ति, इन्द्रियाण्यावृत्तानि स्वविषयग्रहण( णा )समर्थानि भवन्ति तदा [३६ ब] मन्तव्यमद्य मे तम उत्कटत्वेन वर्त्तते । तस्माज्ज्ञात्यन्तराण्येव सत्त्वरजस्तमांसि ।

यत्पुनरुक्तं स्त्रीक्षत्रमेघेष्वित्यत्र ब्रूमः । सत्त्वं रज आश्रित्य स्वेन रूपेणाङ्गाङ्गिभावं गच्छन्ति( ति )। तस्यान्तिक( के ) दुःखमुत्पद्यते । एवं रजस्तमसी योज्ये ।

अत्राह—परस्परविरुद्धानां गुणानां कथमेकार्थवृत्तिर्भवति परस्परशत्रवो न ह्येकमर्थं कुर्व्वन्ति । इमे गुणाः परस्परविरुद्धाः कथं पुरुषार्थं कुर्वन्ति । अत्रोच्यते—प्रदीपवच्चार्थतो वृत्तिः । परस्परविरुद्धानि सत्त्वरजस्तमांसि परस्परार्थं(पुरुषार्थं) कुर्व्वन्ति । कुतः प्रदीपवत् । 'प्र' उपसर्गे, दीपेन तुल्यं प्रदीपवत् । प्रदीपस्तैलवर्त्यर्थि(ग्नि)संयोगः । तैलमग्निना विरुद्धम्, अग्निरपि तैलेन विरुद्धो, वर्त्तिरपि तैलाग्निभ्यां विरु[३७ अ]द्धा—एवं परस्परविरुद्धान्यपि(०द्धा अपि) तैलवर्त्या(र्त्य)ग्न्यादयो देवदत्तस्यार्थं कुर्व्वन्ति । एवमेते गुणा परस्परविरुद्धा अपि पुरुषार्थं कुर्व्वन्ति ।

अत्राह—अयमनन्तरं(रः) प्रश्नोऽस्ति । यदुक्तं पूर्व्वस्यामार्यायां—'त्रिगुणमविधे किंविषयां( त्रिगुणमविवेकि विषयः ) सामान्यमचेतनं प्रसवधर्म्मि । व्यक्तं'—कथमेवं ज्ञायते अव्यक्तमपि त्रिगुणादियुक्तमिति । अत्रोच्यते ॥ छ ॥

अविवेक्यादि[:]सिद्धस्त्रैगुणास्त(०गुण्यात्त)द्विपर्या(र्य)याभावात् ।
कारणगुणात्मक[त्वा]त्कार्यस्याव्यक्तमपि सिद्धम् ॥ [१४]



योऽयमविवेक्यादिर्गणः प्रसवधर्मान्(०र्म्यन्तः)[३७ ब] स व्यक्ते सिद्धो अव्यक्तेऽपि सिद्धः कथं गम्यते । त्रैगुण्याद्—यत्त्रिगुणमविविक्तं(यत्त्रिगुणं तदविविक्तं, यदविविक्तं ) तद्विषयं, यद्विषयं तस्मात्( तत् ) सामान्यं, यत् सामान्यं तदचेतनं, यद्यद्(यद)चेतनं तत् प्रसवधर्म्मि । तस्मादविवेक्यादिगणस्त्रैगुण्यादेव सिद्धः । कुतश्च सिद्धस्तद्विपर्ययाभावात् । इह हि यत्र तन्तवस्तत्रैव पटो, यत्र च पटोस्तत्र( पटस्तत्रैव तन्तवः, यः ) तन्तून् पश्यति स पटं पश्यति, यो वा पटं पश्यति स एव तन्तून् पश्यति । एवमेव तन्तुपटयोरिव व्यक्ताव्यक्तयोः संबन्ध इति दूरे प्रधानं सन्निकृष्टे व्यक्तम् । [३८ अ] योऽपि व्यक्तं पश्यति स्व(स)वा(चा?) व्यक्तमपि पश्यति । यो वा योगी प्रधानं पश्यति स व्यक्तमपि पश्यति । तस्माद्विपर्ययाभावादविवेक्यादिगणेन सिद्धमव्यक्तम् । कुतश्च सिद्धम् । कारणगुणात्मकत्वाका(त्का)र्यस्याव्यक्तमपि *पश्यति। तस्माद्विपर्ययाभावादविवेकयादिगणेन सिद्धमव्यक्तम् । कुतश्च सिद्धं कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि* सिद्धम् । कारणस्य गुणः कारणगुणस्तद्भावः ( कारणगुणः [स आत्मा स्वभावो यस्य] तद्भावः ) कारणगुणात्मकत्वम् । आत्मशब्दः स्वभावे वर्त्तते कस्मात्, कारणगुण [ स्वभाव ]त्वात् [कार्यस्य] । इह लोके यदात्मकत्वं(०त्मकं) कारणं तदात्मकं कार्यमपि भवति । यथा कटुकानि(न्नि)म्बवृक्षात् कटुक एव रसो भवति । मधुराच्च मधुरो द्राक्षादिरसस्तस्मादविवे[३८ ब]क्यादिगणेन सिद्धमव्यक्तम् । तत्र यदुक्तं भवता तत्कथमेव(वं)ज्ञायते अव्यक्तमविवेक(क्या)दिगणेन युक्तमिति तदेवमेभिस्त्रिभिर्हेतुभिः प्रतिपादितम् ।

अत्राह—इहलोके यन्नोपलभ्यते तन्नास्ति यथा द्वितीयमनीश्वरस्य शिरः, तृतीयः पाणि[:] शशविषाणादयो वा । एवं तावत् प्रधानपुरुषौ नोपलभ्य(भ्ये)ते, कथं तौ स्त इति गम्यते । अत्रोच्यते । हिमवान्( हिमवतः) शैलाग्रपरिमाणं नोपलभ्यते किं नास्ति, एवं प्रधानपुरुषावनुपलभ्यमानौ स्तः । अपि चोपलभ्यते प्रधानं हेतुभिश्च । तांश्च हेतून् वक्ष्यामः । तदुच्यते ॥ छ ॥

*Unnecessary repetition. See Notes.

**भेदानां परिमाणात् संबन्ध(समन्व)यात् शक्तितः प्रवृत्तश्च ।**
**कारणकार्यविभागादविभागाद्वैश्वरूप(प्य)स्य ॥ १५ ॥**

अस्ति प्र[३९ अ]धानं दृष्टम्(अस्ति प्रधानम्। [कुतः भेदानां परिमाणात् इहलोके यस्य कर्ताऽस्ति तस्य परिमाणं] दृष्टम् )। यथा कुलालः परिमृतपरिमृत्पिण्डात्( परिमितात् मृत्पिण्डात् ) परिमितमेव घटं करोति प्रस्थग्राहकमाढकग्राहकं च। एवं व्यक्तं परिमितम् , एका बुद्धिरेका(कोऽ)हंकारः पञ्च तन्मात्राण्येकादशेन्द्रियाणि पञ्च महाभूतानि। एवमेतद्व्यक्तं परिमितं दृष्ट्वाऽनुमानेन साधयामः अस्ति तत्कारणं प्रधानं यद्व्यक्तं परिमितमुत्पादयति। यदि प्रधानं कारणं न स्यान्निःपरिणाम( स्यान्निष्परिमाण )मिदं व्यक्तमस्याद्(व्यक्तं स्याद् ), अस्ति चास्य परिमाणं तस्मादस्ति प्रधानम्। कुतश्चास्ति समिन्धय(समन्वय) दर्शनात्। कस्य संबन्धया-(समन्वयात् ), भेदानामेव समन्ध(न्व)यादस्मादेव कारणात् पूर्व्वकारणात् शकलकपालामत्रसुवर्णसमन्ध( न्व )यभूषणादीन् ( ०कपालामत्रसमस्तसमन्वयः। भूषणादीन् )* दृष्ट्वा तत्त्वेन दर्शयति। सामान्यप्रकरणाल्लोके भेदानमेकामेक( भेदानामेकैक )जातिसमन्ध(न्व)यो दृष्टस्तेषां [३९ ब] धर्मा(र्मोऽ)न्वयस्तस्मात्समन्वयदर्शनात् पश्यामोऽस्ति प्रधानमिति। कुतश्चास्ति शक्तितः प्रवृत्तेश्च। इह यो ज(य)स्मिन्नर्थे व्य(श)क्तः स तस्मिन्नेव प्रवर्त्तते। तद्यथा कुम्भकारो घटघटिकाशरावोदु(द)ञ्चनादिकरणे शक्तः। अतः साधयामः प्रधानस्याप्यस्ति [शक्तिर्यया शक्त्या व्यक्तमुत्पादयति। सा च शक्तिर्निराश्रया न भवति, तस्मादस्ति प्रधानं यत्र शक्तिरवतिष्ठते। कुतश्चास्ति—] कारणकार्यविभागा[त्]। करोति [इति] कारणं, क्रियत इति कार्यं तयोर्व्विभाग[ः] कारणकार्यविभागस्तस्मात् कारणकार्यविभागात्। तद्यथा मृत्पिण्डं(ण्डः) कारणं, कार्यो(र्यं) घटः; स च घटो मधू[द]कपयसां धारणात्-(धारणे) समर्थो न मृत्पिण्डः, एवं व्यक्ताव्यक्तयोर्व्विभागो ऽन्यद् व्यक्तं महदादिकार ऽहङ्कार(महदादि अहङ्कार) तन्मात्रेन्द्रियभूत-

* See Notes.



पर्यन्तं कार्यम् , अन्यत् प्रधानं विपरीतं कारणमिति। द(त)स्मादस्ति प्रधानम्। कुतश्चास्ति अविभागाद्वैश्व [४० अ]-रूप(प्य)स्य। न विभागे(गोऽ)विभागः। विश्वरूपस्य भावो वै[श्व]रूप्यं ब(बा)हुरूप्यमित्यर्थः। तत्र त्रैलोक्यं पञ्चसु महाभूतेष्वविभागं गच्छति। पञ्चमहाभूतानि तन्मात्रेष्वविभागं गच्छन्ति। पञ्चतन्मात्राण्येकादशेन्द्रियाणि चाहङ्कारं(रेऽ)विभागं गच्छन्ति, अहङ्कारोऽपि बुद्धौ, बुद्धिरपि प्रधानं(ने)। एवं त्रयो लोकाः प्रलयकाले प्रधानेऽविभक्तास्त[द्य]था दध्यादयः प्राक् प्रवृत्तेः क्षीरेऽविभक्ताः यथा जलभूम्योरमेत(०भूम्योरेत) द्रसादिवैश्वरूप्यं स्थावराणां जङ्गमेषु जङ्गमानां स्थावरेष्विति। एवं जात्यनुछ(च्छे)-देन सर्व्वं सर्व्वात्मकमि[४० ब] ति।।

तेन मन्यामहे अस्ति प्रधानं यत्र महदादिलिंगमविभागं गच्छति। इत्येवमवश्यंभावी अविभागो, यत्राविभागस्तत् प्रधानं, तस्मादस्ति प्रधानम्। अत्रोच्यते ॥ छ ॥

**कारणमस्त्यव्यक्तं प्रवर्त्तते त्रिगुणतः समुदा(द)याच्च ।**
**परिणामतः सलिलवत् प्रतिपत्ति(०प्रति)गुणाश्रयविशेषात् ॥१६॥**

कारणमस्त्यव्यक्तमिति। तदेवं पञ्चभिः चैतेहे(०भिश्चैतैर्हे)तुभिर्ज्ञायते अस्तीति( अस्ति ) तत्कारणमव्यक्तमेक[म]स्य जगतो मूलमिति ॥

अत्राह। यद्येकं प्रधानं कथं तर्हि कार्यमुत्पादयति। एवं(कं) प्रधानमेकं(०नमनेकं) कथं कार्यमुत्पादयति। अत्रोच्य[४१ अ]ते। प्रवर्त्तते त्रिगुणतः। प्रधाने बहुत्वमस्ति, सत्त्वरजस्तमांसि त्रयो गुणास्तस्मिन्। त्रिगुणतः प्रवर्त्तते त्रिधा व्यवहारो यथा(०रः। [समुदयाच्च] यथा) गङ्गायां स्रोतांसि समुदितानि गङ्गामारभान्ते, यथा तन्तवः समुदिताः पटं कुर्व्वन्ति एवं सत्त्वरजस्तमांसि त्रयो गुणाः समुदिताः प्रधाना(न)स्था व्यक्तं कुर्व्वन्ति ॥

अत्राह। इह लोके द्विविधं कारणं परिणामकत्वाद्-परिणामकत्वाच्च। तत्र(त्रा)परिणामकत्वा[त्]मृत्पिण्डदण्डसूत्रोदक-विदलानलादिभिर्घटस्य(०लादयो घटस्य?), परिणामि(म)तश्च क्षीरं दध्नः। तत्र प्रधानं कथं कारणमित्यत्रोच्यते। परिणामामतो-(परिणामतो); यथा क्षीरं दधिभावेन परिणमति, यदेव क्षीरं तदेव दधि, एवं प्रधानं क्षीरवद् व्यक्तभावेन परिणमति दधिवद् यदेवाव्यक्तं तदेव व्यक्तमिति। तस्मादुच्यते परिणामतः प्रधानं कारणम् इति।

अत्राह—को दृष्टान्तः। उच्यते। सलिलवद्य [४१ ब]था सलिलमेकं हिमवति हिमभावेन परिणमति, यथेक्षुरसं(सो) भ(र)सिका-खण्ड-मत्स(त्स्य)ण्डिका-शंकर(रा)-फाणित-गुडभावेन परिणमति, यथा क्षीरं प्सु(द्रप्स)-दधि-मस्तु-नवनीत-घृतारिष्ट-किलाट-कूर्म्मि(र्च्चि)काभावेन परिणमति। एवमेकं व्यक्तं-(एवमेकमव्यक्तम्) अ(आ)ध्यात्मिकेन बुद्ध्यहङ्कारमा(०रतन्मा)-त्रेन्द्रियभूतभावेन परिणमति, आधिभौतिकेन देवगन्धर्व्वयक्ष-राक्षसा(स)पितृपिशाचमानुषा(ष)पशुमृगपक्षिसरीसृपस्थावर-भावेन परिणमति, अ(आ)धिदैविकेन शीतोष्णवातवर्षाविश-भावेन परिणमति।

अत्राह—एकस्मात् प्रधानादुत्पन्न(न्ना)स्त्रयो लोका कथं विषमाः। इह हि ये देवास्ते सुखिनो मनुष्या दुःखितास्तिर्यञ्चो मूढाः, एकस्मादुत्पन्नानां त्रयाणां लोकानां कथं वैषम्यमिति। अत्रो[४२ अ]च्यते प्रतिपत्ति(०प्रति)गुणाश्रयविशेषा[त्]। [प्रतिप्रतीति वीप्सा। गुणानामाश्रयस्तस्य विशेषः] तस्माद्-गुणाश्रयविशेषा[त्]। तद्यथा एकरसमन्तरिक्षात्पतति जलं तच्च मेदिनीं प्राप्य नानारसतां गच्छति पृ[थ]ग्भाजनविशेषात् परिणमति। एवमिमे त्रयो लोका एकस्मात्प्रधानादुत्पन्ना गुण-वैषम्यात् पृथक्पृथग्भावं गच्छन्ति। देवेषु सत्त्वमुत्कटं ततस्ते सुखिनस्तत्रापि रजस्तमसी स्तः। मनुष्येषु रजमु(रज उ)त्कटं ततस्ते दुःखितास्तेष्वपि सत्त्वतमसो तत्स्ति(स्तः, ति)-र्यग्योनिगतेषु तम उत्कटं ततस्ते मूढास्तेष्वपि सत्त्वरजसी स्तः।



एवमेक[४२ ब]स्मात् प्रधान(ना)दुत्पन्नानां त्रयाणां लोकानां वैषम्यं भवति।

तावद् द्वाभ्यामार्याभ्यां प्रधानस्याधिगमः कृतः। अतः ऊर्ध्वं पुरुषस्याधिगमं करिष्यामः। अत्राह—केचिदा[चा]र्या मन्यन्ते शरीरेन्द्रियबुद्ध्यादेर्व्यतिरिक्तो [नास्ति परमात्मा। अत्रोच्यते—शरीरेन्द्रियबुद्ध्यादिव्यतिरिक्तोऽ]स्ति परमात्मा। को दृष्टान्तो यथाऽसिकोशवन्मुञ्जै(ञ्जे)षीक(का)[व]देवं शरीरे-न्द्रियबुद्ध्यादेर्व्यतिरिक्तोऽस्ति परमात्मा †। पुरुषोऽपि प्रधान-सूक्ष्मोति कृत्वा(प्रधानवत् सूक्ष्म इति कृत्वा?) प्रोच्यते ॥छ॥

संघातपरमा(०परा)र्थत्वा[त्] त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कवल्यार्थ[४३ अ]प्रवृत्तेश्च ॥१७॥

अस्ति पुरुषः, कुतः संघातपरार्थवात्। संघातश्च परार्थश्च संघातपरार्थस्तद्भावः संघातपरार्थत्वं तस्मात् संघातपरार्थत्वात्। इह लोके ये संघाताष्ठ(ये संघाता[स्ते परार्था दृष्टाः। पर्यङ्कःका]ष्ठ)संघातो रथश्च, तृणकाष्टे(ष्ठे)ष्टकासंघातो गृहम्। न हि ते रथगृहपर्यंको(का)दयः स्वार्थं कुर्व्वन्ति, न परस्परार्थाः। अस्त्यसौ देवदत्तो यस्तस्मिन् पर्यङ्के शेते रथेन गच्छति गृहे निवसति। एवमेव चक्षुरादयः संघाता न स्वार्था न परस्परार्था न चापार्था [किन्तु परार्थाः।] यश्चासौ परो(रः)स चात्मा। य(त)स्मादनुमीयते अस्ति पुरुषो यस्यार्थं चक्षुरादिसंघात[:]शरीर-मुत्पन्नमिति ॥

कुतश्चास्ति त्रिगुणादिविपर्ययात्। त्रयो गुणादि(गुणाः) यस्य गणस्यादौ संभवन्ति स [त्रिगुणादिः]। त्रिगुणादेर्विपर्यय-स्तस्मा[त्] त्रिगुणादिविपर्ययात् पश्या[४३ ब]मोऽस्ति पुरुष इति। उक्तं हि पूर्व्वस्यामार्यायां 'तद्विपरीतस्तथा च पुमान्' इति,

† The portion शरीरे......परमात्मा is unneccssarily repeated in the manuscript. The scribe is himself confused, as can seen from the text above.

तस्मादस्ति पुरुष इति। कुतश्चास्ति अधिष्ठाना[त्]। तव्यन्तरेणाधिष्ठाता तमधिष्ठानं(न ह्यन्तरेणाधिष्ठातारमधिष्ठानं ?) भवति य(त)थेह लोके लङ्घनधावनप्लवनसमर्थैरस्ति युक्तो(०समर्थैरश्वैर्युक्तो) रथः सारथिनाधिष्ठितः प्रवर्तते। तत्सरीरनाशस्या न चात्मविना प्रवर्तते। ([अथ सारथिनानधिष्ठितः प्रवर्तते] ततः शरीरनाशःस्या[त्]। न चात्मविना[शाय] प्रवर्तते।) अपि चोक्तं—षष्ठि(ष्टि)तन्त्रेषु 'पुरुषाधिष्ठितं प्रधानं प्रवर्तते' इति। कुतः(ततः) पश्यामो अस्त्यसौ परमात्म(त्मा) पुरुषो योऽ(येना)धिष्ठितं प्रधानं महदहङ्कारतन्मात्रेन्द्रियभूतान्युत्पादयति। तस्मादस्ति पुरुष इति। कुतश्चास्ति। भोक्तृभावाद्—इ[ह] मधुराम्ललवणकटुतिक्तकषायाः षड्रसाः। षड्भिः (ड्भिः or ड्भी)रसैर्युक्तं भोजनं दृष्ट्वा भोक्ता साध्यते। अस्ति भोक्ता यस्येदं भोजनम्। ४४ अ] एवमिदं व्यक्ताव्यक्तं दृष्ट्वा साधयामोऽस्त्यसौ परमात्मा पुरुषो यस्येदं व्यक्ताव्यक्तं भोजनमिति। कुतश्चास्ति। कैवल्यार्थप्रवृत्तेश्च। कैवल्य(केवल)भावः कैवल्यं, कैवल्यं मोक्ष इत्यर्थः। या तस्य प्रधानस्य प्रवृत्ति[:]सा कैवल्यार्थ(र्था) प्रवृत्तिः प्रधानस्येति।

अत्रेत्याह (अत्राह)—गृह्णीमस्तावदेभिः पञ्चभिरा(र)धीतैर्हेतुभिः शरीरव्यतिरिक्तः पुरुषोऽस्तीति। किं खलु सर्व्वशरीरेष्वेकः पुरुष आहोस्वित् प्रतिशरीरं [भिन्नः] पुरुष इति। कुतः संशय इति चेच्चोदक आ[चा]र्यविप्रतिपत्तेः संशयः। इह केचिदाचार्या वेदवादिनो मन्यन्ते एकोऽयं पुरुष[:] सर्वशरीरेषूपलभ्यते मणिसूत्रवत्। इह रच(श?)नायां यावन्तो मणयस्तेषु सर्व्वेष्वेकमेव सूत्रं प्रवर्त्तते। एवं मणिभूतेषु शरीरेषु किमेक[:]सूत्रभूतो(त) आत्मा, आहोस्विज्जल[४४ ब]चन्द्रवत् पुरुषा इति। एकश्च बहुषु नदीकूपतडागसमुद्रादिष्वो(षू)पलभ्य[त] इति। अतः संशयः किमेतत्(किमेकः) पुरुषो मणिसूत्रा(त्र)न्यायेन्या(ना)होस्विद्बहवः पुरुष(षाः) चन्द्रवदिति। अत्रोच्यते। बहवः पुरुषा[:]। कथमिति चेत्तदुच्यते ॥ छ ॥



जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रिगुणादि(त्रैगुण्य)विपर्यया[च्] चैव ॥१८॥

जन्मनियमादिह केचिन्नीचजन्मानः केचिन्मध्य[म]जन्मानः केचिदुत्कृष्टजन्मानो, यदि त्वेकः पुरुषः स्यात् [स] एव नीचः कुलोत्पन्नः स्यात् (स एव नीचः कुलोत्पन्नश्च स्यात्; or स एव नीचकुलोत्पन्नः स्यात् स एव उत्कृष्टकुलोत्पन्नः स्यात् ?)। कस्मात्। पुरुषैकत्वात्। अस्ति चायं नियमो अन्ये [अधमा अन्ये] मध्यमा अन्ये उत्कृष्टा[:]। तस्माद् बहवः पुरुषाः। कुतश्च मरणनियमान्मरणेऽपि नियमो दृष्टो मम भ्राता मृतोऽपि [च] मम पिता, तस्मा[४५अ]द् बहवः पुरुषाः। अपरे वर्णयन्ति जन्ममरणनियमाद् इह कश्चित् कदाचिन् म्रियते तदैव परो जायते। यद्येकः पुरुषः स्यादेकस्मिन्म्रियमाणे सर्व्व एव म्रियेरने(न्ने)कस्मिन् जायमाने सर्व्वे जायेरन(न्न)स्ति चायं नियमोऽन्ये म्रियन्ते तस्माद् बहवः पुरुषा इति। कुतश्च पश्यामः। करणनियमात्। करणामी(नी)न्द्रियाणि श्रोत्रादीनि। इह लोके केचिद् बधिराः [केचिदबधिराः], केचिदन्धाः केचिदनन्धा[:], केचिन्मूकाः केचिदमूकाः, केचित् कुष्ठिनः केचिदकुष्ठिनः। अतः पश्यामो ये उपहतेभि(न्द्रि)यास्तेऽप्यन्ये, ये चानुपह[४५ब]तेन्द्रियास्तेऽप्यन्ये। तस्मात् प्रतिनियम(त)करणादपि पश्यामोऽन(ने)के पुरुषा इति। कुतश्च पश्यामोऽयुगपत्प्रवृत्तेश्च। इह लोके नानाविधाः प्रत्यया (?) वर्त्तन्ते। एको धर्मेण [प्रवर्त्तते] एकः कामेन एको मोक्षेण। ब्राह्मणश्च ब्राह्मणकर्मणि क्षत्रियश्च क्षत्रियकर्म्मणि वैश्यश्च वैश्यकर्म्मणि शूद्रश्च शूद्रकर्म्मणि। अतोऽयुगपत्प्रवृत्तेश्च पश्यामोऽनेके पुरुषा इति। कुतश्च पश्यामस्त्रैगुणे विपर्ययाच्चैव(०स्त्रैगुण्यविपर्ययाच्चैव)। 'च' शब्द[:] समुच्चयार्थे पूर्वोक्तैर्हेतुभिर(०भिः)। [इहैकस्य ब्राह्मणस्य त्रयः पुत्राः सब्रह्मचारिणः एकेनैव एकस्यां भार्यायां जाताः। तत्रैकः सात्त्विको मेधावी सुखी] शुचि[:]। द्वितीयो राजसो दु(दुः)खी दुर्मेधास्तृतीयस्ता[४६अ]मसो मूढो नास्तिको, यद्येक एवात्मा

स्यादेकस्मिन् सात्त्विके सर्व्वे सात्त्विकाः स्युरेकस्मिन् राजसे सर्व्वे राजसा[ः] स्युरेकस्मिंस्त(स्ता)मसे सर्व्वे तामसा[ः] स्युर्न्न भवन्ति अतस्तैगुंण्य(० स्त्रैगुण्य)विपर्ययात्पश्यामोऽनेके पुरुषा इति ।

अत्राह—अयं मे संशयः किं खलु कर्त्ता पुरुष आहोस्विद्-कर्तेति । कुतः संशय इति वेदा(चेदा ?)चार्यविप्रतिपत्ते[ः] । लोके तावत् पुरुषो गच्छति पुरुषो धावति पुरुषस्तिष्ठति पुरुषेण कृतमित्याचार्या वेद्वादिनो ब्रवति (ब्रुवते) । पुरुष[ः] कर्त्ता [इति] वैशेषिका अपि । अतः संशयः । अत्रोच्यते अकर्त्ता पुरुषः । कथमिति ॥छ॥

तस्माच्च विपर्ययात्(विपर्यासात्) सिद्धं साक्षित्वमस्य पुरषस्य ।
कैवल्यं माध्यस्थ्यं प्रष्ठि(द्रष्टृ)त्वमकर्त्ति(र्तृ)भावश्च ॥ १९ ॥

कर्तृक(का)रणानां को विशे[४६ब]षः अत्रोच्यते । तद्यथा कश्चिद्यमनियमरतः सांख्ययोगाचार्यो भिक्षुर्नगरे प्रतिवसति । यय-(ज)न-याय(ज)ना ध्ययेे(०नाध्यय)नाप्रतिगृ(ग्र)हकृषिवणिज्या(वाणि-ज्य)पौरुषाद्यास्तु(सु) क्रियासु वर्त्तमानानां नागराणां प्रक्षिण्य(साक्षि)-मात्रो भवति । अनु(ऋतु)वशाच्च शीतोष्णादीनागताननुभवति । तद्वद्यं नान(ना)वस्थे गुणविमर्द्दे वर्त्तमाने(नः) क्षेत्रज्ञः साक्षिमात्रः स्यादेवं साक्षित्वं सिद्ध[म]स्य पुरुषस्य । केवलभावः कैवल्यमपि सिद्धम् । कैवल्यं नाम त्रिभ्यो गुणेभ्य(भ्योऽ)न्यत्वमिति । अत्राह-तद्यथाऽसौ भिक्षुर्न(ना)गराणां विवदतां कदाचिद्वक्ता भवति त्वया साधु कृतं त्वयाऽसाध्विति । किमेवं पुरुषो भवति । अत्रोच्यते-साक्षित्वम् (माध्यस्थ्यम्) । नास्य के[न]-चित् कृत्यमस्ति उदासीनो ह्ययमु (म् । *अ) त्राह । य[४७अ]-द्यत्कर्त्ता (यद्यकर्त्ता) पे(प)रकृतानां कि कर्त्ता(प्रयोक्ता) । अत्रोच्यते अकर्तृभावश्च । द्विविधो [हि] कर्त्ता प्रयोक्ता कर्त्ता च । अत्रो-[दा]सीनस्य पुरुषकर्तृत्वं प्रसिद्धं (पुरुषस्य कर्तृत्वं प्रतिषिद्धं) गुणलक्षणेन ।

* Something like 'अतः एव द्रष्टा, अत एवाकर्ता is missing here.



अत्राह यद्यकर्ता पुरुष[ः] अध्यवसायं तर्हि किं करोति धर्म्मं करिष्याम्यधर्म्मं करिष्यामीति । यदि गुणा अध्यवसायं कुर्व्वन्ति तत् स्व(स)चेतना[ः]इति(स्युः ?) । अचेतनाश्च गुणा इति प्रागुक्तम् । अथ पुरुषोऽध्यवसायं करोति ततः कर्त्ता भविष्यति । तस्मादुभयथाऽपि दोष इत्यत्रोच्यते ।

[ तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ॥ २० ॥ ]

नैष दोषस्तस्मात्तत्संयोगादचेतनं महदादि लिङ्गम् अध्य-वसायाभिमानसंकल्पालोचनवृत्तिषु चेतनवत् प्रवर्त्तते । को दृष्टान्त-स्तद्यथाऽनुष्णशीतो घ[४७ब]टस्य च (०घटः) शीताभिरद्भिः संसृष्टो भवति शीतोऽग्निना संयुक्त उष्णो भवति । एवं महदादिलिङ्गमचेतनमपि भूत्वा चेतनवद्भवति । तस्माद्ध्वसायं कुर्व्वन्ति गुणा[ः] कार्यादिषु । यदप्युक्तं लोकोप[चा]-रात् कर्त्ता पुरुष इति, अत्र ब्रूमो गुणकर्तृत्वे च य(त)था कर्त्तेव भवत्युदासीनः । अत्र दृष्टान्तश्च । केचित्किल चौरा ग्रामं हत्वा द्रव्यं गृहीत्वा ग्रामात्तद्गच्छति (ग्रामान्तरं गच्छन्ति) कृतकार्य(र्या)-स्तैः सह ब्राह्मणः श्रोत्रियः पन्थानं गच्छति । ततस्ते चौरा आरक्षिसि(भिः) गृहीताः, सोऽपि ब्राह्मणो गृहीतस्त्वमपि चौर इति । स एवमचौरोऽपि चौरसंसर्गाच्चौरो भवति । एवमेव सत्त्वरजस्तमांसि त्रयो गुणाः कर्त्तारस्तैः सं[४८अ]युक्त[ः] पुरुषः अकर्त्ताऽपि कर्तृसंसर्गादेव कर्त्ता पुरुषः ।

अत्राह—उक्तं च तस्मात् सं(तत्सं)योगादिति । अथ किंहेतुकः प्रधानपुरुषसंयोग इति चेत्, संयोगोऽनेकविधो हि संयोगो स्परतः(०गः परस्परतः) । कस्माद्यो(द्) यथा [अन्यतरकर्म्मतः] श्येनस्थाण्वो[ः] । उभयकर्म्मतो यथा श्येनयोः, सन्निपतितयो देशयो(र्द्वयो)र्व्वा संयोगो(संयोगजो) यथा द्व्यंगुला(ला)काशयो[ः] । स्वाभाविक[ः] यथाग्न्युष्णयो[ः], शक्तिहेतुको यथा मत्स्योदकयो[ः], यादृच्छिकः श्वभ्रपवन-योर्व्वा । कस्मिन् कोऽत्रः(त्र) संयागः । अत्रोच्यते । अन्यतर-

कर्मज उभयंतर(उभय)कर्म्मज(जः) संयोगजश्चासंयोगस्यानेकविधो हि संयोगो नैतान्(नैतयोः) प्रधानपुरुषयोर्व्विभुत्वान्निः-क्रि(न्निष्क्रि)यत्वाद्वा व(अ)स्ति । स्वाभाविको(के)ऽपि, मोक्ष-(क्षा)भावः स्यादेवमेव विषयहे [४८ ब] तुके शक्तिहेतुके च तयोनि(र्नि)त्यत्वान्मोक्षाभावः स्याद्वियोगत्वात् । अत्राह च कस्तर्हि प्रधानपुरुषयोः संयोग इत्यत्रोच्यते। अर्थहेतुकः। कश्चासावर्थ इति ॥ छ ॥

पुरुषस्य दर्शनार्थं [ कैवल्यार्थं ] तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः स्व(स)र्ग्गः ॥ २१ ।

पुरुषस्य ताव[द्] दर्शनार्थं संयोग[ः] । पुरुषः प्रधानेन सह संयुज्यते सगुणगणां प्रकृतिं द्रक्ष्याम्ययमर्थः । कैवल्यार्थं तथा प्रधानस्य संयोगोऽस्य तपस्विनः पुरुषस्याज्ञाने वर्त्तमानस्य कैवल्यं करिष्यामीति । कैवल्यं मोक्ष इत्यर्थः। यथा राजा पुरुषेण संयुज्यते प्रेषणं मेधा (मेऽयं ?) करिष्यतीति। पुरुषोऽपि राज्ञा संयुज्यते वृत्तिं दास्यति इत्येवं तावद् राजा(ज)पुरुषयोरर्थहेतुकः संबन्धस्तथाऽ[४९अ] त्राप्य[र्थ]हेतुकः प्रधानपुरुषयोरपि संबन्धः। किचान्यद् अपि चात्र दृष्टान्त[ः] पङ्ग्वन्धवदुभयो[रपि संयो]-गस्तत्कृतः सर्ग्गः* । यथा किलोज्जयन्याः सार्थः पाटलिपुत्रोपस्थितः (०पुत्रं प्रस्थितः) । स च सार्थश्चौरैभिहि(ह)तः । स च कृच्छ्रेण महता निर्जगाम। आहतहतसर्व्वस्वोज्ञनः(०सर्व्वस्वजनः) परित्यक्तः पन्थानमपश्यन् समन्तादन्ध[ः] परः(रि)भ्रमन् पङ्गुना दृष्टो(ष्टः) [प्रोक्तश्च] अन्ध मा भैषीरहं पङ्गुमा(०र्मा)-र्ग्गदर्शने कुशलो गन्तुमसमर्थ[ः] । अन्धेनाप्युक्तं—"भो भो गमनाशक्तः (०क्त) पङ्गोः (पङ्गो) ! यथा भवांस्तथाहमपि न शक्नोमि द्रष्टुं, गन्तुं मम सामर्थ्यमस्ति, न दृ[४९ब]क्सामर्थ्यं तदहं स्कन्धेनादाय भवन्तं गच्छामीति+ (गच्छामि) त्वमपि मम पन्थानं दर्शय" [इति] ।

* सर्ग्गः is unnecessarily repeated in the manuscript.

\+ इति is meaningless here. It should be after दर्शय.



एवं तयोर(रु)क्तहेतुकः संयोगस्तुल्यः, तद्वत् पङ्ग्वन्धवत् । [पङ्गुवत्] पुरुषे द्रष्टव्यम् । अन्धवत्प्रधान(ने) । पुरुषस्य दृक्-शक्तिः । प्रधानस्य क्रियासामर्थ्य[म्] । तयोः कृतार्थयोर्व्वियोगो भवति । तौ पङ्ग्वन्धौ देशान्तरप्राप्तौ, अन्धोऽपि स्वजनैः सह गतः, पङ्गुरपि तथैव । एवं प्रधानमपि पुरुषस्य मोक्षं कृत्वा निवर्त्तते, पुरुषोऽपि प्रधानं दृष्ट्वा मोक्षं गच्छति । किं चान्यत् तत्कृतः सर्गः । 'तत्' शब्देन प्रधानपुरुषौ संबध्य(ध्ये)ते । ताभ्यां प्रधानपुरुषाभ्यां [५०अ] [कृ]तस्तत्कर्तृन(कृतस्तत्कृतः, or कृतस्तत्कर्तृकः) सर्गः । तद्यथा स्त्रीपुंससंयोगात पुरुषो (पुत्रो) भवति । एवं प्रधानपुरुषसंयोगात् सर्ग्गोत्पत्तिर्भवति । सर्ग्गशब्देन महदादिलिंगस्योत्पत्तिरिति ब्रू(ब्रु)वते । तामुत्पत्तिं ब्रूमः ॥छ॥

प्रकृतेर्महांस्ततोऽहङ्कार[स्तस्माद्] गणस्तु* षोडशकः ।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥२२॥

प्रकृतिरिति प्रधानमधिकुरुते । तस्याः प्रकृति(ते)र्महानुत्पद्यते प्रथमतः कश्च[न] । महान् (वृबु)द्धिः प्रज्ञा मतिः संवित् क्षा(ख्या)तिश्चिति[ः] स्मृते (तिः) हिरण्यगर्भ इति महतः पर्यायास्ततोऽहङ्कार उत्पद्यते । अहङ्कारस्येमे पर्यायः शब्द(पर्यायशब्दाः—) भूतादि[स्] तैजसो वैकृतक इति । तस्माद्गणस्तु षोडशकस्तस्माद[हङ्]कारा[त्] षोडशको गण उत्पद्यते पञ्चतन्मा [५०ब]त्राण्येकादशेन्द्रिया[णि] च । शब्दस्त(त)न्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रं चेति । एवमेतानि पञ्चतन्मात्राणि, पञ्चबुद्धीन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणमिति, पञ्चकर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाः; मनश्चेति एवं षोडशको गणः । किंचान्यत्, तस्मात् [अपि] षोडशकात् पञ्चभ्यः पञ्च महाभूतानि । शब्दतन्मात्रादाकाशं स एव लक्षणं (तदेकलक्षणं), स्पर्शतन्मात्राद्वायुः स द्विगुणलक्षणः, रूपतन्मात्रात्तेजः तत्त्रिगुणलक्षणः(णं), रसतन्मात्रादापस्तच्चतुर्गुणः (स्ता-

*तु according to vṛtti. This ka̱rika̱ is found in a confused form in the text of the manuscript. See Notes.

श्चतुर्गुणाः), गन्धतन्मात्रा[त्] पृथ्वी सा पञ्चगुणा। एवं पञ्चभ्यः पञ्च महाभूतान्युत्पद्यन्ते।

यदुक्तं व्यक्ताव्यक्तज्ञविज्ञानान्मोक्षः प्राप्यत इति, अत्र महदादि[भूत-]पर्यन्तमित्येतद्व्यक्तं व्याख्या[५१अ]तमव्यक्तमपि 'भेदानां परिमाणादित्यभि (परिमाणात्' इत्यादिभिः) [का. १५] पञ्चभिर्व्वीतैर्हेतुभिर्व्याख्यातम्। * अपि चोक्तम्—

पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः

अत्राह प्रकृतेर्म्महानित्युक्तं तस्य महतः किं लक्षणमित्यत्रोच्यते ॥छ॥

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम् ॥ २३ ॥

अध्यवसायो बुद्धिरध्यवसायो निश्चयप्रतिपत्तिरयं स्थाणुरयं पुरुष इति बुद्धि(द्धे)र्लक्षणम्। किं चान्यद् धर्म्मो ज्ञानं वैराग्यमै(विराग ऐ)श्वर्यमिति। तत्र धर्म्मो नाम वर्ण्णिनामाश्रमिणानां(मिणां) च समयाविरोधेन यः प्रोक्तो यमनियमलक्षणः स धर्मः। तत्र पञ्च यमाः पञ्च नियमाः। अहिंसाऽस्तेकं(यं) ब्रह्मचर्यं सत्यमव्यवहार इति यमाः। अक्रोधो गुरुशु[५१ब]-श्रूषा शौचमाहारलाघवमप्रमाद इति नियमः(माः)। एभिर्यमनियमौ(मैः)× यस्माद्वर्त्तते स धर्मः। तत्र या स्थावरजङ्गमानां भूतानां वाघ्नतः कायकर्मभि (वाङ्मनःकायकर्मभिः) अद्रोहता सा अहिंसा। तथा संभ्रमेषु तत्पृष्ठा(क्ता)नामात्यन्तिकेषु प्रयोजन-+ प्रयोजनेष्व ये or ०ष्वाय-)-षु ( ? ) वा परद्रव्यस्य स्वेच्छानान्तरे (स्वे स्थानान्तरे ? ) समत्वात् करस्योपरमां(मः) तद्-

* पुरुषोऽपि 'संघातपरार्थत्वात्' (का. १७) इत्यादिभिर्हेतुभिर्व्याख्यातः। एवमेतानि पञ्चविंशतितत्त्वानि–Something like this is necessary here. See G.

× Or एतौ यमनियमौ यस्माद्वर्तेते स धर्मः।

\+ One प्रयोजन is superfluous here. After ये there is blank space enough for one letter. Or Is it प्रयोजनेष्वात्यन्यिकेषु वा... ...?



स्तेयम्। तथा स्त्रीपुरुषसंयोगे परस्परलिंगसंयोगे शब्दस्पर्शरूपरसगन्धेषु यः संगव्युदासः श्रोत्राद्युपरतिरसंकल्पश्च मनसा उपरमति (मनस उपरतिः) [तद्] अष्टाङ्गब्रह्मचर्यम्। एवं ह्याह-संयोगशब्दस्पर्शरूपरसगन्धसंकल्पस्मृतिकामफलपरित्यागादष्टाङ्गं ब्रह्मचर्यमिति। तथा यद् भूतहितमत्यन्तं दृष्टंतश्रुतमिति अविज्ञातेष्वर्थेषु (दृष्टश्रुतानुमितिविज्ञातेष्वर्थेषु) यथान्तःकरणप्रायोपस्थितस्त[५२अ]थे(०प्रत्ययोपस्थितं तथै) वेन्द्रियाण्यविलुप्यन्ते तत्सत्यम्। एवं व्रह्मार्जितस्य(ह्यर्जन-)क्रयविक्रयकल्पनाभेदामुपादीनामारंभामुपरमते(०भेदानामुपादानादारंभादुपरमते) सोऽव्यवहारः। एवं पञ्च यमा भिक्षुव्रतान्युपव्याख्यातानि। तथाऽपराधिषु यः (या) क्षमाऽसौ [अ]क्रोधः। एवं य(या) रक्तिविरक्तानां गुरूणामञ्जसा वृत्तिः क्रियते परमात्यन्तिकी प्रत्युत्थानाभिवादनदानादिभिः सा गुरुशुश्रुषयते(०शुश्रूषा)। यद्वाह्यगन्धलेपानां मृद्भिरद्भिश्च क्रियते यश्चेन्द्रियाणामन्तःकरणोपरमतः [त]च्छौचम्। तथा यद् भैक्षार्जितेन हविषा प्राणयात्राऽऽध्यात्मिकस्याग्नेर्मन्त्रगृहीतेन होमः क[५२ब]र्त्तव्योऽहन्यहनि यि(य)शाशनार्थमेतदाहारलाघवम्। तेष्वेवाप्रमादो बौद्धयेन (बुध्येन or बोद्धव्येन ?)। चरित्रावस्थितस्य भिक्षोस्ते पञ्च नियमाः। एभिर्दश[यम]नियमैर्यः साध्यते स धर्म्मः। ज्ञानं द्विविधं वाह्यमभ्यन्तरं च। तत्र वाह्यं वोणावेणुश्च(०वेणु)गन्धर्व्वचित्रकथागणितव्याकरणादिशास्त्राणि। अभ्यन्तरं गुणपुरुषोपलब्धि[ः] ज्ञानम्, अन्ये गुणाः सत्त्वरजस्तमांसि, अन्य[ः] पुरुषः इति। वाह्येन ज्ञानेन लोकोत्पत्ति(लोकोपपत्ति ?)रभ्यन्तरेण मोक्ष इति। [*वैराग्यमपि द्विविधं वाह्यमभ्यन्तरं च। वाह्यं दृष्टविषयवैतृष्ण्यमर्जनादिदोषदर्शनाद्विरक्तस्य, मोक्षेप्सोर्यदुत्पद्यते तदभ्यन्तरं वैराग्यम्। अर्जनरक्षणक्षयात्तृप्तिहिंसादिदोषान्* ] दृष्ट्वा विषयेभ्यो विरक्तस्य मोक्षो नास्तीति, अभ्यन्तरेण ज्ञानेन(ज्ञान)पूर्व्वकेण वैराग्ये-[५३अ]ण मोक्षो भवति, वाह्येन संसार इति। ऐश्वर्यमैश्वर्यस्य (०मीश्वरस्य) भावः। तत्पुनरष्टविधं वाक्य(०क्ये) वर्ण्णयन्ति शिष्टा-

*Something like this is necessary here for completing the sense. See G and M.

स्तद्यथा अणिमा लघिममा (लघिमा) महिमा प्राप्तिः प्राक् (प्राकाम्य)-मीशित्वं वशित्वं यत्रकामावसाइ(यि)त्वमिति । अणिमेति सूक्ष्मे(क्ष्मो) भूत्वा आकाशं विचरति भवत्यदृश्यः । लघिमेति लघुत्वं भूत्वा (लघुभूत्वा or लघुत्वं गत्वा) वायुवदाकाशे विचरति । महिमेति त्रिषु लोकेष्वर्च्चितः ह्यने(सर्वै)र्मानितो भवन्ति(ति) । प्राप्तिरिति यं यं मनसि चिन्तयन्ति(ति) तं तं प्राप्नोति । प्राकाम्यमिति काम इच्छायां यावन्ति रूपाणीच्छन्ति(ति) तावन्ति निर्म्मिने(नो)ति । ईशित्वमिति सर्व्वजनतोऽस्या जगदीशा गणा प्रभुर्भवति स्ववर्गधिया विमलचिन्ते रमो भवति(?) । यत्र कामावसायित्वमिति ब्रह्मादिस्था[५३ब]ने यत्र यथा वस्तुमिच्छति तत्र तथा वसति । एतानि चत्वारि सात्त्विकानि रूपाणि बुद्धेः । यदा सत्त्वेन रजस्तमसी अभिभूते भवतस्तदा सत्त्वबली भवति पुरुषस्तदे(दै)व सात्त्विकान् [गुणान्] प्राप्नोतीति । किञ्चान्य[त्] तामसमस्माद्विपर्यस्तां(स्तम्) । तस्मात् सात्त्विकरूपाद्विपर्ययेण तामसस्वरूपं बुद्धेरधर्म्मज्ञानवैराग्यमैश्वर्यं (अधर्मोऽज्ञानमवैराग्यमनैश्वर्यं) चेति । तत्र(त्रा)धर्म्मो हिंसा स्तेयस(म)ब्रह्मचर्यमसत्यं व्यवहारः, क्रोधो गुरोरशुश्रूषा अशौचमनाहारः(र)लाघवं प्रमादश्चेति । अयं धर्माद्विपरीतो ह्यधर्मः । अज्ञानं प्रकृतिपुरुषयोरनुपलब्धिर्ध्याकरणादिशिल्पेषु चाभिनिवेश एतदज्ञानम् । अवैराग्यं विषयरागः प्रकृतिरागश्चेत्येतदवैराग्यम् । अनैश्वर्यम्—[५४अ] अणिमा न भवति । लघिमा न भवति । महिमा न भवति । ईप्सितानामर्थानामप्राप्तिरीप्सितमेवसित्वयत्रकामावसायित्वम् (orप्राकाम्यमनीशित्वमवशित्वमयत्रकामावसायित्वम्) । एतैश्चतुर्भिः सात्त्विकै रूपैश्चतुर्भि[स्] तामसै रूपैर्युक्ताया बुद्धेरहङ्कारो जायते ।

इदानीमहङ्कारस्य लक्षणं वक्ष्यामस्तदुच्यते ॥छा॥

अभिमानोऽहङ्कारस्तस्मा[द्] द्विविधः प्रवर्त्तते सर्गः ।
ऐन्द्री(द्रि)य एकादशकस्तन्मात्रकः पञ्चकश्चैव ॥२४॥

अभिमानोऽहङ्कार[:] । अहं शब्दे, अहं स्पर्शे, अहं रूपे, अहं रसे, अहं गन्धे, अहं विद्वान्, अहं स्प(द)र्शनीयो य इत्येवम(मा)-



ह्यभि[५४ब]म(मा)नलक्षणस्वा(श्चा ?)हङ्कारस्तस्मादभिमानलक्षणादहङ्कारा[द्] द्विविधे(धः) प्रवर्त्तते सर्गः । सर्ग इति सृष्टे[:] पर्यायवचनै(नम्) । कश्चासौ सर्ग इत्युच्यते । इ(ऐ)न्द्रिय एकादशकत(स्त)न्मात्रकं(कः) पञ्चकश्चैव । ऐन्द्रिय एकादशक इति श्रोत्रादीनि मनःपर्यन्तानि पूर्व्वव्याख्यातानि । तन्मात्राण्यपि शब्दादीनि गन्धपर्यन्तानि एवमहङ्कारादेकादशेन्द्रियाणि पञ्च-तन्मात्राण्युत्पन्नानि ।

अत्राह त्रिविधोऽहङ्कार उक्तस्तत्र कुतस्स्माद् [कतरस्माद्] अहङ्कारादिन्द्रियाद्यु(ण्यु)त्पद्यन्ते कतरस्मा[त्त]न्मात्राणीति । अत्रोच्यते ॥छा॥

सात्त्वि[५५अ]क एकादशक[:] प्रवर्त्तते वि(वै)कृताद[हं]कारात् ।
भूतादेस्तन्मात्र[:] स तामसस्तैजसादुभयम् ॥२५॥

सात्त्विक इति । [यदा] सत्त्वमुत्कटं भवत्यहङ्कारे, तेन [च] सत्त्वेन रजस्तमसो अभिभूते भवतस्तदा सात्त्विकोऽहङ्कार उच्यते । तस्य सात्त्विकस्य वैकृत इति पूर्व्वाचार्यैः संज्ञा कृता । स वैकृतिको भूत्वाऽहङ्कारः एकादशेन्द्रियाण्युत्पादयति । तस्मात् सात्त्विकान्येकादशेन्द्रियाणि विशुद्धानि स्वविषयग्रहणसमर्थानि भवति(न्ति) । तस्मादुच्यते सात्त्विक एकादशकः प्रवर्त्तते वैकृतिका-(वैकृता)दहङ्कारात् । अत्राह—तन्मा[त्र]सर्ग[:] कुत उत्पद्यते । अत्रोच्यते भूतादेस्तन्मात्रः । यदा *भूतादेस्तमो बहुलं च भवत्यहङ्कारे त(य)दाहङ्कारस्तेन तमसा सत्त्वरजसी अभिभवति तदा तामसोऽहङ्कार [५५ब] उच्यते । तस्य च तामसस्य भूतादिरिति पूर्वाचार्यैः संज्ञा कृता । स भूतावि(दि)र्भूता(तोऽ)हङ्कारः पञ्च तन्मात्राण्युत्पादयन्ति(ति) । तस्मादुच्यते भूतादेस्तन्मा[त्र] इति । किं चान्यत् ते(तै)जसादुभयम् । यदा राजस(रज) उत्कटं भवत्यहङ्कारे तदाऽहङ्कारः [एकादशेन्द्रियाणि] पञ्च तन्मात्राण्यु(णि चो)त्पादयन्ति(ति) । तेन स(च ?) रजसा सत्त्वतमसी अभिभूते

* भूतादेः is superfluous here.

भवतस्तदा राजसोऽहङ्कार उच्यते । तस्य च पूर्व्वाचार्यैः संज्ञा कृताः(ता) तैजस इति । तमेव च तैजससंसयं(तैजसं सहायं) गृह्णाति सात्त्विकोऽहङ्कारस्तस्मिन् कृता व्यक्ति (क्रियाशक्ति)-रस्तीति कृत्वा । सत्त्वं निःक्रि(निष्क्रि)यमेकाकि न शक्नोतीन्द्रियाण्युत्पादयितुम् । तेन तैजसेन कार्यासंयुक्ता न (क्रियासंयुक्तेन) सात्त्विकोऽहङ्कार इन्द्रियाण्युत्पादयन्ति(ति) । एवं तामसोऽहङ्कारस्तैजसं सहायं गृहीत्वा तन्मात्राण्युत्पादय[५६अ]ति । उत्पन्नानीन्द्रियाणि तन्मात्राणि च सात्त्विकाहङ्कारात्तामसाच्चेति ।

तत्र कानि बुद्धीन्द्रियाणि कानि कर्मेन्द्रियाणीत्यत्रोच्यते ॥छ॥

बुद्धीन्द्रियाणि श्रोत्रत्वक्चक्षु(क्षू)रसनानासिकाख्यानि ।
वाक्पाणिपादपायु(यू)पस्थाः कर्म्मेन्द्रियाण्याहुः ॥ २६ ॥

तत्र गो(श्रो)त्रादीनि बुद्धीन्द्रियाण्युच्यन्ते शब्दस्पर्शरूपरसगन्धानु(न्) बुद्ध्यन्त इति बुद्धीन्द्रियाणि । इन्द्रदेवतामि(नी)न्द्रियानि । इन्द्र इति विषयनाम, तत्प्रति द्रवन्तीतीन्द्रियाणि । [वाक्पाणि]पादपायूपस्थाः कर्मेन्द्रियाण्याहुः । [५६ब] कर्म कुर्व्वति(न्ति) कारयन्ति च कर्मेन्द्रियाणि । कर्मेन्द्रियाणां वृत्तिर्वाक्य-(वाक्) पदार्थ(पादपादार्ध)श्लोकानुच्चारयति, हस्तौ नानाविधव्यायामकर्म कुर्व्व(र्वा)ते, पादौ समविषमनिम्नोन्नतेषु भूप्रदेशेषु क्रामतः । पायुर्यथाभुक्तमाना(मन्ना)हारभुत्सृजति । उपस्थ आनन्दं करोति पुत्रमुत्पादयतीत्यर्थः । एवमेताः कर्म्मेन्द्रियाणां वृत्तयो व्याख्याताः ।

अत्राह मन इन्द्रियं तत्र (तत् ?) किंलक्षणम् । उच्यते ॥छ॥

उभयात्मकमत्र मनः संकल्पकमिन्द्रियं च साधर्म्यात् ।
गुणपरिणामविशेषान्नानात्वं वाभ(बाह्य)भेदाच्च ॥ २७ ॥

[५७अ] उभयात्मन(क)मत्र म[नः] । कर्मेन्द्रियेषु कर्मेन्द्रियं बुद्धीन्द्रियेषु बुद्धीन्द्रियम् । यथा देवदत्तो गोपालमध्ये स्थितो गोपालकत्वं करोति, ब्रह्ममध्ये स्थितो ब्रह्मत्वं करोति, मल्लमध्ये



स्थितो मल्लत्वं करोति । कस्मात्, यस्माद् बुद्धीन्द्रियाणां वृत्ति संकल्पयन्ति(ति)कर्म्मेन्द्रियाणां च तस्मादुभयात्मकं मनः । किं चान्यत्, इन्द्रियं [च] साधर्म्या[त्] । सहधर्म्मभावः साधर्म्यम् । यस्माद् बुद्धीन्द्रियाणि कर्मेन्द्रियाणि [च] सात्त्विकादहङ्कारादुत्पद्यन्ते मनोऽपि तस्मादेवोत्पद्यते तस्मादिन्द्रियं मनः । एवमेकादशेन्द्रियाणि सह वृत्तिभिर्व्याख्यातानि ।

अत्रोच्यते(अत्राह)-एतान्येकादशेन्द्रियाणि केन कृतानि पुरुषेणेश्वरेण आहोस्वित् स्वभावानेति ! कुत आशङ्का इति चेदिमान्ये[५७ब]कादशेन्द्रियाणि भिन्नान्येकादशेन्द्रियविषयग्राहकाणि भवन्ति । अत्रोच्यते* अचेतनं प्रधानं बुद्धिरप्यचेतनाऽहङ्कारोऽप्यचेतनो, नूनं चेतनेन पुरुषेण(णे)श्वरेण कृतानि स्वभा[वेन] वेति । अत्रोच्यते—इह साङ्ख्या (साङ्ख्ये or साङ्ख्यानां) पुरुषोऽप्यकारणं, स्वभावो नाम न कश्चित्पदार्थोऽस्तीत्यत्रोच्यते—गुणपरिणामविशेषान्नानात्वं बाह्यभेदाच्च । सत्त्वरजस्तमांसि त्रयो गुणास्ते यथा परिणमन्ति तस्माद्ग(द्गु)णपरिणामविशेषोत्पादिमा(ता)न्येकादशेन्द्रियाणि भिन्नानि । शब्दस्पर्शरूपरसगन्धा [पञ्चानां] वचनाद्गा(दा)नविहरणोत्सर्गानन्दास्तु+ पञ्चानां संकल्पकं च मनः, एवमेतान्येकादशेन्द्रियार्थिनि भिन्नानि । (०न्द्रियाणि तदर्थानि भिन्नाः) । तेषामेकादशानामिन्द्रियार्थाम(ना)मेकादशेन्द्रिया[णि] ग्राहकाणि भविष्यती(न्ती)ति ।

[५८अ] यदप्युक्तमचेतनानां गुणानां वृत्तिरयुक्तेति, तन्न । कस्मादिति चेत्तदुच्यते अचेतना[ना]मपि प्रवृत्तिर्दृष्टा । वक्ष्यहिति हि (वक्ष्यति हि) यथा "वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृतिरज्ञ(ज्ञ)स्येति" । [का. ५७] । तस्मादचेतना अपि गुणा एकादशेन्द्रिया(य)भावेन परिणमन्ति ।

अत्राह-गृह्णीमा(म)स्तावदेकादशेन्द्रियाण्यहङ्कारादुत्पन्नानीति । एतेषामिन्द्रियाणां यथास्थानेषु निक्षेपः केन कृतः । चक्षुरुच्चैः

*अत्रोच्यते is superfluous here.

+तु is meaningless here.

सन्निकृ(वि)ष्टं दूरादालोचने समर्थो(र्थं) भविष्यतीति । शिर[:]-प्रदेशे श्रोत्रं सन्निविष्टं दूराच्छ्रवणसमर्थं भविष्यतीति । त्वक् छ(श)रीराभ्यन्तरे बहिस्वा(श्च) संनिविष्टा नानास्पर्शग्रहणसमर्था भ[५८ब]विष्यतीति । नासिका घ्राणं(णे) संनिविष्टा नानागन्धग्रहण-समर्था भविष्यतीति । वागत(न्त)मुखे सन्निविष्टा पदवाक्य-श्लोकानामुच्चारणं करिष्यत्येवमिन्द्रियाणां सर्व्वेषां निक्षेपः पुरुषेण वा कृत ईश्वरेण वा स्वभावने (०वेन) वेति । अत्रोच्यते–इह सांख्ये पुरुषोऽप्यकारण[म्], ईश्वरोऽप्यकारणं, स्वभावे(वो) नाम न कश्चित् पदार्थोऽस्तीति । किं तर्ह्यहङ्कारस्थैः सत्त्वरजस्तमोभि[:] त्रि[भिः] गुणैर्निक्षेपः कृ[तः]। तस्माद् ब्रूमो 'गुणपरिणामविशेषा-न्नानात्वं बाह्यभेदाच्च'। गुणपरिणामविशेषा[द्] इन्द्रियाणामेका-दशानां भेदो बाह्यभेदाच्च। बाह्यनेका(बाह्या एका)दशेन्द्रियार्थास्तेषां भेदात् [५९अ] इन्द्रियाणामपि भेदः ।

अत्राह –[का] कस्य वृत्तिरत्रोच्यते ॥ छ ॥

रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्ति[:] ।
वचनादानविहरणोत्सर्गानन्दास्तु पञ्चानाम् ॥ २८ ॥

रूपादिषु रूपरसगन्धस्पर्शशब्देषु पञ्चानां चक्षुरादीनामिन्द्रि-याणां वृत्तिरिष्यते । मात्रग्रहणं च [विशेषार्थम्] चक्षु(क्षू) रूपं पश्यत्यादानसमर्था (र्थं) न भवत्येवं शेषाण्यपि स्वं स्वं विषयं गृह्णन्ति न चा[न्य]ज्ञाने समर्थानि भवन्ति । बुद्धीन्द्रियैः प्रकाशित-मर्थं कर्मेन्द्रियाण्यारभन्ते । वाचो (वदच)नं विषयः आवानं (आदानं) हस्तविषयो, विहरणं पादयो[:], उत्सर्गः पायो[:], आनन्द उपस्थस्य ।

अतः उर्ध्वं बुद्ध्यहङ्कारमनसां वृत्तिं व्याख्यास्यामस्तदु-च्यते ॥ छ ॥

स्वालक्षण्या(ण्यं) वृत्तिस्त्रयस्य सैषा भवं(व)त्यसामान्यः(न्या) ।
सा[५९]बमान्यकरणवृत्ति[:] प्राणाद्यां(द्या) वायवः पञ्च ॥ २९ ॥

स्वालक्षण्यमिति । बुद्धिरध्यवसाय उक्तः प्रोक्तस्य व्यव-सायो (प्राक् तस्या अध्यवसायो) वृत्तिः । अभिमानोऽहङ्कारस्ये-



त्युक्तं (० ङ्कार [का. २४] इत्युक्तं) तस्याभिमान एव वृत्तिकर्म्मणः (वृत्तिः । मनः) संकल्पकमित्युक्तं [का. २७] तस्य संकल्प एव वृत्तिः । या बुद्धीन्द्रियाणां तस्य (न सा) कर्मेन्द्रियाणां, यः (या) कर्मेन्द्रियाणाम् न सा बुद्धीन्द्रियाणाम् । बुद्ध्यहङ्कारमनसां वृत्ति-रभिहिता । मध्योत्सामान्या(साऽप्यसामान्या) । अध्यवसायो बुद्धेरेव, अभिमानोऽहङ्कारस्य, संकल्पो मनसः । तस्मादुक्तं शे(सै)षा भवन्त्य(त्य)सामान्येति ।

अत्राह––निःसामान्येत्युक्तो(क्ते)ऽर्थाद्गम्यते सामान्यवृत्ति-रस्तीति । एवमिन्द्रियाणामसामान्यवृत्तिराख्याता कुलस्त्रीसंस्था-नीया । अतः ऊर्ध्वं सामान्यवृत्तिं ब्रूहि । तदुच्यते––सामान्य-करणा(ण)वृत्तिः [६०अ] प्राणाद्या वायवः पञ्च । सामान्य-करणवृत्ति[:] समस्तस्यान्तः करणग्रामस्येत्यर्थः । प्राणाद्या वायवः पञ्च प्राणापानसमानोदानव्यान(ना)श्चेति ते सर्व्वेषामिन्द्रियाणां सामान्यवृत्तिं कुर्व्वन्ति । तत्र प्राणो नाम प्रणयतान् (प्राणनात्)। प्राणो यो मुखनासिकान्ता[त्] निश्चरति बाह्ये त्वास्या विषये वृत्तिरेव प्राण इत्यभिधीयते । अस्मिन् प्राणे यत् स्पन्दनकर्म्म तत् केन प्रकृति(कृत)मित्यत्रोच्यते त्रयोदशविधेन करणेन कृतम् । यतश्चैवं तस्मात् प्राणकर्म्म सर्वस्य करणग्रामस्य सामा-न्यवृत्तिरिति । अपि चात्र दृष्टान्तः––कस्मिश्चिद् राजगृहे पञ्जरे शुकाः प्रतिवसन्ति । तेभ्यो [६०ब] देवदत्तेन ओदनो दर्शिता(त)-स्ते ओदनं दृष्ट्वा सर्व्वे प्रचलिता यदा तदा पञ्जरमपि चलितम्। यत्तत् पञ्जरस्य प्रचलनकर्म्म तत् सर्वेषां शुकानां सामान्यम् । तद्वान् (तद्वत्) प्राणे यत् स्पन्दनकर्म तत् सर्व्वेषामिन्द्रियाणां सामान्यम् । किं चान्यद् अपादा(अपा)नेनोत्सृजति । कुतश्चिद् पक्रमे(म)णादपादान(०दपान) इत्युच्यते । अपादान(अपान)बहुलश्च देवदत्तः सर्वो(र्पं) दृष्ट्वाऽपसर्पन्ति(ति)। एषोऽपानः । तस्मिन्न-पाने यत् स्पन्दनकर्म तत् सर्व्वेषामिन्द्रियाणां सामान्यवृत्ति[:]। आरोहणे दर्पोत्कर्षो (आरोहणादर्थोत्कर्षे ?) उपा(दा)न इत्यभि-धीयते। नाभिप्रदेशादुत्थितं गच्छति । अस्मिन्नुदाने यत् स्पन्दन-कर्म तत् सर्व्वेषामिन्द्रियाणां सामान्यवृत्ति[:] । उदा[६१अ] न-

बहुलश्च देवदत्तोत्कर्षमानन्दो (देवदत्त आनन्दोत्कर्षं) मृगयति । अहमाद्यो(ढ्यो)ऽस्मादाद्यन्तर(०दाढ्यतर) इति* कथं स्याम्ये(मि) त्येष उदान[ः] । किञ्चान्यत्र(त्), हृद्यवस्थानं सहभावश्च तेन समान इत्यभिधीयते । यो वायुवृन्देसे (०र्हृद्देशे) वर्त्तते स समानः । समानबहुलश्च देवदत्त एकाकी न रमते एष समानः । तस्मिन् सामान्ये (समाने) यत् स्पन्दनकर्म्म तत् सर्व्वेषामिन्द्रियाणां सामान्यवृत्तिः । कि चान्यत्-शरीरव्यापितया व्यान इत्युच्यते । आनखदन्तकेशान्ताद्याशरीरा (आनखादाकेशान्तं यो शरीरं) व्यापयति (व्याप्य अनति ?) स व्यानः । व्यानबहुलश्च देवदत्तोऽत्यन्तमन्येन विना न रमति(ते) मृगवत् । तस्मिन्व्याने यत् कर्म्मस्पन्दनं (स्पन्दनकर्म्म) तत् सर्व्वेषामिन्द्रियाणां सामान्यवृत्तिः । तदेवं तावत् सामान्यं[६१ब] वृत्ति(सामान्यकरणवृत्तिः) प्रमाण्या·(प्राणा)द्या वायवो व्याख्याताः ।

वृत्तिं व्याख्यास्यामः । तदुच्यते ॥छ॥

युगपच्चतुष्टयस्य [तु] वृत्तिः क्रमशश्च तस्य निर्दिष्टा ।
दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्व्विका वृत्तिः ॥३०॥

बुद्धिरहङ्कारो मनश्चक्षुनि(रि)त्येतानि चत्वारि युगपद् रूपं पश्यन्ति । अयं स्थाणुरयं पुरुष इति । बुद्धिरहङ्कारो मनः त्विति·(त्वगिति) चतुष्टयं युगपत् स्पर्शा(र्शं) गृह्णाति । बुद्धिरहङ्कारो मनो जिह्वेति चतुष्टयं युगपद् रसं गृह्णाति । बुद्धिरहङ्कारो मनो घ्राणमिति [चतुष्टयं] युगपद् गन्धं गृह्णाति । बुद्धिरहङ्कारो मनः श्रोत्रमिच्छति(श्रोत्रमिति) [चतुष्टयं] युगपच्छब्दं गृह्णाति । एवमेषां युगपच्चतुष्टयस्य तु वृत्तिः । किञ्चान्यत् क्रमशश्च तस्य निर्दिष्टा । बुद्ध्य[६२अ]हङ्कारमन[ः]श्रोत्रचतुष्टयस्य क्रमशो वृत्तिर्भवति द्वारिद्वारविभागोपदेशात् । ह्रस्वकालत्वाद्विभागो न शक्यते वक्तुं ततो युगपदित्युच्यते । यथोप(त्प)लपत्रशतं युगपत् सूच्यग्रेण ब(वि)द्धमिति । तद्यथा देवदत्तः पन्थानं गच्छन् स्थाणुं पश्यति तत्र तस्य संशयो भवति किमयं स्थाणुरयं पुरुष इति । तत्र

* इति is superfluous.



स्थाणुरूपं पश्यति शकुनिं च तत्रस्था(स्थं) ततोऽस्य बुद्धिर्भवति स्थाणुरयमिति । अथवाऽऽकुञ्चनप्रसारेण(रणे) पश्यति ततोऽस्य बुद्धिर्भवति पुरुषोऽयमिति । एवं बुद्ध्यहङ्कारमनश्चक्षुषां क्रम-[६२ब]शो वृत्तिं दृष्ट्वा (वृत्तिर्दृष्टा)-चक्षु(क्षू) रूपं पश्यति, मनः संकल्पयति, अहङ्कारोऽभिमानयति, बुद्धिरध्यवस(स्य)ति । एवं रसनादिव्य(ष्व)पि बोद्धव्यम । किञ्चान्य[त्], दृष्टे [तथाप्यदृष्टे त्र]यस्य तत्पूर्व्विका प्रातः (वृत्तिः) । शब्दो(दे) श्रोत्रपूर्व्विका स्पर्शो(र्शे) त्वक्पूर्व्विका (रूपे चक्षुःपूर्व्विका) रसेति (रसे) जिह्व(ह्वा)पूर्व्विका गन्धश्च (गन्धे च) नासिकापूर्व्विकेति [वृत्तिः] बुद्ध्यहङ्कारमनसानि[मि]ति ।

अत्राह-अचेतनानीन्द्रियाणि बुद्धिरहङ्कारो मनश्चेति, केन हेतुना स्वां स्वां वृत्तिं प्रतिपद्यन्त इत्यत्रोच्यते ॥छ॥

स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां[कीं] वृत्तिम् ।
पुरुषार्थ एव हेतु न(र्न) केनचित् कार्यते कर[६३अ]णम् ॥३१॥

स्वां स्वामिति वीप्सा प्राप्तुमिच्छतीति त्रयोदशविधस्य करणस्य ग्रहणं कृतं भवति । प्रतिपद्यन्ते गृह्णन्त इत्यर्थः । किञ्चान्यत्, परस्पराकूतहेतुकीं वृत्तिं । बुद्धेराकूतः(तं) ज्ञात्वाऽहङ्कारोऽभिमानयति, तमः (मनः) संकल्पयति इन्द्रियानि(णि) स्वां स्वां वृत्तिं प्रतिपद्यन्ते । आकूतं नामाभिप्रायः । यथा किं(किल) चौरसेना ग्रामां(मं) हेतु (हन्तुं) गच्छति । तत्र चौरसेनापति[ना] समवायः(समयः) कृ(कृ)तो यदि हा हि ब्रवीमि तत् प्रवेष्टव्यम् । अहो हेति (हा इति) क्रमितं निर्गच्छम् (निर्गन्तव्यम्), इत्येवं चौरसेनापतेराकूतं ज्ञात्वा चौराः प्रविशन्ति निर्गच्छन्ति च । तथात्राह (तथेह) चौरसेनापतिसंस्थानीया बुद्धि[ः], चौरसेनासंस्थानीयानीन्द्रियाणि ।

अत्राह-एतनी(एतानी)न्द्रिया[६३ ब]णि कै(किं) स्वार्थं विषयं प्रतिपद्यन्ते आहोस्वित् परार्थमिति । अत्रोच्यते परार्थं गम्यते । यस्मादाह पुरुषार्थ एव हेतुः पुरुषार्थ[ः] कर्तव्यमिति (०व्य इति) गुणानां वृद्धि(त्तिः) । तस्मादेत[त्] त्रयोदशविधं

करणं पुरुषार्थो(र्थं) प्रवर्त्तत इति । [यदप्युक्तम् अचेतनानि करणानि कथं प्रवर्त्तन्त इति] तद् ब्रूमो न केनचित् कार्यते करणम् । नैश्वरेणापि (नेश्वरेण नापि) पुरुषेण । स्वभावो नाम नेक(नैव) कश्चित्पदार्थोऽस्तीति स्वयमेव त्रयोदशविधं स्वे स्वे विषये करणं प्रवर्त्तते इति ।

अत्राह—उक्तं भगवता न नेक (केन) चित् कार्यते करणमिति । तत् कतिविधं करणमिति अत्रोच्यते ॥ छ ॥

करणं त्रयोदशविधं तदाग्रहण(तदाहरण)धारणप्रकाशकरम् ।
कार्यं च तस्य दशधाऽऽहार्यम(०हार्यं) धार्यं प्रकाश्यं च ॥३२॥

यदत्र करणमित्युक्तं तत् त्रयो ·[६४ अ]दश[विध]मिति बोद्धव्यम् । [पञ्च बुद्धीन्द्रियाणि] पञ्च कर्मेन्द्रियाणि बुद्धिरहङ्कारो मन इति एतत्त्रयोदशविधं करणमिति । अत्राह–एतत् त्रयोदशविधं करणं किं करोतीति । अत्रोच्यते—अद्य( एतद् ? ) आहारकं धारकं प्रकाशकं च । अत्राहारकमिन्द्रियलक्षणं धारकमभिधा(मा)नलक्षणं प्रकाशकं बुद्धिलक्षणम् । अत्राह किं तदस्ति यस्याहरणं धारणं प्रकाशकं(नं) च क्रियते । अत्रोच्यते–कार्यं च तस्य दशधाऽऽहार्यं [धार्यं] प्रकाश्यं च । शब्दस्पर्शरूपरसगन्ध(न्धाः) पञ्च वचनादानविहरणोत्सर्गानन्दादिस्तु(०न्दाश्च ?) पञ्च एते दश विषयाः कार्यमित्युच्यते । तं दशविधं विषयं बुद्धीन्द्रियैः प्रकाशितमर्थं कर्मेन्द्रियाण्याहरन्ति धरन्ति (धारयन्ति) च । तद्यथा तम[ः]स्थितं घटं दीपेन प्रकाशितं हस्त आदत्ते [ ६४ ब] धारयति [च] तदेवं यथा घटं तथा शेषाण्यपि ।

अत्रा [ह]–काण्णींया[कानीन्द्रियाणि] त्रिकालविषयग्राहकाणि कानीन्द्रियाणि सांप्रतं(त)कालविषयग्राहकाणि । अत्रोच्यते ॥ छ ॥

अन्तःकरणं त्रिविधं दशधा [बा]न्य(ह्यं) त्रयस्य विषयाख्यम् ।
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥३३॥



अन्तःकरणं त्रिविधम् । बुद्ध्यहङ्कारमनसां ग्रहणम्, एतत् त्रिविधमन्तःकरणं संज्ञितम् । दशधा बाह्यं [पञ्च बुद्धीन्द्रियाणि] पञ्च कर्मेन्द्रियाणि दशविधं करणमिति । किञ्चान्यत्, त्रयस्य विषयाष्य(ख्य)म् । बुद्ध्यहङ्कारमनसां त्रयाणामन्तःकरणानां बाह्यं दशविधं करणं विषयाख्यम्, विषयोपभोग्यम् (विषय उपभोग्यम् ?) । अभ्यन्तरत्रिकं स्वामिभूतं, बाह्यदशविधं भृत्यभूतमित्यर्थः । किञ्चान्यत्, सांप्रतकालं बाह्यम् । यदेतद् बाह्यं दशविधं करणमुद्दिष्टं पञ्च [६५अ] बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि सांप्रतकालविषयग्राहकानि(णि) भवन्ति । श्रोत्रं हि वर्तमानमेव शब्दं गृह्णाति, नातीतमनागतं वा । त्वगपि वर्त्तमानमेव स्पर्शं गृह्णाति, नातीतमनागतं वा । चक्षुरपि वर्त्तमान[मेव] रूपं गृह्णाति, नातीतमनागतं वा । जिह्वाऽपि वर्त्तमानमेव रसं गृह्णाति, नातीतं(त)मनागतं वा । घ्राणमेव(०मपि) वर्त्तमानमेव गन्धं गृह्णाति, नातीतमनागतं वा । वागपि वर्त्तमानमेव वचनं गृह्णाति, नातीतमनागतं वा । पाणिरपि वर्त्तमानमेव घटं गृह्णाति, नातीत[६५ब]मनागतं वा । पाद(दा)वपि वर्त्तमानमेव विहरणं गृह्णीतः, नातीतमनागतं वा । वा(पा)युरपि वर्त्तमानमेवोत्सर्गं गृह्णाति, नां(ना)तीतमनागतं वा । उपस्थोऽपि वर्त्तमानमेव[वा]नन्दं गृह्णाति, नां(ना)तीतमनागतं वा । किंचान्यत्, त्रिकालमाभ्यन्तरं करणम् । बुद्ध्यहङ्कारमनांसि त्रिकालविषयोणि । बुद्धिव(र्व)र्तमानमपि घटं गृह्णाति अतीतमपि, तद्यथा युवि(धि)[ष्ठ]रभीमसेनावास्ताम् । अनागतमपि गृह्णाति, यथा भविष्यन्ति गुणस्यन्ते गुडं कथायवासशक्तक्लीबराजा भविष्यति (गुणस्यान्ते गुडकथाः, यथा वा अशक्तक्लीबराजा भविष्यति ? or भविष्यति गुणस्यान्ते गुडः, कषायवासःसक्तक्लीबराजा भविष्यति ?) । एवमहंकारो वर्त्तमाने विषयि(येऽ)भिमानं करोति यथाहमस्मिन् गृहे प्रभुरिति यथा वासं तथा भविष्यतीति (०ष्यामीति) । एवं मनोऽपि वर्त्तमानं विषयं विकल्पयति अयमेव विषय इति । [अतीतमपि–आसन्मे विषयाः ।] अनागतमपि संकल्पयति भविष्यन्ति मे विषयाः । तस्मादुच्यते–त्रिकालमाभ्यन्तरं करणम् ।

अत्राह-कानीन्द्रियाणि सविशेषे(षं) वि[६६अ]षयं गृह्णन्ति कानि निर्विशेषं गृह्णन्तीति । अत्रोच्यते ॥छ॥

बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयीणि ।
वाग्भवति शब्दविषया शेषाण्यपि पञ्चविषयीणि ॥३४॥

तेषाम् करणानाम् । येषामयमधिकारो वर्त्तते तेषां यानि बुद्धीन्द्रिया[णि] श्रात्रत्वक्चक्षुजि(र्जि)ह्वाघ्राणानि पञ्चैतानि सविशेषं विषयं गृह्णन्ति, [निर्व्विशेषमपि विषयं गृह्णन्ति]। अत्राह-कस्य सविशेषं विषयं गृह्णन्ति कस्य निर्व्विशेषमिति । अत्रोच्यते-शब्दस्पर्शरूपरसगन्धा पञ्च देवानां तन्मात्रसंज्ञिता निर्वि(र्वि)शेषात्(षाः) । कस्मात्, सुखलक्षणत्वात् । यस्मा[द्] दुःखमोहो(हौ) न स्तस्तस्मान्निर्व्विशेषो(षा) इति । मनुष्याणां त एव शब्दस्पर्शरूपरसगन्धाः सविशेषाः सुखदुःखमोहयुक्ता इत्यर्थः । देवानां बुद्धी[६६ब]न्द्रियाणि निर्व्विशेषं विषयं प्रकाशयति(न्ति) । [उक्तानि] बुद्धीन्द्रियाणि । कर्मेन्द्रियाणि वक्ष्यामः । वाग्भवति शब्दबिषयात्शेखा(०शेषा)ण्यपि पञ्चविषया(यी)णि । तत्र देवानां वाक्यपदार्द्ध (वाक्पादपादार्द्ध)श्लोकानुच्चारयति । अस्माकमपि तथैव । तथा देवानामस्माकं च वागिन्द्रियं तुल्यम् । किञ्चान्यत्, शेषाण्यपि पञ्चविषया(यी)णि । कान्यस्मिन् शेषाणि, पादावाप्त(पाणिपादपायू)पस्था एतानि चत्वारि शेषाणि पञ्चविषयीणि । तेषां चतुर्ण्णामेकैकं पञ्चविषयम् । पाणिस्तावच्छब्दस्पर्शरूपरसगन्धयुक्ता:(क्तः)। पाणिस्तस्मिन् (पाणौ तस्मिन् ?) पञ्चलक्षणमेव पाणीन्द्रियं संनिविष्टं पञ्चलक्षणं घटं गृह्णाति । तस्मात् पञ्चलक्षणं हस्तेन्द्रियम् । किञ्चान्यत्, शब्दस्पर्शरूपरसगंधसंयुक्तः [६७अ] पादस्मिन् (पादः) । तस्मिन् पञ्चलक्षणमेव पादेन्द्रियं सन्निविष्टं पञ्चलक्षणायां पृथि[व्यां] प्रहरणं (विहरणं ? ) गृह्णाति (करोति?)। तस्मात् पञ्चलक्षणः पादः । किञ्चान्यत्, शब्दस्पर्शरूपरसगन्धसंयुक्तः युक्ता+ पायू(यु)प्रदेशस्तस्मिन् पञ्चलक्षणमेव पाश्वें(य्वि)न्द्रियं संनिविष्टं पञ्चलक्षणां चा(वि)ष्टासु(मु)सृ(त्सृ)जति (विष्टामुत्सृजति) [तस्मात् पञ्चलक्षणः पायुः] । किञ्चान्यत्,

+ युक्ता is superfluous.



शब्दस्पर्शरूपरसगन्धसंयुक्त उपस्थप्रदेशस्तस्मिन् पञ्चलक्षणमेवोपस्थेन्द्रियं सन्निविष्टं पञ्चलक्षणमेव शुक्रमुत्सृजति तस्मात् पञ्चलक्षण एवोपस्थ उच्यते । [एवं] चत्वारि पाणि[पाद]पायूपस्थाः कर्मेन्दियाणि पञ्च विषयान् गृह्णन्ति । तस्मादुच्यते शेषाण्यपि पञ्चविषयीणि । वाचं मुक्त्वा चत्वारि पञ्चविषयीणि भवन्ति ।

किञ्चान्यद् बुद्धिविषयख्यापनार्थमिदमुच्यते ॥छ॥

सान्तःकरणा बुद्धि[ः]सर्व्वं वि[६७ब]षयमवगाहते यस्मात् ।
तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥३५॥

अन्तःकरणे अन्तःकरणमहङ्कारोऽन्तःकरणं मनो, द्वाभ्यां सह वर्त्तते बुद्धिस्तस्मात् सान्तःकरणा भवति । सर्वं विषयमवगाहते । सर्व्वं(र्व्वं) निरवशेषमित्यर्थः । त्रिष्वपि कालेषु यो विषयस्तं विषयमवगाहते । कश्चासौ विषया(यः) । शब्दस्पर्श[रूप]रसगन्धलक्षणमवगाहते गृह्णातीत्यर्थः । तस्मा[त्] त्रिविधं करणं द्वारि द्वाराणि शेषाणि । अथ कानि पुनस्तानि द्वाराणि तदुच्यते शेषाणि पञ्च बुद्धीन्द्रियाणि [पञ्च कर्म्मेन्द्रियाणि च] । एभिर्दशभिर्द्वारैः सान्त[ः]करणा बुद्धिस्त्रिष्वपि कालेषु यो विषयस्ता(स्तं) विषयं गृह्णातीत्यर्थः ।

किञ्चान्यत् ॥छ॥

एते [६८अ] प्रदीपकल्पा[ः] परस्परविलक्षणा गुणविशेषाः ।
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥३६॥

एते इति पञ्च बुद्धीन्द्रियाणि पञ्च कर्म्मेन्द्रियाणि बुद्धिरहङ्कारो मन इति । प्रदीपकल्पः(ल्पाः) । 'कल्प' शब्द उपमायाः(याम्) । प्रदीपेन तुल्याः प्रदीपकल्पाः । यथा प्रदीपवः (प्रदीपः) गृहे कृतः घटादीन् प्रकाशयति, एवमेवेन्द्रियगुणास्त्रिगुणास्त्रिष्वपि कालेषु यो विषयस्तं प्रका[श]यति(न्ति) क(त)स्मात् प्रदीपकल्पाः । किञ्चान्यत्, परस्परविलक्षणाः परस्परभिन्नलक्षणा [वि]सदृशा इत्यर्थः । श्रोत्रं शब्दं गृह्णाति न स्पर्शादीन् । त्वगपि स्पर्शं गृह्णाति न शब्दादीन् । चक्षुरपि रूपं गृह्णाति न स्पर्शादीन् । जिह्वापि

रसं गृह्णाति न रूपादीन् । घ्राणमपि गन्धं गृह्णाति न रसादीन् । एवं कर्म्मेन्द्रियाण्यपि । वाग् वचने व्यवस्थिता, [६८ब] पाणि[ः] आदाने, पादो विहरणं(णे), पायुरुत्सर्गे, उपस्थ आनन्दे; बुद्धिरध्यवसाये, अहङ्कारोऽभिमाने, मन[ः] संकल्पैः(पे) । यस्मात् स्वं स्वं विषयं गृह्णन्ति तस्मात् परस्परविलक्षणाः । बुद्धीन्द्रियाणि कर्मेन्द्रियाणि मनश्चाहङ्कारश्च [स्वं स्वं विषयं प्रकाश्य] बुद्धौ निक्षिपन्ति । बुद्धिस्थं विषयं [पुरुषः] गृह्णाति । तस्मात् परस्परविलक्षणा बुद्धीन् विषयं सुखदुःखान् कापुरुष उपलभते (तस्मात् परस्परविलक्षणं बुद्धिस्थं विषयं सुखदुःखाद्यं कृत्स्नं पुरुष उपलभते ?) ।

किञ्चान्यत् ॥छ॥

सर्व्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः ।
सैव च विशिनष्टि पुन[ः] प्रधानपुरुषान्तरः(रं) सूक्ष्मम् ॥३७॥

सर्व्वमिति निरवशेषमि[६९अ]त्यर्थः । त्रिष्वपि कालेषु यो विषयस्तं प्रत्युपभोगम् । प्रतिपत्ति[ः] उपभोग[ः] [तं तं प्रति] प्रत्युपभोगम् । देवलोके या(य) उपभोगो मनुष्यलय(मनुष्यलोके य) उपभोगस्तिर्यग्योनौ य उपभोगस्तत(०स्तं) प्रत्युपभोगं कर्मेन्द्रियाणि बुद्धीन्द्रियाणि प्रकाश(श्य) बुद्ध्यै प्रयच्छन्ति । बुद्धिरपि पुरुषाय प्रयच्छति । को दृष्टान्तः । राज्ञिमन्त्रवत् (राजमन्त्रिवत्) । यथा मंत्री सर्व्वेषां भृत्यानामुपलब्धिं कृत्वा राजनि वेदयति, एवं कर्मेन्द्रियाणि [बुद्धीन्द्रियाणि] प्रकाश्य बुद्ध्यै प्रयच्छन्ति, बुद्धिरपि पुरुषाय प्रयच्छति । अनेन प्रकारेणैव बुद्धिरभ्युदयफलेन योजयति पुरुषस्य यावानो(यावन्नो)त्पद्यते ज्ञानम् ।

किञ्चान्यत् , सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् । सैव च खलु बुद्धिर्विशिनष्टि विशेषयति विभागं करोतीत्यर्थः । को विभागः प्रधा[६९ब]नपुरुषान्तरं सूक्ष्मम् । प्रधानपुरुषयोरन्तरं नानात्वमित्यर्थः । सूक्ष्ममिति दुर्विज्ञेयमित्यर्थः । अकृतपुण्यचरणैर्न प्राप्यं प्रधानं(न)पुरुषयोर्न्नानात्वम् । तयोरन्तरं बुद्धिर्दर्शयति । त्वमन्या आ(त्वमन्यमा)त्मानं न वेत्सि, प्रधानमन्यत् । सत्त्वरजस्तमांसि त्रयो गुणाः प्राधानिक(काः) ।



अन्या बुद्धिरन्योऽहङ्कारः पञ्च तन्मात्राण्यन्यानि एकादशेन्द्रियाण्यन्यानि पञ्चभूतान्यन्यानि । एवं शारीरोऽप्यन्यः पुरुषोऽप्यन्य इति बुद्ध्य(द्ध्वा) तत्त्वानि मोक्षं गच्छति । उक्तं च-
पञ्चविंशतितत्त्वज्ञे(ज्ञो) मोक्षं गच्छन्ति(ति) ।

हस पिब लन(ल) खाद मोद विषयानुपजीव मा न(च)
कुरुतः (कुरु) शङ्काम् ।
यदि विदितं कपिलमतं प्राप्स्यसि सौक्षं(ख्यं) च मोक्षं च ॥

अत्राह-उक्तं भगवता पूर्वस्यामार्यायां विशेषाविशेषविषयी[णी]न्द्रियाणि । तत्र के विशेषात्(षाः) केऽविशेषा इत्यत्रोच्यते ॥छ॥

य(त)न्मात्राण्यविशेषा[७०अ]स्तेभ्यो भूतानि पञ्च पञ्चभ्यः ।
एते स्मृता व(वि)शेषाः स(शा)न्तो(न्ता) घोर(रा)श्च मूढ(ढा)श्च ॥३८॥

यानि तानि तन्मात्राण्यहङ्कारादुत्पन्नान(नि) वि (वै?) शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रं चेति अविशेषा [इ]त्युच्यते(न्ते) देवानां तन्मात्रसुखलक्षणा (तन्मात्राणि सुखलक्षणा ?) विषयाः । त्रयापि (तत्रापि) रजस्तमसो स्तः । किन्तु सत्त्वमुत्कटत्वेन वर्त्तते तस्मादविशेषा इत्युच्यते(न्ते) । अत्राह-के विशेषाः । अत्रोच्यते । तेभ्यो भूतानि पञ्च पञ्चभ्यः। शब्दस्त(त)न्मात्रादाकाशं स्पर्शतन्मात्राद्वायुः रूपतन्मात्रं(त्रात्) तेजः रसतन्मात्रादापः गन्धतन्मात्रा[त्] पृथ्वी । एते [स्मृता] विशेषा इति । अत्राह-एतेषां विशेषाणां कि(किं) लक्षया(ण)मिति । अत्रोच्यते-एतानि पञ्च महाभूतानि मनुष्याणां विषयाः । शान्ताः घोराश्च मूढाः(ढाश्च) । तत्राकाशं शान्तं [७०ब] घोरं मूढं च । [शान्तं] तावत् सुखलक्षणम् । यथा कश्चिद्देवदत्तः प्रस्विन्नो गर्भगृहान्निष्क्रम्य(म्या)काशं गतः । स आकाशं प्राप्य सुखिनो(तो) भवति । एवमाकाशं सत(शान्तम्) । तदेवाकाशं वायुनोष्णो(ष्णे)न शीतेन वा संयुक्तं दुःखं जनयति । तदा घोरमित्युच्यते । तदेवाकाशं मूढं भवति । यो वा कस्मिन् (कश्चित्) पन्थानं गच्छत(न्) ग्रामं नगरं वा न पश्यति आकाशमेव

पश्यति ततो (तृस्य ?) मोहं जनयति । [एवं वायो त्रैविध्यम् ।] यथा कश्चिद् देवदत्तो गर्भं गृहो अश्विनो(गर्भगृहे प्रस्विन्नो) वातायनं प्राप्य वायुना स्पृष्टः सुखिनो(तो) भवति । तेनैव वायुना प्रभूतोष्ण(ष्ण)मिश्रेण संस्पृष्टो दुःखिनो(तो) भवति । स एव वायुः शीतकाले मोहं जनयति । +पूर्व्वापरां दिशां भो जनयति+ य(त)थाऽग्निः हेमन्तकाले सुखं जनयति ग्रीष्मकाले स एवाग्नि-र्घर्म्मार्त्तस्य दुःखं जनयति । स ए[७१अ]वातिप्रवृद्धो ग्राम-दाहो(हे) मोहं जनयति । एवमापो ग्रीष्मकाले घर्मार्तस्य सुखं जन-यति(न्ति) हेमन्तकाले दुःखं जनयति(न्ति) [ताः एव समुद्रमध्य-गतस्य पूर्वापरां दिशामपश्यतः मोहं जनयन्ति ।] तथा पृथ्वी तवव(नव)शाद्वलोपचिता प्रावृट्काले सुखं जनयन्ति(ति) । सैवो-ष्णेनातितप्ता ग्रीष्मकाले दुःखं जनयति । सैव पथिकस्य ग्राम-मपश्यतो मोहं जनयति । एवं देवानां निर्व्विशेषा विषया[:] तन्मात्र-संज्ञिताः सुखलक्षणा एव, मनुष्याणां भौतिका विषयाः सुखदुःख-मोहलक्षणा इत्यर्थः ।

अत्राह—किमेतावन्तः एवं(व) विषयाः । अत्रोच्यते । अन्येऽपि सन्ति । के पुनः इति । तदुच्यते ॥छ॥

सूक्ष्मा मातापितृयाः(जाः) सह प्रभूतैस्त्रिधा विशेषाः स्युः ।
सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते ॥३९॥

अत्र सूक्ष्मास्तावत् पञ्चतन्मात्रिकास्तैः सूक्ष्मशरीराणि त्रया-णामपि लोकानामा[७१ब]दिसर्गे प्रारब्धानि । तत्र सूक्ष्मशरीरस्य सृणुकाले (सूक्ष्मशरीरमृतुकाले) मातुरुदरं [प्रविशति] । मातु(तु) रुधिरं पितुः शुक्रं तत्सूक्ष्मशरीरस्योपचयं करोति । मातुरशित-पीतअन्नरसं (०पीतान्नरसो) मातुर्नाडीसंबन्धे[न] प्रविश्य तस्य सूक्ष्मशरीरस्य शुक्रशोणितमनुष्य(०मय)स्योपचयं करोति । मातुश्च मयं (नाड्या) बालस्य च* नाभिरन्ध्रे प्रविष्य(श)ति । यथैकेन मार्ग्गेण शाकवाटस्याप्यायनमुदकं करोति, एवमन्नपानस्य रसो मातृनाडीगतो बालस्य नाभिं प्रविशति । प्रविश्य बालशरीरस्या-प्यायनं करोति । तत्सुख(तत्सूक्ष्म)शरीरस्याकृति(तिः) यादृ-

+ + Superfluous here. * च is superfluous.



ग्लक्षणा बहिः शरीरस्य भवति हस्तपादशिरःपृष्ठौ(ष्ठो)दरजङ्घा-गुल्फ(ल्फा) इति । अपि च शिष्टा वदन्ति बहिःशरीरं षट्-कोशिक(षाट्कौशिक)मिति । रुधिरमांसरोमत्वग्(रुधिरमांस-रोमाणि ?) [इति] मातृजानि । स्नायो(य्व)स्थिमज्जा [७२अ] इति पितृजानि । एवमेतद् बाह्यशरीरमाभ्यन्तरस्या(स्य) सूक्ष्मशरीरस्योपचयं करोति । तस्यैव बहिःशरीरेणोपचितस्य सूक्ष्मशरीरस्य प्रसवकाले योन्या निर्गतस्य मातुरुदराद् बाह्यानि पृथिव्यादीनि विहरणस्थानीयानि कृतानि । यथा कस्यचिद्राज-कुमारस्य मातापितृजैरुपचितस्य पञ्चमहाभूतानि कृतानि । आकाशमवकाशने, भूमिर्व्विहरणे, आपः पिण्डीकरणे बु(शु)द्धौ च, अग्निराहारपचने, वायु[:] व्यूहने । तस्य शरीरस्य एवमेते त्रिविधा विशेषा[:]—सूक्ष्मा मातापितृजाः सह प्रभूतैः । 'प्र' उपसर्गः पृथिव्यादीनां ग्रहणम् । एवमेते त्रिधा विशेषाः । ये चान्ये प्राग-भिहिता विशेषा शान्ता घोराश्च मूढा[श्च] ।

अत्राह—एतेषु त्रिविधेष्वपि विशेषेषु के नि[७२ब]त्याः [के ऽनित्याः] । अत्रोच्यते—सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते। सूक्ष्मा इति यैरावि(दि)सर्गे आरब्धस्ते नियता नित्या इत्यर्थः । तैरारब्धं सूक्ष्मशरीरं स्थूलशरीरेऽभिम(ग)तमिति तद्धर्मेण संयुक्तं पशुमृगपक्षिसरीसृपस्थावरस्थानानि पश्यति । धर्मेण संयुक्तं ब्रह्मा-दीनि दिवस्थानानि पश्यति । धर्माधर्मयोः सामान्येन ब्राह्मणादीनि चण्डालान्तानि स्थानानि पश्यति । एवं सूक्ष्मशरीरं नियतं यावत् सांसारिकमित्यर्थः । यावत् ज्ञानं नोत्पद्यन्ते(ते) तावत्संसरति, उत्पन्ने ज्ञाने निवर्त्तते । तस्मिंश्च निवर्त्तित (निवृत्ते or निवर्त्तिते) पुरुषो गच्छति मोक्षम् । तस्मादेते 'सूक्ष्म(क्ष्मा)स्तेषां नियता मातापितृजा निवर्तन्ते' । तत् सूक्ष्मशरीरं परित्यज्य मरणकाले मातापितृजं पतति । तत् सू[७२अ]क्ष्मशरीरमविदुषां संसरति ।

अत्राह—उक्तं भगवता मातापितृजा निवर्त्तन्ते । ततः सूक्ष्म-शरीरमविदुषां संसरतीत्यर्थः । [तत् कथम् । अत्रोच्यते ।]॥छ॥

पूर्व्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम् ।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ॥४०॥

पूर्व्वोत्पन्नमिति आदिसर्गोत्पन्नमित्यर्थः । किञ्चान्यदसक्तं न क्वचित् सक्तमसक्तम् । देवमानुषां(ष)तिर्य्यग्योनिषु संगच्छमानं [न] प्रतिहन्यते पर्वतानापि भित्त्वा निर्ग्गच्छति सूक्ष्मत्वात् । नियतं नित्यमित्यर्थः । यावत् ज्ञानं नोत्पद्यते तावत् स्वशरीरे व्यवस्थितमित्यर्थः । महदादिसूक्ष्मविषय(०सूक्ष्म)पर्यन्तमिति । अयमर्थो महान् पश्या(यस्या)दि[ः] सूक्ष्मशरीरस्य विषययश्चा (सूक्ष्माणि शब्दादिविषयाश्चा)न्तस्तदिदं महदादिसूक्ष्म[७३ब]शरीरपर्यन्तम् (०सूक्ष्मपर्यन्तम्) । आदिशब्देन त्रयोदशविधं करणमभिसंबध्यते । अत्राह–तत्किं करोति । अत्रोच्यते–संसरति देवमानुषतिर्यग्योनि–[ष्व]जरं जवीभावं (जोवभावं) (or ०योनिष्वाजवञ्जवीभावं) गच्छति । किञ्चान्यन्निरुपभोगं शब्दादयो विषयास्तैर्विरहितमित्यर्थः । भावैरधिवासितं देवभावेन मनुष्यभावेन तिर्यग्योनिभावेन तत्राशीत(तद्वासित ?)मित्यर्थः । यथा किल पवनवस्त्रवासव तद्वस्त्वात्ता(पवनवस्त्रवासनवत् । तद्वत् शान्ता or ०वासवत् । तद्वस्त्वात्ता ?) भावा भवन्ति । देवभावाः शुभेन मनुष्यभावाः शुभाशुभेन तिर्यग्योनिभावा अशुभेन । लिङ्गं प्रलयकाले प्रधाने लयं गच्छति तत् सूक्ष्मशरीरम् ।

अत्राह–सूक्ष्मशरीरेण नास्ति प्रयोजनं । त्रयोदशविधं करणकं शरीरसीति (करणमेव संसरतीति) । अत्रोच्यते ॥छ॥

[७४अ] चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया ।
तद्वद् विनाऽविशेषैर्ण्ण(र्न्न) तिष्ठते(ति) निराश्रयं लिङ्गम् ॥४१॥

इहाश्रयान् श्रयिणोः (इहाश्रयाश्रयिणोः) संबन्धे(न्धो) दृष्टः । विना आश्रयेण आश्रयी न तिष्ठति । कुडयपटमाश्रयं कृत्वा चित्रम[व]तिष्ठते । इदं शरीरं कुडयपटस्थानोयं चित्रसंस्थानीयं त्रयोदशविधं करणम् । तत्र यदुक्तं भवता करणमेव संसरतीति तन्मिथ्या । किञ्चान्यत् स्था[ण्वा]दिभ्यो विना यथा छाया ।



यथा स्थाणुपुरुषादिभिर्व्विना छाया न भवति, छायया विना स्थाणुपुरुषादयो न भवन्ति, यथाग्निना विना प्रकाशो न भवति, तद्वद्विनाऽ[वि]शेषैर्न्न तिष्ठति नि[रा]श्रयं लिङ्गम् । अविशेषा इति तन्मात्राणां ग्रहणम् । तैरारब्धं [सूक्ष्मशरीरम् । तेन] सूक्ष्मशरीरेण प्रयोजनं+ विना न तिष्ठति निराश्रयं [लिङ्गम्] । लिङ्गमिति त्रयो[७४ब]दशविधस्य करणस्य ग्रहणं कृतं भवति । तत्र यदुक्तं भवता किं सूक्ष्मशरीरेण प्रयोजनं त्रयोदशविधं करणमेव संसरतोति, तन्मिथ्या ।

अत्राह । सूक्ष्मशरीरं त्रयोदशविधेन करणेन संयुक्तं संसरतोति केन हेतुनेति । तदुच्यते ॥छ॥

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन ।
प्रकृतेर्व्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिङ्गम् ॥४२॥

पुरुषार्थ[ः] कर्तव्यमिति (कर्तव्य इति) प्रधानस्य प्रवृत्तिः । स चार्थो द्विविधः । शब्दाद्युपलब्धे(ब्धि)रादिर्गुणपुरुषान्तरोपलब्धि[श्च द्वितीयः] । [पुरुषार्थ] हेतुकमिदं सूक्ष्मशरीरम् । किञ्चान्य[त्] निमित्तनैमित्तिकः(क)प्रसङ्गेन । तत्र निमित्तं धर्मो द्विविधं तत्पुरुषस्तद्वक्ष्यामः (तत्र निमित्तं धर्माद्यष्टविधं [नैमित्तिकमूर्ध्वगमनादि] तत्पुरस्ताद्वक्ष्यामः) 'धर्मेण गमनमूर्ध्वमादि (०र्ध्वम्' इत्यादि) [का. ४४] । प्रकृतेर्व्विभुत्वयोगादिति । प्रकृति[ः] प्रधान[म्] । विभुत्वं [प्रभुत्वम्] तस्य योगस्त[स्मा][७५अ]द्विभुत्वयोगात् । यथा कश्चिद्राजा प्रभुत्वयोगेना(न) स्वराष्ट्रे यद्यदिच्छति तत्तत्करोति । एवं प्रधानमपि विभुत्वयोगेन मानुष्यं वा दैवं वा तिर्यग्योनिं (तैर्यग्योन्यं) वा करोति । एवं सूक्ष्मशरीरं त्रयोदशविधेन करणेन संयुक्तं हस्तिन्या उदरं प्रविश्य हस्तो भवति, स्त्रीशरीरं प्रविश्य मनुष्यो भवति, पशुशरीरं प्रविश्य पशुर्भवति । तस्मादुक्तं नटवद्व्यवतिष्ठते लिङ्गम् ।

+ प्रयोजनम् is superfluous.

अत्राह–उक्तं पुरा भावैरपि(धि)वासितं लिङ्गं सूक्ष्मशरीरं संसरति । तत्के भावा इति । अत्रोच्यते ॥छ॥

स्वां(सां)सिद्धिकास्व(श्च) भावाः प्राकृतिका वैकृतिकाश्च धर्माद्याः ।
दृष्टा[:] कण्णा(करणा)श्रयिणः कार्याश्रयिणा(ण)श्च कलि(ल)लाद्याः ॥
॥४३॥

इह त्रिविधा भावाश्चिन्त्यन्ते । अत्र केचित् सांसिद्धिकाः, केचित् प्राकृतिकाः, केचिद्वैकृतिकाः । । त[७५ब]त्र सांसिद्धिकास्तावद्यथा कपिलस्य भगवतः परमार्थे (परमर्षेः) आदिसर्गे समुत्पन्नस्य इमे चत्वारो भावाः समुत्पन्ना धर्मो ज्ञानं वैराग्यमैश्वर्यमिति । एते षां(सां)सिद्धिका उच्यन्ते । प्राकृतिका नाम ब्रा(ब्र)ह्मणः किल पुत्राः सनकसनन्दनसनत्कुमारसनन्ननादयो(०सनातना) बभूव(वु)स्तेषामुत्पन्नकार्यकरणानां शरीरवतां षोडशवर्षाणामेवैते चत्वारो भावा अकस्मादेवोत्पन्ना नादि(निधि) दर्शनवत् । एते प्राकृतिका भावा इत्युच्यन्ते । [वैकृतिका यथा–] आचार्यमु(मू)र्त्ति निमित्तं कृत्वा ज्ञानमुत्पद्यते ज्ञानाद्वैराग्यं वैराग्याद्धर्मो धर्मादैश्वर्यमेवमेते चत्वारो भावा अस्मदादिषु वर्त्तन्ते । ते दैवा (ते एव or एते ?) वैकृतिका इत्युच्यन्ते । एवमेते त्रिधा भावा [व्या]ख्याता यैरधिवासितं महदादि लिङ्गं [७६अ] संसरति ।

अत्राह–धर्मो ज्ञानं वैराग्यमैश्वर्यम्, अधर्मोऽज्ञान[म]वैराग्यमनैश्वर्यमिति एवमेते अष्टौ भावा[:] [क] प्रवर्त्तन्ते । [अत्रोच्यते] दृष्टा(ष्टाः) करणाश्रयिण[:] कार्याश्रयिणश्च कललाद्याः । एते अष्टौ भावाः पूर्व्वर्षिभिर्दृष्टाः करणाश्रयिणः । करणान्मु(न्यु)च्यन्ते बुद्धिरहङ्कारो मनश्चैकादशेन्द्रियाणि (०ङ्कारश्चैकादशेन्द्रियाणि) इति करणान्याश्रित्याष्टौ भावा प्रवर्त्तन्ते । उक्तं हि व्य(अध्य)वसायो बुद्धिर्धर्मो ज्ञानं वैराग्यमै(विराग ऐ)श्वर्यमित्येवमादि [का.२३] । किञ्चान्यत् कार्यं(र्या)श्रयिणश्च कललाद्याः । यदा सूक्ष्मशरीरमुत्पत्तिकाले मातुरुदरं प्रविशति, मातु[:] रुधिरं पितु[:] शुक्रं तश्च(तस्य) सूक्ष्मशरीरस्योपचयं कुरुते, मातुः कलि(ल)लर्बुद–(बुद्बुद)घनं(न)मांसपेसो(शी)गर्भकौमारयौवनस्थाधियांद्या(०स्थाविरादयोऽ)न्नपानरसनिर्मिता निष्पाद्यन्ते ते[७६ब]न उत्पन्ने



(उच्यते) 'कार्याश्रयिणश्च कललाद्या' इति । काल(कलल)ग्रहणं विरागनिमित्तार्थम् ।

अत्राह–उक्तं भगवता पूर्व्वस्यामार्यायां 'निमित्तनैमित्तिकप्रसङ्गेन' तद्वु(नटव)द्व्यवतिष्ठते लिङ्गम् इति [का.४२] अत्र किं निमित्तं नैमित्तिकम् इति । अत्रोच्यते ॥छ॥

धर्मेण कनक(गमन)मूर्द्ध्वं गमनमधस्ता[द्] भवत्यधर्मेण ।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः ॥४४॥

स तु धर्मो निमित्तम् । इहलोके धर्म्मं यत्(यं) करोति तन्निमित्तं(तं निमित्तं) *कृत्वा सूक्ष्मशरीरमूर्ध्वं गच्छति । ऊर्ध्वमित्यष्टानां देवयोनीनां ग्रहणम् । तत्रायं(द्यं) ब्राह्मम् । प्राजापत्यम्, ऐन्द्रं, चित्रं (पित्र्यं), गान्धर्व्वं, य(या)क्षं, [राक्षसं], पैशाचमित्येतान्यष्टौ स्थानानि सूक्ष्मशरीरं गच्छति । तत्र धर्मो निमित्तम्, उर्द्धंव्य(ऊर्द्ध्वं) गमनं नैमित्तिकम् । किञ्चान्यं(न्यत्), गमनमधस्ताद् भवत्यधर्मेण । इहलोके [७७अ] यमनियमलक्षणो धर्म्मस्तद्विपरीते(तो) हि [अ]धर्म्मस्तेन(ना)धर्मेण तत् सूक्ष्मशरीरमधस्ताद् गच्छति पशुमृगपक्षिसरीसृपस्थावराणि पञ्च । अत(तोऽ)धर्मो निमित्तमधोगमनं नैमित्तिकम् । किञ्चान्यत्–ज्ञानेन चापवर्गो, यत् पञ्चविंशतितत्त्वज्ञानं तेन ज्ञानेन तत् सूक्ष्मशरीरं निवर्त्तते, परमापवर्गं प्राप्नोति, मोक्षं गच्छतीत्यर्थः । अतो ज्ञानं निमित्तम्, अपवर्गो नैमित्तिकः । किञ्चान्यत्, विपर्ययादिष्यते बन्ध[:] । कस्य विपर्यया[त्] । ज्ञानस्य विपर्यया(योऽ) ज्ञानं तेन(ना)ज्ञानेनाऽहं दर्शनीयः सुभगोऽहं भोक्त्य(क्ताऽ)हमिति मन्यते । तेन(ना)ज्ञानेन तिर्यग्योनिमनुष्यदेवेष्वात्मानं बध्नाति, मोक्षं न गच्छतीत्यर्थः । अतोऽज्ञानं निमित्तं बन्धो नैमित्तिकः । स च बन्धस्त्रिविधः—प्रकृतिबन्धो वैका[७७ब]रिकबन्धो +दक्षिणबन्धो दक्षिण(णा)बन्धश्चेति । तत्र प्रकृतिबन्धो नाम अष्टासु प्रकृतिषु परे तत्त्वेना(परत्वेना)भिमानः । वैकारिकः बन्धो नाम ब्रह्मादि-

* कृत्वा सूक्ष्मशरीरम् is unnecessarily repeated in the manuscript.

\+ दक्षिणबन्धो is superfluous.

स्थानेषु श्रि(श्रे)योबुद्धिः । दक्षिण(णा)बन्धो गवादिदाने जाति-निमित्तम् (गवादिदानेऽयानिमित्तः)। एवं चतुर्विधं निमित्तनैमित्तिकं व्याख्यात[म्] ।

अन्यदपि चतुर्विधं निमित्तनैमित्तिकं व्याख्यास्यामस्तदुच्यते ॥छ॥

वैराग्य(ग्यात्) प्रकृतिलयः संसारो राजसाद्भवति रागात् ।*
ऐश्वर्यादविघातो विपर्ययात्तद्विपर्यासः ॥४५॥

यथा कस्यचिद्वैराग्यमस्ति जितेन्द्रियो विषयेभ्यो विरक्तो यमनियमपरः केवलं तु ज्ञानं नास्ति पञ्चविंशतितत्त्वाख्यम् । तेनाज्ञानपूर्व्वकेन(ण) वैराग्येण नास्ति मोक्षः । केवलमष्टासु प्रकृतिषु लयो भव[७८अ]ति प्रधानबुद्ध्यहङ्कारपञ्चतन्मात्रेषु । तत्र लीनमात्मानं स मुक्तमित्य[व]गच्छति । भूयत्(भूयः) संसरणा(ण)-काले संसरति, त्रिषु लोकेषु शरीरोय(त्प)त्तिर्भवति । तत्र वैराग्यं निमित्तं प्रकृतिलयो नैमित्तिकः । किंचान्यत्-[सं]सारो राजसाद्भवति रागात् । ये(योऽ)यं राजसो रागः यज्ञं करोति तदा निदानं ममुस्मिल्लोके (ददाति दानममुष्मिँल्लोके) सुखं भविष्यतीति । तेन रागेण संसारो भवतीति । ब्रह्मादिस्थावरान्तेषु जन्म भवति । तत्र रागो निमित्तं संसारो नैमित्तिकः। किञ्चान्यद् ऐश्वर्यादविघातो. । य[त्] पूर्व्वमैश्वर्य[७८ब]मष्टविधो(ध)मणिमादि निर्दिष्टं तेनैश्वर्येण प्रार्थिता[ना]मविघातो भवति न मुक्तिः । अत्राष्टगुण(०विध)मैश्वर्यं निमित्तमविघातो नैमित्तिकः। किञ्चान्यद् विपर्ययात्तवि(द्वि)पर्यासः। विपर्यासाद् (विपर्ययाद्) अनैश्वर्या-त्तद्विपर्यासः प्रार्थितानामप्राप्तिरित्यर्थः । अत्रानैश्वर्यं निमित्तं विघातो नैमित्तिकः । एवमेता(०मेतद)ष्टविधः(धं) निमित्तनैमित्तिकमिति । एवं षोडशविधो निमित्तनैमित्तिको(कः) [सर्गो or प्रसङ्गो] व्याख्यातः । प्रकृतिलयः प्रकृतिबन्ध इत्युच्यते ।

अत्राह—निमित्तनैमित्तिकप्रसङ्गः किमात्मकस्यै (किमात्मकः) इत्यत्रोच्यते ॥छ॥

* The Kārikā text in the manuscript is ०संसारो भवति राजसाद्रागात्, but the pratīka in the vṛtti is संसारो राजसाद्भवति रागात्, hence it is given as such here.



[७९अ] एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः ।
गुणवैषम्यविमर्दे[न] तस्य भेदास्तु पञ्चाशत् ॥४६॥

एष इति । आर्याद्वयेन षोडशविधो [निमित्त]नैमित्तिकसर्गं उक्तः । प्रत्ययसर्ग इत्युच्यते । प्रत्यया[द्] बुद्धेरुत्पन्नो यस्मात् प्रत्ययसर्ग इत्युच्यते । उक्तं हि पुरस्ताद् 'अध्यवसायो बुद्धिर्धर्मो ज्ञानं वैराग्यमै(विराग ऐ)श्वर्यम् । सात्त्विकमेतद्रूपं ताम[सम]स्मा-द्विपर्यस्तम्' [का. २३] । स च प्रत्ययसर्गो भूयश्चतुर्द्धा वि(भि)द्यते, यस्मादाह विपर्ययाऽय(श)क्तितुष्टिसिद्ध्याख्या(ख्यः) । तत्र विपर्ययो नाम संशयबुद्धि[ः] किमयं स्थाणुपुरुषरिति ह्योश्वित् पुरुष इति (किमयं स्थाणुराहोस्वित् पुरुष इति) । स चा(च) संशयो विपर्यय इत्युच्यते । भूयोऽपि स्थाणुं समीक्ष्य तः (न) शक्नोत्यन्तरं गन्तुमेवमस्याशक्तिरुत्प[७९ब]न्ना । ततस्तृतीयं तं संसयिमत्र ज्ञानेन तुष्टिः (तं स्थाणुं संशयितुं ज्ञातुं वा नेच्छति) किमनेनास्माकमिति एष(षा) तुष्टिः । भूयश्चतुर्थे दृष्टे य(त)स्मिन् स्थाणववि(धि)रु(रू)[ढां] वल्लीं पश्यति तत्रस्थं शकुनिं [वा] ततोऽस्येति (ततोऽस्य) निश्चय उत्पन्नः स्थाणुरय-मिति । एषा सिद्धिः । एवमेष प्रत्ययसर्गश्चतुर्थो(र्द्धा) भिन्नोः(न्नो) विपर्ययाशक्तितुष्टिसिद्ध्याख्यः । तस्य चतुर्विधस्य प्रत्यय-सर्गस्य गुणवैषम्यविमर्द्देन पञ्चाशद् भेदा भवन्ति । सत्त्वरजस्त-मांसि त्रयो गुणास्तेषां वैषम्यं गुणवैषम्यम् । विषमता वैषम्यम् । यदा सत्त्वमुत्कटं भवति तदा रजस्तमसी अभिभवति, यथा-दित्यप्रकाशाद् ग्रहनक्षत्रतारकाणामप्रकाशो भवति । एवं रजमु(रज उ)त्क[८०अ]टं सत्त्वतमसी अभिभवति । विमर्द्देनेत्य-भिभवति एवं (एवं तम उत्कटं सत्त्वरजसो अभिभवति । तेन विमर्द्देन) चतुर्विधस्य पञ्चाशद् भेदा भवन्ति ।

तांश्च भेदान् वक्ष्यामस्तदुच्यते ॥छ॥

पञ्च विपर्ययभेदा भवन्ति(न्त्य)शक्तिश्च करणवैकल्यात् ।
अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः ॥४७॥

पञ्च विपर्ययभेदा इति योऽयं प्रागभिहितो विपर्ययस्तस्य पञ्च भेदा भवन्ति तमो मोहो महामोहस्तामिस्रोऽन्धतामिस्रश्चेति । तस्य[वि]पर्ययस्य पञ्च भेदान् वक्ष्यामः ॥छ॥

भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहो(हः) ।
तामिस्रोऽष्टादशधा तथा भवन्त्य(त्य)न्धतामिस्रः ।४८॥

ता(त)मसस्तावद् अष्टविधप्रकृतितत्त्ववादिनामष्टासु प्रकृतिषु लयो भवति, तद्यथा प्रधानबुद्ध्यहङ्कारपञ्चतन्मात्रे[षु] । तत्रा(त्र) लीनमात्मानं यु(मु)क्तोऽहमि[८०ब]ति मन्यते । [स च तस्य विपर्ययः] तम इत्यस्य पर्यायः । एवमेतत्तमसोऽष्टविधो भेदः । मोहस्य चाष्टविध एव भेदः । यदैश्वर्यमणिम(मा)द्यष्टविधं [तस्मिन्] ऐश्वर्ये सक्ता ब्रह्मेन्द्रादयो देवा मोक्षं[न] गच्छति(न्ति) ऐश्वर्यक्षयेण(०क्षये) पुनः संसरति(न्ति) । एषोऽष्टविधो मोहस्य भेद उक्तः । महामोहस्य वक्ष्यामः- दशभेदो(दशविधो ?) महामोहः । शब्दस्पर्शरूपरसगन्धाः पञ्च विषया देवानां सुखलक्षणाः । एवं शब्दादयो विषयाः पञ्च मनुष्याणां सुखदुःखमोहलक्षणाः । एवमयं दशविधो विषयस्तस्मिन् दशविधे विषये ब्रह्मेन्द्रादयो देवा मनुष्याश्च तैर्यग्यानां(ना)श्च सक्ता मन्यन्ते विषय(ये)भ्यः परमधिकं सुत(ख)मन्यन्नास्तीति । एवं ज्ञानं गमनं कुर्वन्ति(एवं ज्ञानागमं न कुर्वन्ति ?) येन मोक्षो भविष्यतीति । एवमेव दशविधो महास्तिमि[८१अ]स्रं (महामोहः । तामिस्रं ) वक्ष्यामः-तामिस्रो अष्टादशविधा (तामिस्रोऽष्टादशधा) । ये देवानां मनुष्याणां दश विषयाः प्रागभिहिता अणिमाद्यष्टगुणमैश्वर्यं च तेभ्यः प्रतिहतस्य यः क्रोध[ः] स तामिस्र इत्यच्युते । तथा भवत्यन्धतामिस्र[ः] । तथेति निपातः । अन्धतामिस्रोऽष्टादशविध एव भवति । यत् प्रागभिहिता(त)मष्टविधमैश्वर्यं दश विषया देवमनुष्याणां तेषु च मरणाक्रम[त्रा]सा[द्] दुःखमुत्पद्यते । ऐश्वर्ये विद्यमाने ऐश्वर्यं परित्यज्य मृत्युना हृदय(ह्रिय)माणो गच्छामीति संकल्पयतो य सात्रास(यस्त्रासः) सोऽन्धतामिस्र इत्युच्यते । एवमेते तमसो+ भेदाः पञ्च भिद्यमाना सिद्धिष्टभेदा(द्विषष्टिभेदा) वृत्ताः ।

+ तमसो = विपर्ययस्य (or तमःप्रभृतयो भेदाः)



अत ऊर्ध्वमशक्त(क्ति)भेदान्धतामस्तदुच्यते (०भेदान् वक्ष्यामस्तदुच्यते or ०भेदा अन्धताद्यास्तदुच्यते) ॥छ॥

एकादशेन्द्रि[य]वधाः सह बुद्धि[८१ब]वि(व)धैरशक्तिरुद्दिष्टा ।
सप्तदश वधा बुद्धेर्विपर्ययात्तु(or ०स्तु)ष्टिसिद्धीनाम् ॥४९॥

एकादशेन्द्रियवधा इति ।
बाधिर्यमाध्य(न्ध्य)मजिघ्रत्वं (०मान्ध्याजिघ्रत्वेor ०मान्ध्यमघ्रत्वं)*
मूकता जडता तथा ।
उन्माद हि कुष्ठित्व क्लैब्यो उदावर्तं पङ्गुता
(उन्मादकौण्यकुष्ठित्वक्लैब्योदावर्तपङ्गुताः) ॥

एवमेकादशानामिन्द्रियाणामेकादशेन्द्रियवि(व)धाः । इन्द्रिया[णि] श्रोत्रादीनि । मन्य एवमेकादशविधो विकल्पः (तेषामेवमेकादशविकल्पो वधः ? )।

इहलोके कश्चिद्देवदत्तो वैराग्ये(ण) गृह्यते । यज्ञदत्तमाहूय प्रब्रवी[ति]—भो यज्ञदत्ता(त्त) दुःखितोऽस्मि किं करवाणीति । स तेनोक्तः सांख्यज्ञानस्याधिगमं कुरु त्वं दुःखान्तं यास्यसीति । एवं यज्ञदत्तेनोक्तो देवदत्तोऽब्रवीत्–नाहं शक्नोमि सांख्यज्ञानस्याधिगमं कर्तुं यस्माद् बधिरोऽस्मि गुरो[८२अ]र्व्वचनं न शृणोमि, शुश्रूषायामसमर्थ[ः] कुतो ज्ञानस्याधिगमं करिष्यामीति । एवमेवान्ध(न्ध्य)मूकत्वोम(न्मा)दादयः इन्द्रियोपघाता विषया(य)ग्रहणे असमर्था बोध्याः । एवमेते [ए]कादशेन्द्रियाशक्तिरित्युच्यते(न्ते) । सह बुद्धिवधैरशक्तिरुद्दिष्टा । बुद्धेर्व्वधा बुद्धिवधा[ः] तैर्बुद्धिवधैः सहाशक्तिरुद्दिष्टा । अत्राह—के ते बुद्धिवधा कियन्तश्चेति । सप्तदश वधा बुद्धेर्विपर्ययाशक्ति ( बुद्धेर्विपर्ययात् or ०यास् ) तुष्टिसिद्धीनाम् । ते च सप्तदश वधा तुष्टिसिद्धिषु व्याख्यायमानासु व्याख्यास्यन्ते ।

* See Notes.

तत्र यदुक्तं-तुष्टिर्नवधेरिति (०र्नवधेति) [का. ४७] तासां
तुष्टीनां समधिगमं करिष्यामः । तदुच्यते ॥छ॥

आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभागाख्याः ।
बाह्यविषयोपरमा[८२बश्च] पञ्च नव तुष्टयोऽभिमता[ः] ॥५०॥

आध्यात्मनं ज्ञापयन्त (अध्यात्मनि उत्पद्यन्त?) इत्याध्यात्मिका[ः]।
प्रकृत्याख्या उपादानाख्या कालाख्या भो(भा)गाख्या श्चे(चे)-
ति चतस्रस्तुष्टयश्चाध्यात्मिकाः । यथा कश्चित् प्रकृतिमात्रं चेति
(वेत्ति), जानानीते (न जानीते) नित्या वा अनित्या वा चेतना वा
अचेतना वा सगुणा वा अगुणा वा सर्व्वगता वा असर्व्वगता वेति ।
एतान् धर्मान्न वेति(त्ति) केवलमस्तित्वमात्रेण तुष्टः प्रव्रजित-
स्तवस्या (०स्तदस्य or स्तस्य) नास्ति मोक्षः । एषा प्रकृत्याख्या
तुष्टिः । उपादानाख्या यथा कश्चि[त्] त्रिदण्डकुण्डकमण्डल(लु)-
कृष्णाजिनाक्षसूत्रादीनामुपादानं कृत्वा प्रब्रवीति मम मोक्षो
भविष्यतीति । एवं तुष्टो ज्ञानागमं न करोति । तस्य नास्ति
मोक्ष इत्ये[८३अ]षा उपादानाख्या द्वितीया तुष्टिः । कालाख्या
यथा कश्चिन्न(कश्चिदन)भिगततत्त्वज्ञो ब्रवीति कालेन मोक्षो
भविष्यतीति, ज्ञानागमं न करोति किं ज्ञानेनेति । एवं
सन्तुष्टस्य नास्ति मोक्ष इत्येषा कालाख्या तृतीया तुष्टि[ः] ।
भो(भा)गाख्या यथा कश्चिद् अनभिगततत्त्वज्ञो ब्रवीति भागेन
मोक्षो भविष्यतीति ज्ञानागमं न करोति किं ज्ञानेनेति सन्तुष्टस्य
मोक्षो नास्तीति एष(षा) भागाख्या चतुर्थी तुष्टिः । एवमेता
आध्यात्मिकाश्चतस्रस्तुष्टयो भवन्तीति ।

बाह्या[ः] तुष्टयो भवन्ति ताश्च व्याख्यास्यन्ते बाह्यविषयो-
परमाश्च पञ्च । ताश्चेमाः अर्ज्जनरक्षणक्षयातृप्तिहिंसादोषाः ।
तत्रार्ज्जनं नामः(नाम)—शब्दस्पर्शरूपरसगन्धा विषयात्ता(स्तान्)
निमित्तं कृत्वा कृषिपशुपालनवाणिज्यादिषु प्रवर्तते । तत्र विष-
[८३ब]योपार्ज्जनो(ने) क्लेशः(श)प्रयासादिदुःखं मत्वा विषयेभ्यः
उपरमत्युपरतश्च तुष्टिं लभते । एषा पञ्चमी तुष्टिः । रक्षणदुखं
यथार्जितानां धनधान्यानां राजचोरादिभ्यो यद् रक्षणं तदपि दुःखं



कर्त्तुमित्युपरतश्च तुष्टिं लभते । एषा षष्ठी तुष्टिः । क्षयदुःखं यथाऽ-
र्जितानां रक्षणे कृतेऽप्युपभुज्यमानाः क्षीयन्त इति मत्वा उपरतश्च
तुष्टिं लभ्य(भ)ते इत्येषा सप्तमी तुष्टिः । [अतृप्तिदुःखं] यथाऽ-
र्जितरक्षणभ(क्ष)यादीनां प्रतीकारेऽपि कृते इन्द्रियाणां वैतृष्ण्यं
नास्तीति सञ्चिन्त्य विषयेभ्यो विरमत्युपरतश्च तुष्टिं लभते एषा-
ष्टमी तुष्टिः । अर्जनरक्षणाया(०रक्षणक्षया)तृप्तीनां प्रतीकारेऽपि
कृते अर्जनादिवृत्तिर्न हिंसामन्तरेण । भूतो प्रारब्धं (भूतोपरोधं)
विना न शक्यन्ते विषया उपार्ज्जयितुं मनो (०यितुमतो) विष[८४अ]-
येभ्यः उपरतश्च तुष्टिं लभते एषा नवमी तुष्टिः । एवमेताभि[ः]
तुष्टिभिरज्ञानान्मोक्षं(क्षः) नास्तीति (अस्तीति ? ) केवलेन वैरा
ग्येण तुष्टि[ः] । एवमेता आध्यात्मिकाश्चतस्रो बाह्याः पञ्च [इति]
नव तुष्टयो व्याख्याताः । आसां तुष्टीनां नैकाना(नवाना)मिह
संज्ञा भवन्ति-अम्भः, सलिलम्, नौघ (औघं), वृष्टिः, सुतारं, सु
था(पा)रं, सुनेत्रं, मरीचिकम्, अन्धमाम्भसिकमिति । आसां विपरीता
अतुष्टय इत्युच्यन्ते—अनम्भः, असलिलम्, अनौघम्, अवृष्टिः,
असुतारम्, असुपारम्, असुनेत्रम्, अमरोच्चिकम्, अन्ध(न)न्ध
माम्भसिकमिति । एवं तुष्ट(ष्ट्य)तुष्टयो व्याख्याताः ।

इदानीं सिद्धयो व्याख्यास्यन्ते इत्युच्यन्ते(ते) ॥छ॥

ऊहः शब्दोऽध्ययनं दुःखविघातत्रयं सुहृत्प्राप्तिः ।
दानं च सिद्धयोऽष्टौ सिद्धे[ः] पूर्वोऽङ्कुशस्त्रिविधः ॥५१॥

ऊ[८४ब]हः शब्दोऽध्ययनं दुःख*। कामक्रोधलोभमोहभयद्वेषेर्ष्या-
विषादरत्यादिनिमित्तेन तस्या(स्य) प्रतीकारं कृत्वा पूर्व्वेषामेव त्रया-
णां मो(ऊ)हादीनामन्यतमे[न] ज्ञानमधिगम्य मोक्षं गच्छति । सा
पञ्चमी सिद्धिः । एवम् सा(आ)धिदैविकेन शीतोष्णवातत(व)र्षा-
र्त्याया(०र्षावश्याया)वेशनिमित्तेन च तस्य प्रतीकारं कृत्वा
पूर्व्वेषामेव त्रयाणां गृ(ऊ)हादीनामन्या(न्य)तमेन ज्ञानमधिगम्य

*There is some come confusion here. The first four siddhis are not discussed. A part of the exposition of the fifth also is missing.

मोक्षं गच्छति । सा षष्ठी सिद्धिः । सप्तमीं वक्ष्यामः । तदुच्यते । सुहृत्प्राप्तिस्तद्यथा कश्चि[द्] दुर्मेधा गुरोः सकाशान्न(न्ना)वधारयति सुहृत्सकाशात् ज्ञाना(न)मधिगम्य मोक्षं गच्छति । षष्ठी (एषा?) सप्तमी सिद्धिः । अष्टमीं च वक्ष्यामः । यथा कश्चि[द्]दुर्भाग-श्चे(श्चा)वाहनः(न)संवाहनान्युषा(०नौषधि?)प्रेषणादिना द्रव्या(व्य)-दानेन [८५अ]च गुरुमाराध्यः(ध्य) सांख्यज्ञानमधिगम्य मोक्षं गच्छति । एषाष्टमी सिद्धिर्दानादिभिरुपायैर्निष्पन्ना । आसां सिद्धीनां पूर्व्वाचार्यैः संज्ञाः कृतास्तारं, सुतारं, तारयन्तं, प्रमोदं, प्रमुदितं, मोदमानं, रम्यकं, सदाप्रमुदितमिति । आभ्यो विपरीताख्यः(ख्याः) [अ]सिद्धय इत्युच्यन्ते । तद्यथा आ(अ)तारम्, अमु(सु)तारम्, आ(अ)तारयन्तम्, अप्रमोदम्, अप्रमुदितम्, अप्रमोदमादं(अमोदमानम्), अरम्यकम्, असदाप्रमुदितमिति । एषा अष्टविधा सिद्धिः ।

एकादशेन्द्रियवधा नवानां तुष्टीनां विपर्यय(या) [अ]तुष्टयो-(यः) [८५ब] सिद्धीनां विपर्ययेणासिद्धयोऽष्टौ एषामेवाशक्ति-वधानां [भेदा] भवन्ति । विपर्ययाशक्तिः(वित)तुष्टिसिद्धीनामुद्देशः कृतः । किञ्चान्यत्, सिद्धे[ः]पूर्वोऽङ्कुशस्त्रिविधः । या असिद्धयः पूर्व्वोक्ता विपर्ययाशक्तितुष्टयः एतास्त्रिविधो(धा) [अ]ङ्कुश-भूताः । यथाऽङ्कुशेन गृहीतो हस्तो वशो(श्यो) भवति एवं विपर्ययेणाशक्त्या तुष्टा(ष्ट्या) च निगृहीतो लोको न ज्ञानं प्राप्नोति । तस्माद् विपर्ययाशक्तितुष्टिः(ष्टीः) परित्यज्य सिद्धीः(द्धिः) सेव्या । सिद्धि(द्धे)स्तत्त्वज्ञानमुपपश्यति तत्त्वज्ञानान्मोक्षो भविष्यतीति ।

अत्राह—उक्तं भगवता पू[८६अ]र्व्वस्यामार्यायां भावैरधि-वासितं लिङ्गं संसरतीति । तत्र किं लिङ्गं पूर्व्वोत्पन्न[म्] उता-होस्विद्भावाः पूर्व्वोत्पन्ना इत्यत्रोच्यते । बुद्धिरहङ्कारः पञ्च बुद्धी-न्द्रियाणि पञ्च कर्मेन्द्रियाणि मनश्च एवमेतत्त्रयोदशविधं करणम् । करणमाश्रित्य सूक्ष्मशरीरं संसरति, शरीरं च करणानि एतल्लिङ्ग-मित्युच्यते । भावाद्(न्) वक्ष्यामः । धर्मो ज्ञानं वैराग्यमैश्वर्यमिति, अधर्मो अज्ञानमवैराग्यमनैश्वर्यं चेति । अ(ए)ते अष्टौ भावा इत्यु-



च्यन्ते । अत्रास्माकं संदेहः किं पूर्व्वोत्पन्नं लिङ्गमुताहोस्वि-द्भावाः पूर्व्वोत्पन्नाः । अत्रोच्यते ॥छ॥

न विना भावैर्लिङ्गं न विना भावेन लिंगविनिवृत्तिः

(लिङ्गेन भावनिर्वृत्तिः) ।

लिङ्गाख्यो भावाख्यत(स्) [८६ब] तस्मा[द्] द्विविधं प्रवर्त्तते सर्ग्गः ॥५२॥

लिंगेन विना भावा न भवन्ति भावैश्च विना लिङ्गं न भवति । यथाऽग्निना विनोष्णता न भवति उष्णत्वेन विनाग्निर्न्न भवति । एवमेतयोर्लिङ्गसर्ग्गभावसर्ग्गयोर्युगपदुत्पत्तिर्यथा* गोविषाणस्त(व)-त्कुमारोस्तनवत् । यत्र लिङ्गं तत्र [भावाः यत्र] भावास्तत्र लिङ्ग-मिति । स्त(त)स्मादुच्यते न विना भावैर्लिङ्गं न विना भावेन लिङ्गविनिवृत्ति (न विना लिङ्गेन भावनिवृत्तिः) । लिङ्गाख्यो भावाख्यो+ भावाख्यश्च भवति । तस्मा[द्]द्विविधं प्रवर्त्तते सर्ग्गः । लिङ्गेन यः आख्यायते स भवति लिङ्गाख्यो भावैर्य आख्यायते स भवति भावाख्यः । एवमेतौ लिंगभावा सं (लिंगभावाख्यौ) सर्ग्गौ व्याख्यातौ । आदिसर्ग्गोत्पन्ना इत्यर्थः ।

अत्रा[८७अ]ह । द्विविधमेव(०ध एव) सर्ग्ग[ः] किं तर्ह्यन्यो-ऽस्तीति तृतीयः (तर्ह्यन्योऽस्ति तृतीय इति) । अत्रोच्यते ॥छ॥

अष्टविकल्पो दे(दै)वस्ति(स्तै)र्यग्योनि(न)श्च पञ्चधा भवति ।
मानुष्यश्चैकविधः समासतो भौतिकः सर्ग्गः ॥५३॥

अष्टविकल्पो दे(दै)वस्तत्राद्यं(स्तद्यथा) ब्राह्मं, प्राजापत्यम्, ऐन्द्रं, पैत्रं, गान्धर्व्वं, याक्षं, राक्षसं, पैशाचमित्येवा(त्येवम)ष्टविधो दैवसर्ग्गः । तैर्यग्योनि(न)श्च पञ्चधा भवति । तुल्यलिंगत्वा[त्]

*यथा is superfluous.

+भावाख्यो is superfluous.

भवति पशुमृगपक्षिसरीसृपस्थावराणां चेति । मानुष्यश्चैकविधस्तुल्यलिंगत्वाद् ब्राह्मणादिश्चांप्र(डा)लान्तः । समासतो भौतिकः सर्ग्गः । संक्षेपेण त्रिविधः सर्ग्गे(र्ग्गः) ।

अत्राह—एतेषु त्रिषु स्थानेषु कतरद् (कतरो) गुणो(गुण उ)त्कटत्वेन वर्त्तते ॥छ॥

[८७ ब] ऊर्ध्वं सत्त्वविशालस्तमोविशालस्तु मूलतः सर्ग्गः ।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः ॥५४॥

ऊर्ध्वमिति ब्रह्मादिपिशाचान्तोऽष्टविधः सर्ग्गः । असौ सत्त्वबहुलः । यस्मात्तेषु सत्त्वमुत्कटत्वेन वर्त्तते । तत्रापि रजस्तमसी स्तः किन्तु सत्त्वमुत्कटत्वेन वर्त्तते यस्मात् तस्मात् सुखप्रायो(या) देवाः । किञ्चान्य[त्] तमोविशालस्तु मूलतः सर्ग्ग[ः] । तमसा विशालः पश्वादिस्थावरपर्यन्ते(न्तः) । त(य)स्मात्तेषु तम उत्कटत्वेन वर्त्तते तस्मा[त्] तमोबहुलः । तत्रापि सत्त्वरजसी स्तः किन्तु तमः उत्कटत्वेन वर्त्तते । मध्ये रजोविशालः । तत्रापि सत्त्वतमसी स्तः किन्तु रज उत्कटत्वेन वर्त्तते यस्मात् तस्मा[द्] दुःखप्राय(या) मनुष्याः । ब्र[८८अ]ह्मादिस्तम्बपर्यन्तश्चतुर्दशविधः एष भूतसर्ग्गः ।

अत्राह—भूतसर्ग्गो सा(भा)वसर्ग्गो लिङ्गसर्ग इति त्रयः सर्ग्गाः प्राधानिका इति प्रधानकार्यं समाप्तम् । उत्पन्नास्त्रयो लोका प्रधानं चोपरतः(तम्) उत्पाद्य लोकानिति तेषु देवमनुष्यतिर्यग्योनिगतेषु सुखदुःखं कोऽनुभवति । किं प्रधानमनुभवति किमप्रधानमनुभवति आहोस्विद् बुद्धिर[हं]कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्च महाभूतानि पुरुष इति । अत्रोच्यते ॥छ॥

अत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः ।
लिंगस्याऽऽविनिवृत्ते[ः] तस्मा[द्] दुःखं समासेन ॥५५॥



[अत्र] त्रिषु लोकेष्विति । देवलोके मनुष्यलोके तिर्यग्योनिलो[८८ब]के च जरामरणकृद्(तं) दुःखं प्राप्नोति चेतनं(नः) पुरुषः । तत्र राज(जरा)कृतं, वलीपलित(तै)श्चाभिभूतः कासश्वासपरिगृहीतो यष्टीविष्टम्भा(म्भ)गामी पुत्रस्नुआ(षा)रि(भि)भूतोऽयं दुःखमनुभवति तज्जराकृतं दुःखम् । मरणकृतं वक्ष्यामः । अष्टविधमैश्वर्यमस्ति यत्प्रागभिहितमणिमादि, दश विषयाः सन्ति । देवानां पञ्च विषया सुखलक्षणा मनुष्याणां त एव शब्दस्पर्शरूपरसगन्ध(न्धाः) पञ्च सु[ख]दुःखमोहलक्षणाः प्राग् व्याख्याताः । तेषु विषयेषु सत्स्वैश्वर्ये सति देवमनुष्याणां तस्य(स्या)मवस्थायां+ य[द्] दुःखमुत्पद्यते तन्मरणकृतमिति । एवमेतैर्दुःखैरन्तकाले च यानि सुखानि दुःखानि सर्व्वा[८९अ]णि प्राप्नोति चेतनः पुरुषः । प्रधाना[दी]न्यचेतनानि पुरुष(षाः) चेतना[ः] तस्मात् पुरुष[स्य] दुःखो(खं), प्रधानादीनां नास्त्यचेतनामानां (०स्त्यचेतनानाम्) ।

अत्राह—कियन्तं कालं पुरुषो दुःखं प्राप्नोतीति । अत्रोच्यते-लिंगस्याऽऽविनिवृत्ते[ः] । यावन्महदादि लिंगं न निवर्तते तावत् पुरुषो दुःखमनुभवति । तस्माद् दुःखं समासेन संक्षेपेण त्रिषु लोकेषु प्राप्नोति चेतनः पुरुषः । यदा तु तं प्रति निवर्तते महदादि लिङ्गं ततो मोक्षं प्राप्नोति । मोक्षं गतस्य पुनर्दुःखं नास्ति । अत्राह -लिङ्गं केन निवर्त्तते । ज्ञानेन । यदा पञ्चविंशतितत्त्वज्ञो(ज्ञा)नमुत्पन्नं भवति, अन्यत् प्रधानमन्यन्महदादिलिङ्गम्, अन्यत् शरीरमन्योऽहमिति यदा ज्ञानेन दृष्टं भवति तदा महदादिलिङ्गं तं प्रति निवर्त्तते ।

किञ्चान्यत् ॥छ॥

इत्ये[८९ब]ष प्रकृतिविकृतः(प्रकृतिकृतः ?) प्रवर्तते वैकृता(तः)
प्रजासर्ग्गः (?)* ।
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थमारम्भः ॥५६॥

\+ M has तन्मरणपातावस्थायाम्.

*See Notes

इत्येष प्रकृतिविकृतो महदादिभूतपर्यन्त एष प्रकतिविकृतः। अत्राह—एष लिंगसर्ग्गः किमर्थं प्रधानेनः(न) कृत इति । अत्रोच्यते-प्रतिपुरुषविमोक्षार्थं पुरुषं [पुरुषं] प्रति विमोक्षार्थं (विमोक्ष)-स्तदर्थं [प्रति]पुरुषविमोक्षार्थम् । देवलोकगतानां मानुषलोकगतानां तिर्यग्योनिगतानां मोक्ष इत्यर्थः । स्वार्थ इव परार्थमारम्भः [स्वार्थः] स्वयी(की)यार्थः । इव उपमायाम् । यथा कश्चित् स्वाथमिव मित्रार्थं करोति एवं स्वार्थमिव प्रधानं परार्थं करोति । स चार्थो द्विविधः शब्दाद्युपलब्धिरादिर्गुणपुरुषान्तरोपलब्धिरन्तर-(०रन्त ?)श्च । त्रिषु लोकेषु शब्दादिविं(वि)षयैः पुरुषं योज[९०अ]-यति । अन्ते च गुणपुरुषान्तरोपलब्ध्या मोक्षं करोति ।

अत्रा[ह] उक्त भगवता प्रधानं स्वार्थमिव परार्थमारभते । त्वया द(चा or त्व चेतनं प्रधानं पूर्व्वमुक्त पुरुषश्च चेतन इति । तत कथमचेतनं प्रधानं जानीते मया पुरुषः शब्दादिभिर्व्विषयैस्त्रिषु लोकेषु योजयितव्यो गुणपुरुषान्तरोपलब्ध्या मोचयितव्या(व्य) इति पुरुषार्थं च कृत्वा निर्वात्तितव्यमिति । अत्राह (अत्रोच्यते) इहलोके अचेतनानामपि प्रवृत्तिर्दृष्टा । यथा कस्येत्याह ॥छ॥

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्ति[ः] प्रधानस्य ॥५७॥

इह लोके तृणोदकं गवाशितपीतं वत्सस्य पुष्टि[ः] कर्त्तव्येति संवत्सरं क्षीण(र)भावेन परिणमति प्रयोजनाभावान्निवर्त्तते एवमेवाचे[९०ब]तनं प्रधानं पुरुषार्थं प्रवर्तते कृत्वा चार्थं निर्व(व)र्तत इति ।

किञ्चान्यत् ॥छ॥

ओत्सुक्यनिवृत्त्यर्थं यथा क्रियासु [प्र]वर्त्तते लोकः ।
पुरुषविमोक्षनिमित्तं प्रवर्त्तते तद्वदव्यक्तम् ॥५८॥

यथा लोको(के) [उ]त्पत्नो(न्न)कार्यो ग्रामं गमिष्यामीत्यौत्सुक्यमना भवति कृतकार्यश्च निवृत्त्यो(त्तौ)त्सुक्यं(क्यः) पुनश्च निवर्त्तते एवमेव प्रधानस्यौत्सुक्यं यथा पुरुषार्थः कर्त्तव्य इति ।



पुरुषार्थश्च कः । शब्दाद्युपलब्धिरादिर्गुणपुरुषान्तरोपलब्धिरन्तस्तं पुरुषार्थं कृत्वा विनिवृत्तः औ(विनिवृत्तौ)त्सुक्यं प्रधानं विनिवर्त्तते । एवं प्रधानस्यौत्सुक्यं पुरुषार्थम् ।

किञ्चान्यत् ॥छ॥

रङ्गस्य दर्शयित्वा निवर्त्तते नर्त्तकी यथा नृत्यात् ।
पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्त्तते प्रकृतिः ॥५९॥

यथा च नर्त्तकी सुनिष्णाता भावा(हाव)भावलीला [९१अ]-विलासवती गीतवादित्रनृत्यादिभिरात्मानं रङ्गस्य दर्शयित्वा सामायि(जि)कजनपरितोषां(षं) कृत्वा दृष्टाऽहमनेनेति कृतप्रयोजना यथा निवर्त्तते नृत्यादेवं प्रकृतिर्बुद्धिभावेन* ना(अ)हङ्कारभावेन तन्मात्रेन्द्रियभूतं(त)भावेन देवभावेन मनुष्यभावेन तिर्यग्योनिभावेन सुखदुःखमोहभावेन चात्मानं पुरुषस्या(स्य) प्रकाश्य विनिवर्त्तते। तस्यां विनिवृत्तायां पुरुषो दुःखत्रयं नानुभवति, मोक्षं गच्छतीत्यर्थः ।

अत्राह-यथा नर्त्तकी नृत्यादिभिरुपायै[ः] आत्मानं प्रकाश्य रङ्गा[द्] विनिवर्त्तते एवं प्रकृतिः कैलक्षा(कैरुपा)यरात्मानं प्रकाश्य पुरुषस्य विनिवर्त्तते ॥छ॥

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः ।
गुणवत्यगुण[स्य] सतस्तस्यार्थमपार्थकं चरति ॥६०॥

नानाविधैरु[९१ब] पायैः शब्दस्पर्शरूपरसगन्धोपायैः। उपकर्तुं शीलमस्याः उपकारिणी । अनुपकारिणः पुंसः । न उपकारी अनुपकारी तस्यापनुकारिणः पुरुषस्यौ(स्यो)पकारिणी प्रकृतिरेवमेभिरुपायैरुपकृत्य पुरुषस्याहमन्या र्थ(त्व?)मन्य इति निवर्त्तते प्रवर्त्तते (प्रवृत्तेः?) प्रकृतिः । किञ्चान्यद् गुणवत्यगुणस्य सतस्तस्यार्था(र्थ)-मपार्थकं चरति । सत्त्वरजस्तमांसि त्रयो गुणा[ः] तैर्गुणैर्गुणवती प्रकृति[र]गुणस्य सन्तो(तो) नास्य गुणा[ः] सन्तीति अगुण एवं तस्यागुणस्य त(स)तः पुरुषस्यार्थमपार्थकं चरति । यथा कश्चिन्मित्रार्थं करोति न च तस्मात् किञ्चित् तकयति

*Or ०बुद्धिभावेनाहङ्कारभावेन, न being superfluous in बुद्धिभावेनना ।

तथा प्रधानं पुरुषमोक्षार्थं करोति । पुरुषोऽपि प्रधानस्य न किञ्चित् प्रत्युष(प)करोति ।

किञ्चान्यत् ॥छ॥

प्रकृतिः(तेः) सुकुमारतरं न किश्चिदस्तीति [९२अ] मे मतिर्भवति ।
या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥६१॥

प्रकृतिरपि प्रधानमधिकुरुते । यथा ह(यथेह) स्नुषा व्रीडत्यमाना त्वचरितं(व्रीडमाना स्वचरिते ?) गृहं प्रविशत्यसौ(तो?) ब्रवीत्यविशिष्टं तरेत्येवमेषं (ब्रवीतीयं विशिष्टतरेति, एवमेषा) प्रकृतिः सुकुमारतरेति तस्मात्प्रकृतेः सुकुमारतररत्नास्तान्य(सुकुमारतरं नास्त्यन्य)दित्यतिशयार्थस्तरशब्दो विशेषे वर्त्तते। तस्मात् प्रकृतेः सुकुमारतरं नास्त्यन्यदित्यति(०न्यदिति) । एवं पुरुषस्य परमात्मन(नो) मतिरुत्पन्ना। नास्तीति म(मे) मतिर्भवति । ममेति पुरुष आत्मानं ब्रवीति । तत्र सुकुमारं (सुकुमारतरत्वं) वर्णयति। ईश्वर[:] कारणमिति केचिदाचार्या ब्रू(ब्रु)वते । उक्तं हि—

अज्ञो जन्तुरनीशोऽयमात्मा(त्म)नः सुखदुःखयो[:] ।
ईश्वरप्रेरितो गच्छेत् स्वर्ग्गं वा श्वभ्रमेव वा ॥

[महाभारत ३.३१.२७]

वेदवादिन(नो) ब्रू(ब्रु)वते पुरुषः कारणमिति । अपरे स्वभाववादिनो ब्रू(ब्रु)वते [९२ब] स्वभावतः(स्वभावः) क(का)रणमिति । यस्मादाह ।

येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः ।
मयूराश्चित्रिता येन स नो वृत्तिं विधास्यति ॥

ईश्वरः कारणं न भवति । कस्मात्, निर्गुणत्वाद्, इमाश्च प्रजाः सगुणाः । सत्त्वरजस्तमांसि त्रयो गुणास्ते च प्रजासु सन्ति। तांश्च दृष्ट्वा साधयामः प्रकृति(ते)रिमाः प्रजाः समुत्पन्नाः । कस्माद्, यस्मादाह त्रिगुण(णा) प्रकृतिरित्युक्तम्। तथा त्रिगुणाया[:] प्रकृति(ते)स्त्रिगुणा इमा[:] प्रजा[:] समुत्पन्ना यस्मादाह यदात्मकं कारणं तदात्मकमपि कार्यं भवति। यद् (यत् or यथा)



शुक्लेभ्यस्तन्तुभ्यः शुक्ल एव पटो भवति, कृष्णेभ्यः कृष्ण एवं प्रधानादेव त्रिगुणास्त्र(त्त्र)यो लोकास्त्रिगुण(णाः) समुत्पन्ना इत्यनुगम्यते । यदीश्वरः प्रजाकार[णं] स्य ततो (स्यात्ततो) निर्गुणादीश्वरा[९३अ]न्निर्गुणा एवं(व) प्रजा[:]स्युरिति । न चैवं तस्मादीश्वरः क(का)रणं न भवति । एव(वं) पुरुषोऽपि द्रष्टव्यः । स्वभावो नाम न कश्चित् पदार्थोऽस्तीति(०ऽस्ति) यतः प्रजानामुत्पत्तिः स्यात् । तत्र यो ब्रूते स्वभावः क(का)रणमिति तन्मिथ्या। कालचिन्तकाः ब्रू(ब्रु)वते कालः क(का)रणमिति । यस्मादाह–

कालः सृजति भूतानि कालः संहरते प्रजाः ।

[महाभारत ३. १३. ७०. ५७]

कालः सुप्तेषु जागर्त्ति तस्मात्कालस्तु क(का)रणम् ॥ इति । साङ्ख्यो ब्रूते कालो नामः(म) न कश्चित्पदार्थोऽस्तीति । व्यक्तमव्यक्तं पुरुष इति त्रयः पदार्थास्तेषु कालोऽन्तभूताः(०र्भूतः)। एवं नास्त्यन्यत् कारणं प्रधान(नं) मुक्त्वेति । तत् प्रति यदा पुरुषस्य सम्यग् ज्ञानमुत्पद्यते तदा तेन ज्ञाने[न] दृष्ट्वा(ष्टा) प्रकृतिर्निवर्त्तते। तस्यां च विनिवृत्तायां [पुरुषो] मोक्षं गच्छति । एवमीश्वरादीन्यत्क(का)रणानि । सुकुमारतरमित्येतद्वाक्यशेषः कृतः । यस्मात् सुकुमारतरं प्रधानं तस्मादु[९३ब]च्यते सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति पुरुषस्य । अत्राह— सा दृष्टा पुरुषेण कथं निवर्त्तते प्रकृतिः । अत्रोच्यते—दृष्टाऽस्मीति न पुनर्(पुनर्न) दर्शनमुपैति पुरुषस्य । यथा काचित् साध्वी कुलस्त्री स्वगृहद्वारावस्थिता पुरुषेण सहसैवागतेन दृष्टा सा व्रीडामना (व्रीडमाना) त्वरितं गृहं प्रविष्टा । स एवमदृष्टा (सा एवं दृष्टाऽ)हमनेनेति न पुनर्दर्शनमुपैति पुरुषस्य । एवं प्रकृतिः परमात्मना पुरुषेण ज्ञानचक्षुषा [दृष्टा] सा व्रीडामना (सा व्रीडमाना) कुलस्त्रीवन्न पुनर्दर्शनमुपैति पुरुषस्य । तस्यां च विनिवृत्तायां पुरुषो मोक्षं गच्छति ॥

अत्राह—लोके शिष्टा वदन्ति पुरुषो बद्धः पुरुषो मुक्तः पुरुषः संसरति । अत्रोच्यते ॥छ॥

**तस्मान्न बध्यते न (नापि ?) मुच्यते नापि संसरति कश्चि[त्] ।**
**संसरति बध्यते मुच्यते च[९४अ]नाश्रयात् (नानाश्रया) प्रकृतिः।६२।**

पुरुषौ(षो) न बध्यते। कस्मात्, सर्व्वगतत्वादविकारित्वा(त्वा)न्निःक्रि(न्निष्क्रि)यत्वादकर्त्तृत्वाच्च। यस्माच्च न बध्यते य(त)स्माच्च न मुच्यते। यु(मु)क्त एव सः। अवबद्धः(अबद्धः) कुतो मुच्यते। कस्य मुक्तेन(कस्याभुक्तेन) विष्टव(विषूचिका ?) स्यात्। न च संसरति सर्व्वगतत्वात्। सर्व्वगतस्य बन्धमोक्षौ कुतः। अप्राप्ति(प्त)प्रापणार्थं गमनमित्युपदिश्यते। तेन च पुरुषेण सर्व्वं प्राप्तम्। यः(ये) पुरुषं न विन्दति(विदन्ति) त एवं वदन्ति पुरुषो बद्धः पुरुषो मुक्तः पुरुषः संसरतीति। अत्राह—यदि पुरुषस्य न मोक्षः संसारोऽपि, कस्यां(स्य) तर्हि। तदुच्यते—संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः। प्रकृतिरेवात्मानं बध्नाति मोक्ष(च ?)यति संसरतीति। य यत(यत्तत्) सूक्ष्मशरीरं पूर्व्वमुक्तं तन्मात्रिकं त्रयोदशविधेन संयुक्तं त्रिविधेन बन्धेन बद्धं सं[९४ब]सरति च प्रकृतिर्नानाश्रया। देवमानुषतिर्यग्योनिशरीराणामाश्रया(य)भूतेत्यर्थः। एवं यत् प्रधानं तत् सूक्ष्मशरीरं तत् प्रधानं प्रकृतिरित्य[न]र्थान्तरम्। तत्र यो ब्रूते पुरुष(षो) बद्धः पुरुषो मुक्तः पुरुषः संसरतीति तन्मिथ्या॥

अत्राह—कैर्गुणैः प्रकृतिरात्मानं बध्नातीति कैर्वा विमोचयतीति। अत्रोच्यते ॥छ॥

रूपैः सप्तभिरेवं बध्नात्यात्मानमात्मना प्रकृतिः।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ॥६३॥

रूपैरिति। सप्तभि[ः] रूपैः प्रकृतिरात्मानं बध्नाति। कति(त)मैस्तदुच्यते। धर्माधर्म(र्मा)ज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याण्येतानि सप्त रूपाणि। एतैः सप्तभि[ः] रूपैरात्मानं बध्नाति। किं चान्यै (चान्यत्), सैव पुरुषार्थं विमोचयतीत्येकरूपेण। किं तदेकरूपम्, ज्ञानम्। तेन ज्ञानेना[९५अ]त्मानं पुरुषाद्विमोचयत्येकेन।



किञ्चान्यत् ॥छ॥

एवं तत्त्वाभ्यासाना(न्ना)स्मि न मे नाहमित्यपरिशेषम्।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥६४॥

एवमिति। यथैव च तानि पञ्चविंशतितत्त्वानि पुरुषाद्यानि भूतपर्यन्तानि तेषामभ्यासस(स्त)त्त्वाभ्यासः। अभ्यासो नाम तत्त्वा(त्त्व)दर्शनं तस्मादभ्यासात् पुरुषस्य बुद्धिरुत्पद्यते अन्यच्छरीरमन्योऽहमिति ज्ञानमुत्पद्यते। नास्मि न्नतानि(तत्त्वानि) नाहं (न मे) तत्त्वानि नाहं तत्त्वानां किं तु प्राधानिकाने(न्ये)तानि [इति] विशेषज्ञानमुत्पद्यते इति एवमादि। अपरिशेषं निरवशेषमित्यर्थः। किं तज्ज्ञानं यस्मादाह अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्। विपर्ययः संशयो, न विपर्ययस्तस्मादविपर्ययादसंशयाद् यथाभू[९५ब]तदर्शनाद्विशुद्धं निरवद्यमध्या(व्या)मिश्रं केवलो(लं) ज्ञानमुत्पद्यते प्रादुर्भवति। किं तत्र ज्ञानं गुणपुरुषान्तरोपलब्धिरित्यर्थः।

अत्राह-तेन ज्ञानेन पुरुषः किं करोतीति। अत्रोच्यते ॥छ॥

तेन निवृत्तप्रसवामर्थवशात् सरे[सप्त]रूपविनिवृत्तः।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः ॥६५॥

यथा कश्चित्प्रेक्षको रङ्गस्थितो गीतवादित्रनृत्यादिभिः वर्त्तमानां नर्त्तकीं स्वस्थो निर्व्विकल्पः पश्यति एवं पुरुष आत्मगतेन ज्ञानेन सुह्यान्य(तासु तास्व ?)वस्थासु वर्त्तमानां प्रकृतिं पश्यति। इयं सा प्रकृतिर्या सर्व्वपुरुषाणामात्मानं बध्नाति यां च ज्ञानचक्षुषा पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः।

अत्राह-ज्ञानचक्षुषा दृष्ट्वा प्रकृतिं पुरुषः किं करोती[९६अ]ति। अत्रोच्यते ॥छ॥

**दृष्टा मयेत्युत्प्रेक्षके (०त्युपेक्षक) एको दृष्ट्वा(ष्टा)[ह]मित्युपरतैका।**
**सन्ति(ति) संयोगेऽपि तयो[ः] प्रयोजनं नास्ति सर्गस्य ॥६६॥**

यथेह लोके प्रेक्षको रङ्गगतानां मृतकि(रङ्गगतां नर्त्तकीं) सर्व्वास्ववस्थासु वर्त्तमानां दृष्ट्वा विरमति रङ्गात्, नर्त्तकी [अ]प्यहमनेन दृष्टेत्युपरमते नृत्तादेवं पुरुषोऽपि दृष्ट्वा(ष्टा) मयेयं ज्ञानचक्षुषा प्रकृतिः प्रेक्षकवदुपरमते मोक्षं गच्छतीत्यर्थः। तथा प्रकृतिरपि दृष्टाऽहमनेन पुरुषेणेत्युपरमत्येका। अत्राह–पुरुषः सर्व्वगतः प्रकृतिः सर्व्वगता तयोः संयोगस्तस्मात् संयोगात् पुनः शरीरस्योत्पत्तिरिति। अत्रोच्यते–सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य। यद्यपि प्रधानपुरुषयोः सर्व्वगतयोः संयोगो भवति, सति संयोगेऽपि शरीरोत्पत्ति[९६ब]प्रयोजनं नास्ति। यस्मात् प्रधानस्य पुरुषार्थवृत्तिः स चार्थो द्विविधः शब्दाद्युपलब्धिरादिगु(गु)णपुरुषान्तरोपलब्धे(ब्धि)रन्तरश्च(०रन्तश्च)। ब्रह्मादिस्थावरान्तेषु शब्दादि[भि]र्व्विषयैर्योजयितव्यो अन्ते च गुणपुरुषान्तरोपलब्ध्या मोक्षयितव्यः। एवं पुरुषस्य दर्शनार्थं संयोग(गः) कृतः एवं कृतप्रयोजनयोस्तयोः पुनः शरीरस्योत्पत्तिर्न्नास्ति। ऋणिकधारणिकदृष्टान्तो यथेह लोके ऋणिकधारणिकौ उत्तमाधमवर्णौ(उत्तमाधमर्णौ) देवदत्तयज्ञदत्तौ। यस्मिन् स ऋणं धारयते स उत्तमवर्ण्णेन (उत्तमर्ण्णेन) धर्मर्ण्णयो स्योक्त (अधमर्ण्ण उक्त) ऋणं मे प्रयच्छस्वेति। ततस्तेनाधमर्णेन चिरेणैव कालेन तस्मै ऋणं दत्तं ततस्तौ कृतप्रयोजनौ इतरेतरावप्यर्थेन संयुक्तम्(०र्थे न संयुक्तौ ?)। तयोर्यद(द्य)पि भूयः संयोगो भवति* तथापि नार्थकृ[९७अ]तः प्रयोजनाभावा:[त्]। यथा वृद्धसंयोगा[द्]पत्यं नोत्पद्यते तथा प्रधानपुरुषयो[:] कृतप्रयोजनयो[:] सर्व्वगतयोः संयोगेऽपि सति शरीरोत्पत्तिर्नास्ति प्रयोजनाभावात्। यत्तत्सर्गप्रयोजनमासी[त्] तत्सिद्धम्॥

किञ्चान्यत् ॥छ॥

सम्यग् ज्ञानाधिगमा[द्] धर्मादीनामक(का)रणप्राप्तिम्(०प्राप्तौ)।
तिष्ठति संस्कारवशाच्चक्रभ्रमवद्धृतशरीर[:] ॥६७॥

यदा पुरुषेण पञ्चविंशतितत्त्वज्ञानमधिगतं भवति तदा धर्मादीन्यकारण प्राप्नोति (०कारणानि प्राप्तानि) [बन्धनसमर्थानि] न

* M has here परस्परमर्थेन सन्त्यक्तावथ तयोर्भूयो संयोगो भवति।



भवन्ति। को दृष्टान्तः। यथेह लोके बीजान्यपि(ग्नि)दग्धानि न+ प्ररोहणसमर्थानि न भवन्ति एवं ज्ञानाग्निदग्धबीजानि धर्मादीनि बन्धनासमर्थानि भवन्ति। धर्मो येषामादि[:] तानीमानि धर्म्मादीनि अकारणानि। अकारणानां प्राप्तिरकारणप्राप्तिस्तस्य(०स्याम्) अकारणप्राप्तौ [९७ब] पुनर्य(र्ज)न्मं(न्म) न भवति। अत्राह–यदि सम्य[ग्]ज्ञानं(नाद् ?) मोक्षो भवति तदाचार्य[स्य ?] सम्यक् ज्ञानमुत्पन्नं किमर्थं मोक्षं न गतोऽसि। त्वत्प्रसादान्मया(मा)पि पञ्चविंशतितत्त्वज्ञानमुत्पन्नं किमहं मोक्षं न गच्छामीति। अत्रोच्यते–तिष्ठति संस्कारवशात्। संस्कारो नाम धर्माधर्मौ तयोर्व्वशः संस्कारवशस्तस्मात् संस्कारवशादिदं शरीरमवतिष्ठते। यस्मात्तौ धर्माधर्मौ निमित्तं कृत्वा शरीरोत्पत्तिर्भवति इह तिर्यग्योनौ देवलोके च तस्य संस्कारो(रेण ?) ग्रहणं, स च संस्कार[:] फलमदत्त्वा क्षयं न गच्छति उत्पन्नज्ञानस्यापि तस्मादिदं शरीरं विनाशं न गच्छति। यथा(दा) फलं दत्तं भविष्यति सुखदुःखादिकं धर्माधर्मौ च पूर्व्वकृतौ तदा विनाशं यास्यतः। तन्निमित्ताभावादिदं शरीरं न भविष्यति। तस्मिन् शरीरे पतिते वि[९८अ]द्वान् मोक्षं यास्यति। तस्मा[त्] हे[तो]रुत्पन्नज्ञानस्यापि धर्माधर्म्मवशात्तिष्ठति शरीरम्। अत्राह—को दृष्टान्तः अत्रोच्यते। चक्रभ्रमवदुद्धृतशरीरः। यथा कुलालस्य चक्रं भ्रमति(कुलालश्चक्रं भ्रामयति) घटं करिष्यामीति। स कुलालो घटं कृत्वा निक्षिप्य स्वस्थो भवत्येवत्येव(भवत्यव)-तिष्ठति। तस्मिंश्चावतिष्ठमाने चक्रं भ्रमत्येव। संस्कारवशात् कर्म्मवशादित्यर्थः। एवमेव कृतयोर्धर्म्माधर्म्मयोर्बलवत्त्वा[द्] दुर्बलत्वात् ज्ञानस्य उत्पन्ना(न्न) ज्ञानोऽपि विद्वान् संस्कारवशाच्चक्रु(क्र)-भ्रमवदुद्धृतशरीरः।

अत्राह–उत्पन्नज्ञानोऽपि विद्वान् कस्मिन् काले मोक्षं गच्छतीति। अत्रोच्यते ॥छ॥

प्राप्ते शरीरे(र)भेदे चरितार्थत्वात् प्रधानविनिवृत्तौ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥६८॥

\+ This न is superfluous.

प्राप्ते शरीरे(र)भेदे चरितार्थत्वात् प्रधानविनिवृत्तौ । शरीरस्य भेदः शरीरभेदस्तस्मिन् शरीरभेदे प्राप्ते शरीरनाम(श) इत्यर्थः । चरितार्थत्वात्। स चार्थो द्विविधः शब्दादिकः पू[९८ब]र्व्वमुक्तार्थ[स्त]स्य चार्थस्य चरितार्थत्वा[त्] इत्यर्थः । प्रधानविनिवृत्ति(त्तौ) । यदा पूर्व्वकृतयोध(र्ध)र्म्माधर्म्मयोः क्षयो भवति य(त)दा शरीरं भिद्यते । तस्मिंश्च शरीरे भिन्ने पूर्व्वोक्तेन ज्ञानेन प्रधानं निवर्त्तते । इह शरीरे यत् पार्थिवं तत् पृथिवीं प्रविशति, यदापं(प्यं) तदा(द)पः प्रविशति, यत्तो(त्तै)जसं तत्तेजः प्रविशति, यद्वायव्यस्त(०व्यं त)द्वायुं, प्रविशति, यदाकाशं तदाकाशं प्रविशति । एवमिदं शरीरं पञ्चधा भिद्यते। प्रधानं च कृतं(त)प्रयोजनं भूयोऽन्य[द्] द्वितीयं शरीरं नोत्पादयति विदुषः । एवमयं विद्वान् तस्मिन् शरीरे भिन्ने ए(ऐ)कान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति । ए(ऐ)कान्तिमे(म)वश्या(श्य)भावत्वात् । आत्यन्तिका(क)मपुनरावृत्तित्वात् उभयम(मा)ध्यात्मिकाधिदैविकाधिभौतिकोपरमात् । कैवल्यं मोक्ष इत्यर्थः । आ[९९अ]प्नोति *प्राप्नोतीत्यर्थः ॥

अत्राह– किंप्रयोजनमिदं ज्ञानमिति । अत्रोच्यते ॥छ॥

पुरुषार्थं ज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम् ।
स्थित्युत्पत्तिप्रलयाश्चिन्त्यते(न्ते) यत्र भूतानाम् ॥६९॥

क(य)श्चासौ पुरुषार्थो मोक्षस्तदर्थं पुरुषविमोक्षार्थं ज्ञानमिदमिति । यदेतत् पूर्व्ववर्ण्णितं ज्ञानमेतत् गुह्यं दुर्व्विज्ञेयमित्यर्थः । परमर्षिणा कपिलेन समाख्यातं कश्चित्त(कथित)मित्यर्थः । अत्राह–क(अ)स्मिन् ज्ञाने केऽर्थाश्चिन्त्यन्ते । अत्रोच्य[ते] स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम् । स्थित(तिः)[च] उत्पत्तिश्च प्रलयश्च ते भवन्ति[स्थित्युत्पत्ति]प्रलयास्ते चिन्त्यन्ते यत्र भूतानाम् । तत्र ब्रह्मादीनां देवानामष्टौ स्थानानि भवन्ति । मनुष्यश्चै(मानुष्यं चै)कविधं भूर्लो(लो)के पञ्चविधैस्तै(०विधं तै)र्यक्योनीनं(०र्यग्योनम्)। एषु स्थानेषु ब्रह्मादीनि तिर्यक्(ग्)योनि-

* प्राप्नोति is unnecessarily repeated in the manuscript.



पर्यन्तानि भूतानि तिष्ठन्ति । [९९ब] एषां(षा) स्थिति[ः]। उत्पत्ति प्रादुर्भावं [वक्ष्यामः] । प्रधानादुत्पद्यते बुद्धिः बुद्धेरहङ्कारः अहङ्कारात् पञ्चतन्मात्राण्येकादशेन्द्रियाणि च तन्मात्रेभ्यः सकाशात्पञ्चमहाभूतानि तेषामुत्पत्तिः । तथा भूतोत्पत्तिर्भावोत्पत्तिश्च प्रख्याता । एषामुत्पत्ती(त्ता)नां लयं वक्ष्यामो महाप्रलयकाले पञ्च महाभूतानि तन्मात्रेषु लीयन्ते तन्मात्राणीन्द्रियाणि चाहङ्कारे [स बुद्धौ] बुद्धिरपि प्रधाने*, प्रधानं न कुत्रचित् लयं गच्छति । एवमेव प्रलयः ।

अत्राह-यदेतद्भगवता व्याख्यातं पञ्चविंशतितत्त्वज्ञानं तस्य कुत आगत(म) इति अत्रोच्यते ॥छ॥

एतत् पवित्रमग्र्यं मुनिरासुरयेऽनुकप(म्प)या प्रददौ ।
आसुरिरपि पञ्चसिसि(०शिखा)य तेनेदं(तेन ?) बहुविधा(बहुधा ?)
कृतं तत्र (तन्त्रम्) ॥७०॥

एतत् विज्ञानमधिकुरुते । एतत् पवित्रम् । कथं पवित्रम् । यस्मान्न[१००अ] रकप्रेततिर्यग्योनिषु पतनात् त्रायते इति तस्मात् पवित्रम् । मार्ग्गं (अग्र्यं) श्रेष्ठत्वात् । वेदपुराणभारतमन्वादिभ्यो धर्म्मशास्त्रेभ्यः इदं पञ्चविंशतितत्त्वज्ञानमुत्तमम्। कस्मात्, ऐकान्तिकत्वा[त् आत्यन्तिकत्वा]च्च । मुनिर्भगवान् कपिलः आसुरिसगोत्राय ब्राह्मणाय वर्षसहस्रयायि(जि)ने तस्मै चानुकम्पया प्रददौ मोक्षार्थम् , अन्धे तमसि अज्ञाने+ अयं तपस्वी वर्त्तते इत्यनुकम्पया समुत्पन्नया मुनिर्भगवान् कपिलः । तदेव ज्ञानं भूया(भूय आ)सुरिसगोत्रा(त्रोऽ)नुकम्पया पञ्चशिखाय प्रददौ। तस्मादुच्यते आसुरिरपि पञ्चशिखायेति । तेन बहुधा कृतं तन्त्रम्। तेन पञ्चशिखेन बहूनां शिष्याणां प्रददौ (प्रदत्तम् ?) ।

"तमैव(तम एव) खल्विदमग्र्यमासीत् । तस्मिन् तमसि क्षेत्रज्ञः प्रथमोऽस्य(भ्य)वर्तत" इति । तम इत्युच्यते प्रकृतिः ।

* प्रधाने is unnecessarily repeated in the manuscript.

\+ अज्ञाने is unnecessarily repeated in the manuscript.

क्षेत्रज्ञः पुरुषः । तत्व(न्त्र)मिति षष्टि[१००ब]तन्त्रमित्यर्थः । षष्टिपदार्था यस्मिन् शास्त्रे तन्त्र्यते(न्ते) तत् । षष्टितन्त्रं ज्ञात्वा कुशलः किल विप्र ईश्वरः(र)कृष्णो नाम । तेनेश्वरकृष्णेन विस्तरग्रन्थग्रहणधारणभीरुणा(०रूणां) हितार्थं षष्टितन्त्रमभि(ति)-संक्षिप्तम् ॥

शिष्यपरंपरयागतमीश्वरकृष्णेन चैतदार्याभिः ।
संक्षिप्तमार्यमतिना सम्यग् विज्ञाय सिद्धान्तम् ॥७१॥

शिष्यपरंपरयागतमिति । कपिलादासुरिणा प्राप्तम् आसुरेः(रेः) पञ्चशिषे(खे)न पञ्चशिखाद्भार्गवोलूकवाल्मीकिहारीतप्रभृतीनां गतं, ततस्तेभ्यः ईश्वरं(र)कृष्णेन प्राप्तं तेनेदं षष्टितन्त्र-मार्याभिः संक्षिप्तमार्यमतिना विस्तीर्ण्णमति[ना] सम्यग्विज्ञाय सिद्धान्तम् । कार्यकारणसिद्धस्य शरीरस्यान्तो नपुनर्भावो मोक्ष इति तत्(तं) सिद्धान्तं षष्टितन्त्रमिति ।

सप्तत्यां किल येऽर्थास्तेऽर्था[ः] कृत्स्नस्य [१०१अ] षष्टितन्त्रस्य ।
व्या[आ]ख्यायिकावि[र]हिता[ः] परवादविर्व्जिताश्चेति ॥७२॥

ये षष्टितन्त्रे पदार्था अभिहितास्ते सप्तत्यां व्याख्याताः कथिताः । तदुच्यते-'पञ्चविपर्यय[भेदा' इत्यत्र चाभिहिताः पञ्चा-शत् प्रत्ययाः । इमे चान्ये दश मौलिकाः । तथा हि

"[अस्तित्वमेकत्वमथार्थवत्त्वं] परार्थ(पारार्थ्य)मन्यत्वमथो निवर्त्ति(निवृत्तिः) ।
योगो वियोगि(गो) बहवः पुमांसः स्थिति[ः] शरीरस्य च शेषवृत्तिः ॥"

Eighth Siddhi–यथा कश्चिद् दुर्भागश्चावाहनसंवाहनान्युषाप्रेषणादिना द्रव्यादानेन च गुरुमाराध्य सांख्यज्ञानमधिगम्य मोक्षं गच्छति—This can be emended as : यथा कश्चिद् दुर्भागश्चावाहनसंवाहनौषधिप्रेषणादिना द्रव्यदानेन च.......The person wins the favour of his guru by doing a few odd jobs for him and also by giving him money. M has here कश्चिदावाहनसंवाहनभिक्षापात्रवस्त्रच्छत्रकमण्डलुप्रभृतिदानेन गुरुनाराध्य...Our text has द्रव्यादानेन which should be emended as द्रव्यदानेन in view of च which follows. See प्रत्याश्रयौषधित्रिदण्डकुण्डिकादीनां ग्रासाच्छादनादीनां च दानेनोपकृत्य...–G. P explains the eighth siddhi at length and somewhat imaginatively. Unfortunately $V_2$ is missing here.

T explains दान as follows : दानं च शुद्धिर्विवेकज्ञानस्य, 'दैप् शोधने' [पाणिनि ६.४.६८] इत्यस्माद्धातोर्दानपदव्युत्पत्तेः।...सा च सवासनसंशयविपर्यासानां परिहारेण विवेकसाक्षात्कारस्य स्वच्छप्रवाहेऽवस्थापनम्– very interesting no doubt, but perhaps not intended by the author or the Sāṁkhya tradition. T gives the other interpretation also, though it does not approve of it.

८५अ. Kā. 51. The names of the siddhis as given in the different commentaries are as under :

$V_1$—आसां **सिद्धीनां पूर्वाचार्यैः** संज्ञाः कृतास्तारं सुतारं तारयन्तं प्रमोदं प्रमुदितं मोदमानं रम्यकं सदाप्रमुदितमिति.

M—आसामष्टानां . **पूर्ववन्नामान्तराणि**–तारं सुतारं तारतारं प्रमोदं प्रमुदितं मोहनं रम्यकं सदाप्रमुदितमिति ।

G—आसामष्टानां सिद्धीनां **शास्त्रान्तरे** संज्ञाः कृताः–तारं सुतारं तारतारं प्रमादं प्रमुदितं प्रमोदमानं रम्यकं सदाप्रमुदितम् इति ।

Y—तारकम् , सुतारम् , तारयन्तम्, प्रमोदम् , प्रमुदितम् , मोदमानम् , रम्यकम् सदाप्रमुदितम्–Same as the names in $V_1$.

J—तारम्, सुतारम् , तारवि(?), प्रमोदम् , प्रमुदितम् , मोदनम् , रम्यकम्, सदाप्रमुदितम्.

T–तारम्, सुतारम् , तारतारम् , प्रमोदम् , मुदितम् , मोदमानम् , रम्यकम् , सदाप्रमुदितम्—Same as in G.

$V_2$—missing.

P—These eight sorts of perfection are also called by **the sages of antiquity**: (1) Crossing by oneself, (2) Crossing well, (3) Crossing all, (4) Crossing with joy, (5) Crossing with an excessive joy, (6) Crossing with full joy, (7) Crossing by love, (8) Crossing by universal love.



Could तारयन्तम् in $V_1$ have been तारतारम् ? One cannot by sure. According to all, the asiddhis are just अतारम् , असुतारम् , etc.

Only J says तासां चासिद्धीनां मोषमुष्णामानोरमिष्याद्याः (?) संज्ञाः.

This is perhaps meant to show that they represent opposite attributes, and not just the absence of each other.

M quotes while explaining the सप्तमी सिद्धि a stanza from the Bhāgavata ( एषा आतुरचित्तानां.... 1.6.35). $V_1$ has no such quotation.

८५अ. एषा अष्टविधा सिद्धिः—This shows that the treatment of सिद्धि is over. Or it can also be एषा अष्टविधाऽसिद्धिः referring to the eight asiddhis.

८५ब. या असिद्धयः पूर्वोक्ताः–The term असिद्धयः is used here in the sense of what blocks siddhi. Earlier it had a specialised sense-the opposite of the siddhis. P has the expression : "There are then twenty-eight incapacities, eleven which are caused by the defects of the organs, and seventeen which are caused by the corruption of the Intellect." M does not have any such expression here. Earlier $V_1$ has enumerated इन्द्रियवध, अतुष्टि and 8 asiddhis as different aśaktis.

Kā 52. ८६अ. The first line of this kārikā is found both in the kārikā-text as also the pratīka as न विना भावैर्लिङ्गं न विना भावेन लिङ्गविनिवृत्तिः, which clearly requires emendation, as it is not in agreement with

the question posed as also the exposition of the kārikā.

The question answered in this kārikā according to $V_1$, M, J, P, is as to which of the two, भाव and लिङ्ग, is produced first. Kā. 52 answers that they are produced simultaneously, though J does not say so specifically in the exposition. According to Y and T one is not possible without the other and so they are mutually dependent, yet in view of the bījāṅkuranyāya, this is no fault. This is different from what $V_1$, M, J and P have to say. According to G and T, the question posed is whether the purpose of the Spirit could be accomplished by one of the two creations, लिङ्ग and भाव, or both are necessary. Y brings in the idea of अधिकारलक्षण सर्ग also, though it too says that kā. 52 refers to the saṁsāracakra.

Kā. 54. ८७ब. $V_1$ and Y read तमोविशालस्तु, while M, G, T. read तमोविशालश्च.

८९अ. Kā. 55. यदा तु तं प्रति निवर्त्तते महदादि लिङ्गम्...अत्राह-लिङ्गं केन निवर्त्तते.. This construction is awkward. M has instead यदा तु तत्प्रतिनिवर्त्तते महदादिलिङ्गम् ज्ञानोत्पत्त्या ततो मोक्षं प्राप्नोति । .... The expression in M is definitely better and more compact than in $V_1$. But compare सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण (kā. 63).

Kā. 56. ८९ब. $V_1$ has the first line of this kārikā as इत्येष प्रकृतिविकृतः प्रवर्तते वैकृतः प्रजासर्गः; this is not supported by any other commentary. See इत्येष प्रकृतिकृतः प्रवर्तते तत्त्वभूतभावाख्यः–Y, इत्येष प्रकृतिकृतौ महदादिविशेषभूतपर्यन्तः–G; इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः-J, T; इत्येष प्रकृतिकृतो महदादिविषयभूतपर्यन्तः–M. $V_1$ also should have even metrically इत्येष प्रकृतिकृतः



in a, though even the pratīka and the vṛtti both have the word प्रकृतिविकृतः. प्रवर्त्तते of b is found in Y also. $V_1$'s reading is certainly not very good, and the vṛtti has महदादिभूतपर्यन्त एष प्रकृतिविकृतः. Could there have been a gradual attempt to improve the wording of the kārikā. $V_1$ again has परार्थमारम्भः in d, while the others read परार्थं आरम्भः.

९१ब. Kā. 60. न च तस्मात् किञ्चित् तर्कयति—तर्कयति is used in a rather unusual sense—does not imagine or suppose that the other party would do something in return, does not expect anything of it. M has प्रत्युपकारमनपेक्ष्य कुरुते । and G नात्मनः प्रत्युपकारमीहते.

९२अ. Kā· 61. $V_1$ feels that there is nothing else with which prakṛti could be compared, so तरप् does not signify superiority, but signifies excellence—'very delicate'. M has not touched this point as the wording of the kārikā is quite clear. There is nothing more delicate than prakṛti. Unfortunately $V_2$ is missing here. P is like $V_1$ here.

९२अ. Kā. 61. The stanza from the MBH is given in M as...स्वर्गं नरकमेव वा.

$V_1$ does not give any quotation from the Upaniṣads in support of the view of the Vedavādins. M quotes पुरुष एवेदं सर्वम् (Śvet. Up. 3.15).

९५अ. Kā. 64. प्राधानिकान्येतानि [इति] विशेषज्ञानमुत्पद्यते-We would expect here अपरिशेषं ज्ञानम् here. But the text is alright as it stands, - the knowledge of difference of prakṛti and puruṣa. M does not have any such expression here. G explains अपरिशेषम् as अहङ्काररहितम्,

the ego-consciousness also disappears. This shows Gauḍapāda the Vedāntin peeping in. This agrees with the Sāṁkhya doctrine, but is not supported by any of the commentaries.

Ka. 65. ९५ब. सप्तरूपविनिवृत्तः—$V_2$ also has this reading, though neither $V_1$ nor $V_2$ care to explain it. The other commentaries have the reading सप्तरूपविनिवृत्ताम्- as an epithet of prakṛti–'which has turned away from the seven rūpas, dharma, etc.' P says 'ceases to produce and finishes by abandoning her functions.'

९६ब. Ka. 66. यस्मिन् स ऋणं धारयते स उत्तमवर्ण्णेन धर्मर्ण्णयो स्योक्त ऋणं मे प्रयच्छस्वेति–This expression appears confused. According to the grammarians, the word signifying the creditor (उत्तमर्ण) is put in the dative or genitive. So we should have had यस्मै (or यस्य) स ऋणं धारयते स उत्तमर्ण्णः । तेन अधमर्ण्ण क्त :–ऋणं मे प्रयच्छस्वेति । But the author has used the locative. M has here : योऽस्मिन् ऋणं धारयति स उत्तमर्णस्तेनाधमर्ण उक्तः–ऋणं मे देहीति । M has used धृ in the sense of 'to lend'. Moreover we have the expression ऋणिकधारणिकौ (Compare Gujarati 'dhīravuṃ') (ऋणिक, debtor; धारणिक, lender). The author of $V_1$ also seems to have used धृ in the sense of 'to lend'. So the text can be emended as यस्मिन् स ऋणं धारयते स उत्तमर्ण्णेन अधमर्ण्ण उक्तः···(=यस्मिन् स ऋणं धारयते सः अधमर्ण्णः उत्तमर्ण्णेन उक्तः...) which is clearly improved upon by M in योऽस्मिन् ऋणं धारयते स उत्तमर्णस्तेनाधमर्ण उक्तः.

९६ब. Ka. 66. इतरेतरावप्यर्थेन संयुक्तम् –This is confusing. M has परस्परमर्थेन सन्त्यक्तौ, which is simple, but does not help us. $V_2$ has here–ततस्ताभ्यां कृतप्रयोजमाभ्यां



इतरोऽप्यर्थेन संयुक्तः । अपरोऽपि ऋणी मुक्तः । एवं तयोः दृष्टः (भूयः) संयोगो भवति । न संयोगस्तु प्रयोजनं करोति । 'Of these two, one get his wealth and the debtor is freed' So इतरेतरा... could also mean, "each one of these two is associated with what is desired by him, or with what is his goal.' Could it be इतरेतरावप्यर्थेन संयुक्तौ ? Or ०प्यर्थे न संयुक्तौ in view of what follows ?

१००अ. Ka. 70. तेन च बहुधा कृतं तन्त्रम्—$V_1$ and M explain this by saying that it was imparted to a number of pupils.

The passage तम एव...seems to say what this तन्त्र was. Scholars interpret this passage as giving an explanation of the word तन्त्र. Could this have been the teaching of Kapila given as the first sentence in the षष्टितन्त्र written by पञ्चशिख (?) ? Īśvarakṛṣṇa abridged the षष्टितन्त्र in his सांख्यकारिका. In $V_2$ the scribe seems to have omitted much–संक्षिप्तं ज्ञानं क्षेत्र इत्युच्यते पुरुषः । एवं संक्षिप्तमिदं ज्ञानमार्यमतिना दत्तमासुरये तेनापि तदेव ज्ञानं संक्षिप्तं पञ्चशिखाय दत्तम् । [तेन पञ्चशिखेन...]. After संक्षिप्तं ज्ञानम् , there should have been तम एव... । तम इत्युच्यते प्रकृतिः–This must have been the original teaching which was fully explained by Pañcaśikha (?)in his Ṣaṣṭitantra. Ṣaṣṭitantra seems to signify the name of the work in which 60 topics or categories were treated, as can be seen from विस्तरग्रन्थग्रहणधारणभीरूणां हितार्थं षष्टितन्त्रमतिसंक्षिप्तम्.

१००ब. Ka. 71. $V_1$ mentions Bhārgava, Ulūka, Vālmīki, Hārīta, while M mentions in addition Devala.

**१०१अ.** तदुच्यते–पञ्चविपर्यय–The leaf is broken at this end, so something like पञ्चविपर्ययात्मन्व...can be read and the next line starts with परार्थ. If M can be our guide here, the scribe seems to have omitted some words (about half a line) and the passage should be as it is given in the text. This verse differs in wording from the verses in Y (–the author's own composition–) which are quoted by T. But J has : तथा चाह संग्रहकारः–

अस्तित्वमेकत्वमथार्थवत्त्वं पारार्थ्यमन्यत्वमकर्तृभावः ।
योगो वियोगो बहवः पुमांसः स्थितिः शरीरस्य च शेषवृत्तिः ॥ (J, 51)

**१०१ब.** Ka. 73. शास्त्रम् तीर्थोदकमहद्वलम्–Here the scribe clearly seems to have omitted a few words before शास्त्रम् . M has here शास्यते येनोत्पथादिति शास्त्रम् । तीर्थोदकमहत्फलम्.

**१०२ब.** Ka. 73. स्वल्पेऽपि दर्पणे महतो रूपस्य व्यक्ति... Here the leaf in broken, and the lower portions of some letters can be seen; it is difficult to say what the words could have been, but about 9 letters seem to be missing. Hence our conjecture (व्यक्तिर्जायते एवमल्प) शास्त्रे... M has here महतो रूपस्य निरूपणं स्यात् । एवमल्पशास्त्रे षष्टितन्त्रस्य कृत्स्नस्यापि व्यक्तिरभिहितेत्यर्थः ।

**१०२ब.** कृतिराचार्यम...स्येति–It is very unfortunate that the leaf is broken here. A fragment of a letter can be seen after म; it could have been ह or ध. The following letter–may be even two–is missing. Had the name been preserved, this could have thrown much light on the history of the commentaries on the Sāṁkhya-kārikā. We have seen that what is known as Māṭhara's commentary is clearly a revised version of $V_1$.

---

## Appendix 1

### Passages found in $V_1$ but not in M

(1) Kā. 1. After दुःखत्रयाभिघाताज्जिज्ञासा समुत्पन्ना—
ज्ञातुमिच्छा जिज्ञासा, यथा पातुमिच्छा पिपासा, सोऽर्थः ।

(2) Kā 1. After तदाध्यात्मिकं वैद्या ब्रुवते—

आ नाभेर्वातस्थानम्, आ हृदयात् पित्तस्थानम्, आ मूर्द्ध्नः श्लेष्मस्थानमिति त्रयाणां त्रीणि स्थानानि ।

$V_1$ mentions how one of the humours is predominant and gives a list of certain bodily diseases. It mentions ईप्सितस्य अलाभः as one of the causes of मानस दुःख besides प्रियविप्रयोग and अप्रियसंप्रयोग, and tries to illustrate all the three.

(3) Kā. 1. यथा राजपुत्रो राज्ञः सकाशादुत्पन्नो राज्ञ एव वधं करोति ।

(4) Kā. 1. After शलाकी दुःखप्रतिकारं करिष्यतीति :

क्लीबस्यापि सर्व्वमिदं दृष्टम् .......।
गोधूमचूर्ण्णं सघृतं ......॥
चटकशिरः सकुलीरं.......॥
एवमपि जरागृहीतस्य......
भृङ्गराजरसप्रस्थद्वयं......॥
बलाकानां तदर्थवमनविरेचनं कृत्वा प्रतीचारं करिष्यतीति ।

(5) Kā. 2. After वृक्षं छित्त्वा पशून् हत्वा...$V_1$ gives a few examples of Vedic rites involving some immoral acts and then says : अथ स्मृतावप्युक्तम्

न ध(न)र्म्मयुक्तमनृतं हिनस्ति न स्त्रीषु राजन्न विवाहकाले ।
प्राणात्यये सर्व्वधनापहारे पंचानृतान्याहुरपातकानि ॥

(6) Kā. 2. After कर्मफलोपभोगात्पतनं दृष्टम्—

तस्मादाह—बहूनीन्द्रसहस्राण्यादितेयानां युगे युगे ।
कालेन समतीतानि कालो हि दुरतिक्रमः ॥

(7) Kā. 2. At the end of the commentary on this kārikā :

उक्तं च—पञ्चविंशतितत्त्वज्ञो यत्र यत्राश्रमे रतः ।
प्रकृतिज्ञो विकारज्ञः सर्व्वैर्दुःखैर्विमुच्यते ॥

(8) Kā. 4. After सा ऐतिह्यमित्युच्यते धर्म्मशास्त्राणीत्यर्थ :–

अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणी ।
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम् ॥

(9) Kā. 23. $V_1$ defines the siddhis. M does not; it enumerates the siddhis, including garimā also among them. $V_1$ briefly explains the contraries of dharma, etc. also; M does not.

---

## Appendix 2

### Passages found in M, but not in $V_1$

(1) Maṅgala stanzas :

सर्वविद्याविधातारमादित्यस्थं सनातनम् ।
नतोऽस्मि परया भक्त्या कापिलं ज्योतिरीश्वरम् ॥१॥
नमस्कृत्य तु तं तस्य वक्ष्ये ज्ञानस्य कारणम् ।
हिताय सर्वशिष्याणामल्पग्रन्थसमुच्चयम् ॥३॥

(2) Kā. 1. After अस्या आर्याया उपोद्घातः क्रियते—

स्थानं निमित्तं वक्ता च श्रोता श्रोतृप्रयोजनम् ।
संबन्धाद्यभिधानं च उपोद्घातः स उच्यते ॥

(3) Kā. 1. After गुरुकुलमभिगत इति—

तथा हि–'तत्तपः स जपः सा धीस्तज्ज्ञानं सा च वैदुषी ।
यतो नैव निपातः स्यादन्तःसंसारसागरम् ॥' इति श्रवणात् ।



किञ्च—इहोपपत्तिर्मम केन कर्मणा क्व च प्रयातव्यमितो भवादिति ।
विचारणा यस्य न जायते क्षितौ कथं स धर्मप्रवणो भविष्यति ॥
तस्मात्समीचीनमिदं यदस्येति जिज्ञासा समुदपादि ।

(4) Kā. 1. After किं कपिलोपसर्पणेनेति भावः ।—

तथा च लौकिकानामाभाणकः—
अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् ।
इष्टस्य लीलया सिद्धौ को विद्वान् यत्नमाश्रयेत् ॥

(5) Kā. 1. After the verse पुष्पिताक्षः शलाकी च....–

किञ्च नास्ति सम्यग्धातुपरिज्ञाननिपुणतया भैषज्यम् तथा हि—
यानि कानि च मूलानि येन केन च पेषयेत् ।
यस्मै कस्मै च दातव्यं यद्वा तद्वा भविष्यति ॥

अन्यच्च—कार्याथिजनद्रव्यभक्षणाय, स्वशक्तिख्यापनाय च स्वल्पमपि रोगं पुरस्ताद्वर्धयन्ति भिषजः । ततश्च कदाचिदसौ तेषामेवासाध्यतामायाति । तथा च—

वैद्य वैद्य नमस्तुभ्यं क्षपिताशेषमानव ।
त्वयि विन्यस्तभारोऽयं कृतान्तः सुखमेधते ।

(6) Kā. 2. After 'ब्रह्मणे ब्राह्मणमालभेत...' इत्यादिश्रवणात्—

किञ्च—यथा पङ्केन पङ्काम्भः सुरया वा सुराकृतम् ।
भूतहत्यां तथैवेमां न यज्ञैर्मार्ष्टुमर्हति ॥ [भागवत १.८.५२]
न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुद्ध्यतः ।'

'तद्यथाऽस्मिन् लोके मनुष्याः पशूनश्नन्ति तथाभिभुञ्जत एवममुष्मिन् लोके पशवो मनुष्यानश्नन्ति' [शा. ब्रा. ११.२] इति श्रुतिवचनात् ।

(7) Kā. 2. (i)After अव्यक्तं प्रधानम्—

व्यक्तोत्पत्तिकारणम् । न ह्यकारणं कार्यमित्यस्य सिद्धिः ।

(ii) After ज्ञः पुरुषः –

सन्निधिसत्तामात्रेण चुम्बक इव लोहस्य प्रवृत्तिकारणम् ।

अतः प्रधानस्य जडस्य प्रवृत्तिहेतुरयमस्तीति सिद्धिः ।

(8) Kā. 5. After तदुक्तमाप्तवचनम् :—

तत्रापि प्रसिद्धिलक्षणागुणयोगास्तिस्रः शब्दवृत्तयः । तत्र लक्षणात्रैविध्यम् । जहल्लक्षणाऽजहल्लक्षणा जहदजहल्लक्षणा चेत्यादि प्रमाणशास्त्रेषु बहुतरः प्रपञ्च

आस्ते । तत्र प्रकान्तमेव तावदभिधीयते भगवतः कपिलस्य मतम् ।

(आगमो ह्याप्तवचनं... This verse is found in $V_1$ on Kā. 4.)

स्वकर्मण्यभियुक्तो यो रागद्वेषविवर्जितः ।
पूजितस्तद्विधैर्नित्यमाप्तो ज्ञेयः स तादृशः ॥

(9) Kā. 9. After साधितमेवमेतैः पञ्चभिर्हेतुभिः सत् कार्यम् :–

'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तद्धैक आहुरसदेवेदमग्र आसीत्' इत्यारभ्य 'सत्त्वेव सोम्येदमग्र आसीत् [छा. उप. ६. २. १-२] इति श्रुते : ।

(10) Kā. 15. After इत्थं त्रयो लोकाः प्रलयकाले प्रधानेऽविभक्ताः–

प्रकर्षेण धीयते स्थाप्यते अत्राखिलमिति प्रधानम् । ततो हि सृष्टौ सदेवाविर्भवति । न ह्यसतः उत्पत्तिर्न च सतोऽभावः । 'नासतो विद्यते भावो नाभावो विद्यते सतः ।' इति गीतासु [२.१६], सदेव सोम्येदमग्र आसीत् [छा. उप. ६. २.१] इति श्रुतेश्च ।

(11) Kā. 17. Introductory–After यथा असिकोशवत् मुञ्जेषीकावत्—

उक्तं च–मशकोदुम्बरेषीकामुञ्जमत्स्याम्भसां यथा ।
एकत्वेऽपि पृथग्भावस्तथा क्षेत्रात्मनोर्नृप ॥

(12) Kā. 22. After तस्य इमे पर्यायाः–वैकृतस्तैजसो भूतादिरभिमानोऽस्मिता इति–चतुःषष्टिवर्णैः परादिवैखरीपर्यन्तामिधेयैर्यत्किमप्यभिधीयते बुद्ध्या समर्थ्यं तत्सकलमाद्यन्ताकारहकारवर्णद्वयग्रहणेनोपरिस्थितपिण्डीकृतानुकारिणा बिन्दुना भूषितः प्रत्याहारन्यायेनाहङ्कार इत्यभिधीयते ।

(13) Kā. 22. After इति सृष्टिक्रमः—

अत एव भूतानामुत्पत्तिलयावबोधनात् भ इति । आगतिगतिपरिज्ञानात् ग इति । विदन् योगी इति व । अनति चरतीति अन् । सकलवर्णसंप्रदायाद् भगवानित्यभिमानसिद्धिः । 'अप्यक्षरवर्णसामान्यान्निर्ब्रूयान्न संस्कारमाद्रियेत (नि. २.४) इति नैरुक्तश्रुतिप्रामाण्यात । उक्तं च—

'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥'

श्रीविष्णुपुराणे षष्ठे अंशे पराशरवचः ।



(14) Kā. 23. After एभिर्यमनियमैर्यः साध्यते स धर्मः—

धारणार्थो धृञित्येष धातुः शाब्दैः प्रकीर्तितः ।
दुर्गतिप्रपतत्प्राणिधारणाद् धर्म उच्यते ॥

(15) Kā. 23. After अष्टाङ्गं ब्रह्मचर्यमिति—

अन्यच्च । ब्रह्मबीजं रेतस्तच्चरति न मुञ्चतीति ब्रह्मचारी । ब्रह्म वेदं वा गुरुणा प्रदत्तं चरतीति । ब्रह्मा स्वयम्भूस्तस्यायं दण्डकमण्डलुधारणादिरूप आकारो ब्रह्मवत्तच्चरतीति वा ।

(16) Kā. 23. After तच्छौचं बाह्यं मृज्जलादिना—

अभक्ष्यपरिहारस्तु संसर्गश्चाप्यनिन्दितैः ।
स्वधर्मे च व्यवस्थानं शौचमेतत्प्रकीर्त्तितम् ॥

(17) Kā. 23. After आहारलाघवं सन्तोषः ।

"स यां प्रथमामाहुतिं जुहुयात् प्राणाय स्वाहा" (छा. उप. ५.१९.१) इत्यारभ्य ' सय इदमविद्वानग्निहोत्रं जुहोति यथाङ्गारानपोह्य भस्मनि हुतं तादृक् तत् स्यात्' (छा. उप. ५.१४.१) इति श्रुतेः ।

(18) Kā. 37. After the example of king and minister,

स्वैरिणीव कामुकं मूढविज्ञानं घ्राणाद्युपचारैः । बुद्धिप्रेरिता अहंमनोबुद्धिकर्मेन्द्रियाख्या विषयान् न स्वार्थं न च बुद्ध्यर्थं किं तु पुरुषार्थमेव साधयन्ति । यथा सलक्ष्मीकस्वैरिणीगृहे दास्यस्तदादेशेन रसवतीं न स्वार्थं न च स्वामिन्या-वस्थितस्वैरिण्यर्थं किं तु तयापहृतविवेकविज्ञानस्य कामुकस्य कृते निर्वर्तयन्ति तद्वत् । यावदसौ विमूढस्तावदनया बुद्ध्या स्वैरिण्येव कामुको विषयैरुपह्रियते । यदाऽसौ कथमपि गुरुशास्त्रात्मानुभवादिभिरात्मानं चेतयते तदा स्वैरिणीव बुद्धिरपि पुरुषं विहाय संशाम्यति । ततोऽसौ केवलतयाऽवतिष्ठते । तदनुभवावस्थितिर्मुक्तिरिति यत् किञ्चिदिदमप्रस्तुतम् । प्रस्तुतमुच्यते ।

(19) Kā. 37. After सूक्ष्मत्वादतीव दुर्बोधमिति यावत्—

बुद्धिर्हि अध्यवसायात्मिका स्वव्यापारेण चाध्यवसायेन साधयति । अहङ्कारेन्द्रियतन्मात्रभूताध्यवसायेन जगत् प्रधानपुरुषान्तरविवेचनेन विविच्य स्वयं म्रियते । अत एवोक्तम्–'अहङ्कारो धियं ब्रूते मैनं सुप्तं प्रबोधय ।

प्रबुद्धे परमानन्दे न त्वं नाहं न तज्जगत् ।
मयि तिष्ठत्यहङ्कारे पुरुषः पञ्चविंशकः ।
तत्त्ववृन्दं परित्यज्य स कथं मोक्षमिच्छति ॥

योऽसौ सर्वेश्वरो देवः सर्वव्यापी जगद्गुरुः ।
देहीति पदमुच्चार्य हा मयात्मा लघुः कृतः ॥'

(20) Kā. 38. After देवानां निर्विशेषा विषयाः तन्मात्रसंज्ञिताः—

निर्विशेषाः केवला एवानन्दमयाः शान्तघोरमूढतयाऽविशिष्टाः स्वभावरूपाः शर्कराकटुतिक्तादिरसा निश्चितं स्वभवामाधुर्यामृता उपमेयसुखशालिक्षीरमिव । माधुर्यक्षारकटुत्वादिपार्थिवगुणसंपृक्तं स्वभावरसं जलमिवामी विषयाः (?) ।

(21) Kā. 39. After मातृ रुधिरं पितुः शुक्रम्—

वेदान्तवादिनोऽप्येवमाहुः । प्राणिनः स्वर्गनरकादिषु स्वकर्मभोगानन्तरमत्राजिगमिषवः सोममण्डले लीना भूत्वा वृष्टयो भवन्ति । ततोऽन्नम्, तत् स्त्रीपुंसाभ्यामुपभुक्तं शुक्रशोणिते, ततः पुरुषः । 'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसः (छा. उप. ५. ३.३) इत्यारभ्य इति तु पञ्चम्यामाहुतावापः' (छा. उप. ५. ९.१) इत्याहुः । पुराणेष्वपि—

सोमवृष्ट्यन्नरेतांसि पुरुषस्तत्र पञ्चमः ।
स जीवत्यमये पश्चाद्धरन्त्यस्मायतोऽभवत ॥' इति ।

(22) Kā. 39. After मोक्षं गच्छति—

उक्तं च–"देहे मोहाश्रये भग्ने युक्तः स परमात्मनि ।
कुम्भाकाश इवाकाशे लभते चैकरूपताम् ।
'यथा दर्पणाभाव आभासहानौ' इत्यादि

(23) Kā. 48. After देवाना..... अविशेषाः—

केवलानन्दरूपा निरुपाधिदुग्धवच्छान्तादिसङ्घातसुखादिविरहिता ये भवन्ति स्वर्गप्राप्तौ ।

(24) Kā. 48. After सोऽन्धतामिस्र इत्युच्यते—
दश विषयानैश्वर्यं प्राप्यापि भोक्तुं न लभतेऽन्तरालेऽपि म्रियत इति यावत् ।

(25) Kā. 51. After सुहृत्प्राप्तिरिति–ते हि सुहृदस्तथोपदिशन्ति सुहृत्तया यथा पाषाणोऽप्यवबुध्यते । उक्तं च—

"एषा आतुरचित्तानां मात्रास्पर्शेच्छया विभुः ।
भवसिन्धुप्लवो दृष्टो यदाचार्यानुवर्तनम् ॥"



(26) Kā. 59. After केवलः पुरुषो दुःखत्रयं नानुभवति—
यथा जलवाहकस्य घटाभावे तदाधेयस्योदकस्याभावः तथा दुःखाभावः । ततोऽसौ (मोक्षं गच्छति).

(27) Kā. 60. At the end–तत् प्रधानपुंसोः शिखिपिच्छवदेकपक्षचित्रन्यायः.

(28) Kā 68. Introductory.
उत्पन्नज्ञानः फलनिरपेक्षं कर्म निर्बीजं कुर्वन्न देहमारभते, आरब्धफलं यावत् जन्मदायि 'नाभुक्तं क्षीयते कर्म' 'अवश्यमेव भोक्तव्यं कृतम्' इति क्षपयन्' अनारब्धफलेषु 'यथैधांसि समिद्धोऽग्निः' (गी. ४. ३७) इति परिहारेण भस्मीकरणम् । एवं कर्मणां ध्वंसे,...

(29) Kā. 68. After ऐकान्तिक...अपुनरावृत्तित्वात्—
सर्वथेत्यर्थः । न त्वौषधादिवत् कादाचित्करोगनिवृत्तिवत् । न च निवृत्ते रोगे पुनः संभवेदित्युभयोदाहरणमैकान्तिकात्यन्तिकयोः ।

---

# Appendix 3

## Noteworthy difference in expression in $V_1$ and M in certain passages

| | $V_1$ | *Remarks* | M |
|---|---|---|---|
| (1) Ka. 1. | अस्यामार्यायामुपोद्धात उच्यते । | M's style is obviously influenced by Purāṇic accounts and expressions and shows M to be later than $V_1$. | अस्या आर्याया उपोद्घातः क्रियते । |
| (2) Ka. 1. | इह हि भगवान् महर्षि: कपिलो नाम बभूव । तस्योत्पद्यमानस्याकस्माच्चत्वारो भावा: समुत्पन्ना... स तेनात्मज्ञानेन सहोत्पन्नज्ञानो भगवानिदं जगदन्धे तमसि वर्त्तमानं ददर्श । तद् दृष्ट्वा तस्य कारुण्यमुत्पन्नम् । अहो खल्विदं जगदन्धे तमसि वर्त्तते संसारपारंपर्येण । स एवमुत्पन्नकारुण्यो भगवान् महर्षिश्चिन्तयितुमारब्धः ।<br><br>स एवं विचिन्त्याऽऽसुरिसगोत्रं ब्राह्मणविशेषं वर्षसहस्रयाजिनं दृष्ट्वान्तर्हितो भूत्वा वाचमुवाच....स एवमुक्तो निर्ज्जगाम । भूयोऽपि द्वितीयवर्षसहस्रे पूर्ण्णे प्रत्यागम्योवाच...तत् श्रुत्वा पुनः स भगवान्निर्ज्जगाम । भूयोऽपि तृतीयवर्षसहस्रे पूर्णे प्रत्यागम्योवाच...स तमुवाच-न भो रमेऽहम् । स तेनोक्तः किं कृत्वा, अब्रवीत् 'दु:खत्रयाभिघाताद्' इति । ततः स तेनोक्तो भगवता-उत्सहसे ब्रह्मचर्यवासं वस्तुमिति (वस्तुं यदि) तदमोषां दुखानां निरोधमार्गं वयमुपदेक्ष्यामः । सोऽब्रवोत्-बाढं शक्त इति । स एवं गृहस्थधर्म्मं परित्यज्य पुत्रदारांश्च प्रव्रजितो भगवतः कपिलस्य शिष्यो बभूव । | | इह हि भगवान् महर्षि: सांसिद्धिकधर्मज्ञानवैराग्यैश्वर्यसंपन्नो भगवतः पुराणपुरुषस्यावतारो जगदनुजिघृक्षया प्रजापतेः कर्दमस्य पुत्रः स्वायम्भुवस्य मनोर्दुहितरि देवहूत्यां कपिलो नाम बभूव । स तेन गुणपुरुषान्तरोपलब्धिरूपेण ज्ञानेनापारपारं दिदर्शिषया हस्तावलम्बेनेव, कालाहिदन्दश्यमानजगतः सुधामणिनेव, दुश्चिकित्स्यस्य भवव्याधेरपनयनाय सम्यगौषधेनेव, अविद्यान्धकारप्रध्वंसनप्रदीपेनेव, मुक्तिमार्गविरोधिमोहवृक्षविव्रश्चनकुठारेणेवासुनावबोधेन संपन्नोऽन्धे तमसि मज्जज्जगदिदमद्राक्षीत् । तदवलोक्यास्य कारुण्यमुदपादि अहो खल्विदं जगदनादिकालसम्बद्धं निसर्गादेव अन्धे तमसि वर्तते इति । अथासौ महायोगी कथमस्य वराकस्य अन्धे तमसि वर्तमानस्य विश्वस्यानुग्रहः कार्य इति समुत्पन्नकारुण्यो मनसि चिन्तामापेदे ।<br><br>स एवं विचिन्तयन् आसुरिसगोत्रं ब्राह्मणविशेषं वर्षसहस्रयाजिनमधिकारिणमवगत्य ब्रह्मोपदेशविवक्षया अतन्द्रितो भूत्वा वाचमित्यु(०मित्थमु)वाच...स एवमुक्तो मुनिरीषदनिष्पन्नविवेकवैराग्योऽयमिति व्यवस्य निर्गम्य भूयोऽपि द्वितीये वर्षसहस्रे पूर्णे प्रत्यागत्य तथैवाभ्युवाच....अथासौ महायोगीन्द्रस्तथैव निर्गम्य तृतीये वर्षसहस्रे संपूर्णे अभ्येत्योवाच...स तमुवाच न रमे भो इति । अथ स भगवता उक्तः-कथमिति । पुनराह आसुरिः 'दुःखत्रयाभिघातात्' इति । अथाह कपिलः-तात उत्सहसे ब्रह्मचर्यवासं वस्तुं यदि तदामीषां दुःखत्रयाणां प्रतीकारं वयमुपदेक्ष्यामः । सोऽब्रवीत्-'भगवन् बाढं शक्तोऽहं भगवतामादेशमनुगन्तुम्' इति स एवं गृहस्थधर्ममपहाय पुत्रदारादिकं च, प्रव्रजितो भगवतः किल कपिलाचार्यस्य योगिनः प्राणाः शिष्यो बभूव । |
| (3) Ka. 1. | तस्यैवं वक्तव्यम्...किं कृत्वा कृतार्थतामेमीति.... | | तत्रायं प्रतिवादः ।....किं कृत्वा कृतार्थः स्यामिति.... |

| | $V_1$ | *Remarks* | M |
|---|---|---|---|
| (4) Kā. 1. | कानि पुनस्तानि दुःखानि यैरभिहतो गुरुकुलमभिगत इति । अत्रोच्यते आध्यात्मिका...दैविकानि त्रीणि दुःखानि । तत्राध्यात्मिकं द्विविधं.... | $V_1$ is very elaborate here–it mentions the sthānas of vāta, pitta and śleṣman, some diseases, the vaiṣamya of the humours; it also illustrates mānasa ādhyātmika. M does not mention 'īpsitasya alābhaḥ' as a case of mānasa ādhyātmika duḥkha, nor does it illustrate any. | किं पुनस्तद् दुःखत्रयं, तदाह–आध्यात्मिकम्....तत्र प्रथमं द्विविधं शारीरं मानसं च । तत्र शारीरं वातपित्तश्लेष्मणां देहधातूनां वैषम्याद् दुःखमात्मानं देहमधिकृत्य ज्वरातीसारादि प्रवर्तते । मानसं प्रियवियोगादप्रियसंयोगाच्च द्विविधम् ।। एतदाध्यात्मिकं दुःखमभिहितम् । |
| (5) Kā. 1. | आधिभौतिकं वक्ष्यामः–मानुष ... स्थावरनिमित्तम् । तत्र मानुषश्च पशुश्च... तानीमानि मानुष...स्थावराणि एतानि निमित्तानि यस्य दुःखस्य तद्भवति तन्निमित्तमिति । | M is more confident and compact | आधिभौतिकं तु भूतान्यधिकृत्य यत्प्रवर्तते मानुष...स्थावरनिमित्तम् ।। |

| | V | *Remarks* | M |
|---|---|---|---|
| (6) Ka. 1. | आधिदैविकं वक्ष्यामः—अतिवृष्टयना-वृष्टिग्रहपीडातपात्ययप्रभृति यदष्टदेव-योनिभ्यः सकाशाद् उत्पद्यते दुःखं तद् आधिदैविकम्, इत्येषा जिज्ञासा समुत्पन्नाऽऽसुरिसगोत्रब्राह्मणस्य । तस्माद् दुःखत्रयाभि-घाताज्जिज्ञासा समुत्पन्नेति । | | आधिदैविकं तु दिवमधिकृत्य यत्प्रवर्तते शीतोष्णवातवर्षादिकम् । एवमेतैस्त्रिभिर्दुःखैरभिहतस्यासुरिसगोत्रस्य ब्राह्मणस्य जिज्ञासा समुत्पन्ना । |
| (7) Ka. 1. | अथ नास्त्युपायस्ततस्तूष्णीं भूत्वा बली-वर्दवद् दुःखान्यनुभविष्यामि । यथा कश्चि-द्देवदत्तो वृश्चिकेन दष्टस्तत्र तस्य जिज्ञासा समुत्पन्ना को नु खलु विषवैषम्यमपास्येद् । अयमपास्येदिदमिति । एवं दुःखाभिभूत-स्यासुरेस्तदपघातके हेतौ जिज्ञासा समु-त्पन्ना । ततः स जिज्ञासुः भगवन्तं कपिला-चार्यं शरणमुपगतोऽयमुपायं कथयिष्यतीति । | | नो चेत् प्रथमप्रावृडासारं षण्ढ इवामूनि निमीलितनेत्रा वयं सोढारः । वृश्चिकादिदष्ट एव विषप्रतोकाराय जाङ्गुलिकं गवेषयति नो वा विषभवपीडा-सहः । एवमसह्यदुःखाभिभूतस्यासुरेस्तदभिघातके हेतौ जिज्ञासा समुत्पन्ना । स च समुत्पन्नदुःखाभावं जिज्ञासुस्तत्प्रतीकारकुशलं भगवन्तं कपिलाचार्यं शरणमभ्युपगतः, अयं मदभिलषितदुःखप्रतीकारोपायं वक्ष्यतीति । |
| (8) Ka. 1. | अत्राह...न हि मातुरुत्पन्नः पुत्रो मातुरेव वधं करोति । अत्रोच्यते—इहलोके यो...स तस्यैव वधं करातीति । तद्यथा कीटको मातुरुत्पन्नो मातुरेव... | | ननु दुःखेभ्य....न हि जनयित्रीसकाशादुत्पन्नस्तनयस्तस्या एव व्यापादनं कुरुते । सत्यम् । इह लोके यद्यस्मादुत्पद्यते तत्तस्यापि विपत्तिकारणं दृश्यते । यथा कर्कटकोऽश्वतरो वा जनयित्र्याः समुत्पन्नस्तामेव व्यापादयति । |

M has tried to refine the expression in $V_1$ and make it compact at every stage; though it does not dwell on the achievements of Āyurveda.

| | V | *Remarks* | M |
|---|---|---|---|
| (9) Ka. 1. | अतः साऽपार्था जिज्ञासेति । | | अतस्तदभिघातकारणात् किं कपिलोपसर्पणेनेति भावः । |
| 10)Ka. 1. | किञ्चिद्वयं ब्रूमोऽष्टांग आयुर्वेदे द्वौ दोषौ संभाव्येते...इदं निदर्शनं—यथा कश्चिद् राजा...अस्य शिष्यस्यैकान्तिकफलश्चात्यन्तिकफलश्च दुःखप्रतीकारे हेतुरिष्टः । | M is more polished and precise and compact. | न इत्ययं पूर्वपक्षवाक्यनिषेधे । नैवं वाच्यमित्यर्थः ।....यतश्चिकित्सकानां सु-प्रयुक्तागदानां...अस्य तु शिष्यस्यैकान्तिक आत्यन्तिकश्च दुःखव्यपगमे हेतुरिष्टः । तस्माद्युक्तं तदर्थं गुरूपसर्पणमिति । |

**V** | *Remorky*

(11) Kā. 1. अष्टांगे आयुर्वेदे द्वौ दोष । तदन्योऽसौ दुःखापघातसमर्थो हेतुर्व्वेदविहित आनुश्रविको यस्यै...'पा पाने' धातुरस्य...'मृङ् प्राणत्यागे' 'भू सत्तायाम्' ...'गम्लृ सृप्लृ गतौ...' 'विद ज्ञाने' सोमं पास्यामि ... वेदोक्तं करिष्यामि । वेदे चैकान्तिकफलं श्रूयते । पशुवधेनेष्ट्वा सर्वान् कामानभिजयति । तस्माद् वेदविहितेषु दुःखप्रतीकारेषु साऽपार्थिका जिज्ञासेति वेदवादिनाप्युक्ते सांख्याचार्यो ऽब्रवीत् ।

Remarks: M explains the word अनुश्रव but does not explain अभूम, अगन्म, etc. . M explains अमृतमर्त्यस्य as अमृतपायिनां मर्त्यानाम्, and does not refer to पशुवध here. M explains the ṛc fully; not so $V_1$.

M has here tried to put systematically the expressions in $V_1$ pertaining to different Vedic rites. We do not quote the passages here.

(12) Kā. 2. को दृष्टान्तः—इह लोके प्रत्यक्षं ताव-न्मध्यमपिण्डं पत्नी पुत्रकामा प्राश्नीयात्, सा च श्रुतिवचनादनेकानि पिण्डशतान्यश्नाति ...गर्भस्थ एव म्रियते । अथ सद्यो जातो म्रियते ।

(13) Kā. 3. Introductory अत्राह—एषां व्यक्ताव्यक्तज्ञानां कतिविधः प्रविभाग इत्यत्रोच्यते— चतुर्व्विधः कथमिति चेतदुच्यते ।



**M**

(11) यद्येवं तदा दृष्टव्यतिरेकेणाप्यानुश्रविकः श्रुतिप्रणीतः... तत्रैकान्तिकमात्यन्तिकं वानुश्रवे वेदे श्रूयते । गुरुणोक्तं पश्चाद्वेदं श्रृण्वन्ति शिष्या इत्यनुश्रवो वेदः । तत्र भवः आनुश्रविकः । ...अस्मान् अस्माकं विभक्तिविपरिणामः । कृणवत् कर्ता । अरातिः शत्रुर्मृत्युः । किं वा धृति(?)र्जरा अस्माकं करिष्यति । अमृतमर्त्यस्य अमृतपायिनां मर्त्यानामिति । 'बहुलं छन्दसि' इति वचनविपरिणामः । एवमन्योऽपि यः सोमं पास्यति...वेदोक्तं करिष्यामः । दुःखप्रतीकारश्च स्वर्गो भावीति वेदवादिनां वचनमुपश्रुत्य सांख्याचार्यस्तन्निवारणाय स्वमतप्रतिष्ठायै चि द्वितीयामार्यामाह ।

(12) तथा हि—"मध्यम...'आधत्त पितरो गर्भम्' इति मन्त्रेण" तदेवं वेदवचसा बहून् पिण्डान् परःशतानश्नाति...गर्भस्थो जातमात्रो बालो युवापि कुमारो म्रियते ।

(13) नन्वमीषां कतिधा प्रविभाग इत्यत्रोच्यते चतुर्धा । कथमिति चेत्तदुच्यते ।

| | $V_1$ | *Remarks* |
|---|---|---|
| (14) Kā. 3. | अहङ्कारोऽपि बुद्ध्या...यस्मादेकादशेन्द्रियाणि पञ्च तन्मात्राण्युत्पादयति तस्मात्प्रकृतिः । तुः शब्दोऽवधारणे, एकादश....एष षोडशको गणो विकृतिरेव न प्रकृतिः, कार्यमेव न कारणमित्यर्थः । कस्माद् उत्पन्नत्वा· दनुत्पादकत्वाच्च तस्माद् विकृतिरित्युच्यते। | |
| (15) Kā. 4. Introductory | अत्राह–एतेषां व्यक्तादीनां त्रयाणां पदार्थानां केन प्रकारेण समधिगमः । एवमेवंप्रमाणेभ्यः एषां समधिगमः करणीय इति । अत्राह–कानि पुनस्तानि प्रमाणानि । । तदुच्यते । | |
| (16) Kā. 9. Introductory | अस्ति च नास्तीत्यार्हताः । नैव नास्ति न वास्तीत्यभ्युपगमपक्ष एष बौद्धानाम् । | |
| (17) Kā.11 | अनेकं व्यक्तमेकं प्रधानं, पुरुषोऽप्यनेकः । | |
| (18) Kā.12. | एवं ह्याह–रजसो मिथुनं... । उभे[ते] सत्त्वरजसी तमसो मिथुनं विदुः ॥ | |
| (19) Kā.14. Introductory | हिमवान् (हिमवतः) शैलाग्रपरिमाणं नोपलभ्यते किं नास्ति । | |
| (20) Kā.17. Introductory | एवं शरीरेन्द्रियबुद्ध्यादेर्व्यतिरिक्तोऽस्ति परमात्मा । | |
| (21) Kā.18. करणनियमात् | इह लोके केचिद्बधिराः [केचिदबधिराः] केचिदन्धाः केचिदनन्धाः केचिन्मूकाः केचिदमूकाः केचित् कुष्ठिनः केचिदकुष्ठिनः । अतः पश्यामो ये उपहतेन्द्रियास्तेऽप्यन्ये, ये चानुपहतेन्द्रियास्तेऽप्यन्ये । | M has clearly recast $V_1$ here. |



## M

अहङ्कारो महत उत्पन्न इति विकृतिः तन्मात्राणि जनयतीति प्रकृतिः ।

षोडशकस्तु पुनर्विकार एव कार्यत्वात् । न तु तस्य प्रकृतित्वमकारणत्वात् । तद्व्यक्तिमाह–वैकृतादहङ्कारादुत्पन्नान्येकादशे....षोडशकोऽयं गणो विकारोऽन्यस्मादुत्पन्नो न हि ततोऽन्यदुत्पद्यते इत्यर्थः । उत्पन्नत्वादनुत्पादकत्वाच्च ।

एषां व्यक्ताव्यक्तज्ञानां प्रमेयाणां साधनाय प्रमाणान्याह । प्रमाणप्रमेयप्रमातृप्रमितिक्रमेण हि सकलस्य सिद्धिर्दृष्टा ।

अस्ति नास्तीति वराका जीवकाः । नैवास्ति न च नास्ति, एष बौद्धानां पक्षः ।

तथा हि अहेतुमान्नित्यो...पक्षोऽनाश्रितो

एवं ह्याहुः–रजसो मिथुनं... । उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते ॥

हिमवत उपलगणपरिमाणं नोपलभ्यते किं तन्नास्ति ।

एवं शरीरेन्द्रियबुद्ध्यादिभि : क्षीरनीरवदेकीभूतोऽपि तद्व्यतिरिक्तोऽस्ति परमात्मा ।

इह लोके केचिद् बधिरान्धमूकादयः । इतरे च पटुतरकरणाः । अतः पश्यामो ये उपहतेन्द्रियास्ते अन्ये ये चानुपहतेन्द्रियास्ते चान्ये ।

| | $V_1$ | *Remarks* | M |
|---|---|---|---|
| (22)Ka.19. | तद्यथा कश्चिद्यमनियमरतः सांख्ययोगाचार्यो भिक्षुर्नगरे प्रतिवसति । यजन–याजनाध्ययनाप्रतिग्रहकृषिवाणिज्यपौरुषाद्यासु क्रियासु वर्त्तमानानां नागराणां साक्षिमात्रो भवति । | | तद्यथा कश्चिद्यमनियमरतः सांख्ययोगाचार्यरतो भिक्षुर्नगरे प्रतिवसति । स च जनादिषु प्रतिवर्णाश्रमविहितासु क्रियासु प्रवर्त्तमानानां तन्नगरवासिनां साक्षिमात्रो भवति । |
| (23)Ka.22. | शब्दतन्मात्रादाकाशं तदेकलक्षणं, स्पर्शतन्मात्राद्वायुः स द्विगुणलक्षणः ... गन्धतन्मात्रात पृथ्वी सा पञ्चगुणा । एवं पञ्चभ्यः पञ्च महाभूतान्युत्पद्यन्ते । | | तत्र शब्दतन्मात्रादाकाशम् , स्पर्शतन्मात्राद्वायुः...गन्धतन्मात्रात्पृथिवी इत्यादि क्रमेण पूर्वपूर्वानुप्रवेशेनैकद्वित्रिचतुष्पञ्चगुणान्याकाशादिपृथ्वीपर्यन्तानि महाभूतानीति सृष्टिक्रमः |
| (24)Ka.23. | चरित्रावस्थितस्य भिक्षोरेते पञ्च नियमाः। एभिर्हृशयमर्यमैर्यः साध्यते स धर्मः । | | इत्यमीषां यमनियमादीनां सेवनात् 'अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः' (पा. यो. सू. २.३५) इत्याद्याः सिद्धयः । वैपरीत्ये तु 'वितर्कबाधने प्रतिपक्षभावनम्' (पा. यो. सू. २.३३) 'वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम्' (पा. यो. सू. २.३४) एवं व वर्तमानस्य योगिनः 'स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात्' (पा. यो. सू. ३.५१) इति भिक्षोरेते यमनियमाः । एभिर्यमनियमैर्वा साध्यते स धर्मो व्याख्यातः । |
| (25)Ka.25 | भूतादेस्तन्मात्रः यदा भूतादेस्तमो बहुलं च भवत्यहङ्कारे....end of $V_1$ on ka. 25. | M is clearly an improvement on $V_1$. M has recast $V_1$ in order to make the expression brief and compact. Either gives its own example. | भूतादेस्तमोबाहुल्याद् गौणीभूतसत्त्वरजसो भूतादिनाम्नः पूर्वाचार्यैर्निरूपितादहङ्कारात् तन्मात्रः शब्दादिपञ्चको गणो जायते......end of M on ka. 25. |
| (26)Ka.33. | श्रोत्रं हि वर्तमानमेव शब्दं गृह्णाति, नातीतमनागतं वा, त्वगपि.... उपस्थोऽपि वर्तमानमेवानन्दं गृह्णाति नातीतमनागतं वा । | | श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाणि वर्तमानान्येव शब्दादीनि गृह्णन्ति, नातीतानि न च भावीनि । एवं वाक्पाणिपादपायूपस्थानि वर्तमानेषु वचनादेयभूमिमलोत्सर्गानन्देषु प्रवर्तन्ते नातीतभविष्यतोः । |
| (27)Ka.33. | अनागतमपि गृह्णाति यथा भविष्यन्ति गुणस्यन्ते गुडं कथायवासशक्त–क्लीबराजा भविष्यति (०गुणस्यान्ते गुडकथाः यथा वा अशक्तक्लीबराजा भविष्यति or ०भविष्यति गुणस्यान्ते गुडः, कषायवासःसक्तक्लीबराजा भविष्यति ?) | | कल्को भविष्यति भाविवस्तुग्राहिणी |

| | $V_1$ | *Remarks* |
|---|---|---|
| (28)Kā.36 | श्रोत्रं शब्दं गृह्णाति न स्पर्शादीन् । जिह्वापि....एवं कर्मेन्द्रियाण्यपि वाग् वचने व्यवस्थिता पाणिः आदाने... | |
| (29)Kā.37. | सत्त्वरजस्तमांसि त्रयो गुणाः प्राधानिकाः । अन्या बुद्धिरन्योऽहङ्कारः... एवं शारीरोऽप्यन्य पुरुषोऽप्यन्य इति बुद्ध्वा तत्त्वानि मोक्षं गच्छति । उक्तं च 'पंचविंशतितत्त्वज्ञो मोक्षं गच्छति' 'हस पिब......' | |
| (30)Kā.48. | एवमेते तमसो भेदाः पञ्च भिद्यमाना द्विषष्टिभेदा वृत्ताः । | M has improved upon the expression in $V_1$. |
| (31)Kā.50. | यथा कश्चित् प्रकृतिमात्रं वेत्ति न जानीते नित्या वा अनित्या वा....सर्वगता वा असर्वगता वेति । एतान् धर्मान्न वेत्ति । केवलमस्तित्वमात्रेण तुष्टः प्रव्रजितस्तदस्य नास्ति मोक्षः । | |
| (32)Kā.51. | सप्तमीं वक्ष्यामः । तदुच्यते सुहृत्प्राप्तिस्तद्यथा कश्चिद् दुर्मेधा गुरोः सकाशान्नावधारयति सुहृत्सकाशात् ज्ञानमधिगम्य मोक्षं गच्छति । एषा सप्तमी सिद्धिः । | M tries to be more effective and imaginative. |
| (33)Kā.56 (Introductory) | अत्राह–उक्तं भगवता...त्वया चाचेतनं प्रधानं पूर्वमुक्तं पुरुषश्च चेतन इति । तत् कथमचेतनं प्रधानं जानीते मया पुरुषः शब्दादिभिर्विषयैस्त्रिषु लोकेषु योजयितव्यो गुणपुरुषान्तरोपलब्ध्या मोचयितव्य इति पुरुषार्थं च कृत्वा निवर्त्तितव्यमिति । अत्रोच्यते इहलोके अचेतनानामपि प्रवृत्तिर्दृष्टा । यथा कस्येत्याह... (Kā. 56). | M seems to be abrupt here. The scribe perhaps omitted some portion. |



## M

श्रोत्रं हि शब्दं गृह्णाति न स्पर्शादीन् । एवमितरत्र । वाग्वक्त्येव न गृह्णाति गच्छति विहरत्यानन्दति । एवं पाण्यादिषु । मनः संकल्पयति नाहङ्कुरुते........

सत्त्वरजस्तमांसि त्रयो गुणाः प्राधानिका अमूर्ताः साम्यावस्थायां प्रधानाख्याः । तेषामेकतयोद्रेकात्त्रिगुणा बुद्धिरन्या, अन्योऽहङ्कारः,.......इति बुद्ध्वा तत्त्वानि मोक्षं गच्छन्ति । न हि भगवतः कपिलस्य मते किमपि कर्तव्यमनुष्ठेनया, किं तु साङ्ख्यानां पञ्चविंशतितत्त्वज्ञानमेव साधर्म्येण वैधर्म्येण च निःश्रेयसहेतुः । उक्तं च– हस पिब...'

एवममी विपर्ययस्य तमःप्रभृतयः पञ्च भेदा विभिद्यमाना द्विषष्टिभेदाः सञ्जाताः ।

यथा कश्चित् प्रकृतिमात्रं वेत्ति, न तु जानीते सगुणागुणत्वनित्यानित्यत्वचेतनाचेतनत्वसर्वगतत्वधर्मानस्याः केवलं प्रकृत्यस्तित्वमात्रज्ञानेनाहं जानामीति तुष्टः प्रव्रजितस्तस्य नास्ति मोक्षः ।

कश्चिद् दुर्मेधा गुरोः सकाशान्नावधारयति । तत् केनचित् प्रत्युपकारानपेक्षेण सुहृदा तस्मात संसारकूपादुज्जिहीर्षुणा तदनुकूलतया कृपावता सुगमवचोभिर्वैराग्यपूर्वकं गुणपुरुषान्तरोपलब्धिरूपं सांख्यज्ञानमुपदिशता समुद्धृतमालोच्याह भगवान् शास्त्रकारः सुहृत्प्राप्तिरिति......एषा सप्तमी सिद्धिः ।

अत्राह–उक्तं भगवता... ...अथ त्वया प्रधानमचेतनमुक्तं तत्कथं प्रवर्तते । [?] अचेतनानामपि प्रवृत्तिर्दृष्टा निवृत्तिश्च ।

| | $V_1$ | *Remarks* | M |
|---|---|---|---|
| (34)Kā.68. | उत्पन्नज्ञानोऽपि विद्वान् संस्कारवशाच्चक्रभ्रमवदुद्धृतशरीरः । | | उत्पन्नेऽपि ज्ञाने विद्वांस्तिष्ठति संस्कारवशाच्चक्रभ्रमवद् धृतशरीरः । |
| (35)Kā.68. | तस्मिंश्च शरीरे भिन्ने पूर्वोक्तेन ज्ञानेन प्रधानं निवर्तते । इह शरीरे यत् पार्थिवं तत् पृथ्वीं प्रविशति, यदाप्यं... एवमिदं शरीरं पञ्चधा भिद्यते । | M brings in more clarification; and makes the expression more compact. | तस्मिश्च शरीरे भिन्ने पूर्वोक्तेन ज्ञानेन शरीरं प्रधानाख्यं कारणमविशेषमयं तान्मात्रिकं सर्गादावुत्पन्नं तन्निवर्तते । इह शरीरे यत् पार्थिवं तत् पृथिवीं प्रविशति एवमन्यदन्येषु प्रविशति । एवं स्थूलं शरीरं पञ्चधा भिद्यते । |
| (36)Kā.68. | उभयमाध्यात्मिकाधिदैविकाधिभौतिको-परमात् । | | इत्थमेकान्तात्यन्ततस्तापत्रयस्याभावादुपरमादनुत्पत्तेः । |
| (37)Kā.69. | प्रधानादुत्पद्यते बुद्धिः बुद्धेरहङ्कारः ... | | प्रधानान्महदहङ्कारतन्मात्रेन्द्रियमहाभूतानीत्युत्पत्तिः । |
| (38)Kā.73 | नेन प्रतिषेधः । अर्थतः इति षष्टिपदार्थे न परिहीणमित्यर्थः । | | षष्टिपदार्थविचारणायामहीनमित्यर्थः । |

## Index of Kārikās


| Karika | No. | Page |
|---|---|---|
| १. अतिदूरात्सामीप्यात् | ७ | १४ |
| २. अत्र जरामरणकृतम् | ५५ | ६८ |
| ३. अध्यवसायो बुद्धिः | २३ | ३८ |
| ४. अन्तःकरणं त्रिविधं | ३३ | ४८ |
| ५. अभिमानोऽहङ्कारः | २४ | ४० |
| ६. अविवेक्यादिः सिद्धः | १४ | २६ |
| ७. अष्टविकल्पो दैवः | ५३ | ६७ |
| ८. असदकरणादुपादान० | ९ | १७ |
| ९. आध्यात्मिकाश्चतस्रः | ५० | ६४ |
| १०. इत्येष प्रकृतिकृतः | ५६ | ६९ |
| ११. उभयात्मकमत्र मनः | २७ | ४२ |
| १२. ऊर्ध्वं सत्त्वविशालः | ५४ | ६८ |
| १३. ऊहः शब्दोऽध्ययनम् | ५१ | ६५ |
| १४. एकादशेन्द्रियवधाः | ४९ | ६३ |
| १५. एतत्पवित्रमग्र्यम् | ७० | ७९ |
| १६. एते प्रदीपकल्पाः | ३६ | ५१ |
| १७. एवं तत्त्वाभ्यासात् | ६४ | ७५ |
| १८. एष प्रत्ययसर्गः | ४६ | ६१ |
| १९. औत्सुक्यनिवृत्त्यर्थम् | ५८ | ७० |
| २०. करणं त्रयोदशविधम् | ३२ | ४८ |
| २१. कारणमस्त्यव्यक्तम् | १६ | २९ |
| २२. चित्रं यथाऽऽश्रयमृते | ४१ | ५६ |
| २३. जन्ममरणकरणानाम् | १८ | ३३ |
| २४. तन्मात्राण्यविशेषाः | ३८ | ५३ |
| २५. तस्माच्च विपर्यासात् | १९ | ३४ |
| २६. तस्मात्तत्संयोगात् | २० | ३५ |
| २७. तस्मान्न बध्यते नापि | ६२ | ७४ |
| २८. तस्मात् समासदृष्टम् | ७३ | ८१ |
| २९. तेन निवृत्तप्रसवाम् | ६५ | ७५ |
| ३०. त्रिगुणमविवेकि विषयः | ११ | २१ |
| ३१. दुःखत्रयाभिघातात् | १ | १ |
| ३२. दृष्टमनुमानम् | ४ | ११ |
| ३३. दृष्टवदानुश्रविकः | २ | ७ |
| ३४. दृष्टा मयेत्युपेक्षक | ६६ | ७५ |
| ३५. धर्मेण गमनमूर्ध्वम् | ४४ | ५९ |
| ३६. न विना भावैर्लिङ्गम् | ५२ | ६७ |
| ३७. नानाविधैरुपायैः | ६० | ७१ |
| ३८. पञ्च विपर्ययभेदाः | ४७ | ६१ |
| ३९. पुरुषस्य दर्शनार्थम् | २१ | ३६ |
| ४०. पुरुषार्थं ज्ञानमिदम् | ६९ | ७८ |
| ४१. पुरुषार्थहेतुकमिदम् | ४२ | ५७ |
| ४२. पूर्वोत्पन्नमसक्तम् | ४० | ५६ |
| ४३. प्रकृतेर्महांस्ततोऽहङ्कारः | २२ | ३७ |
| ४४. प्रकृतेः सुकुमारतरम् | ६१ | ७२ |
| ४५. प्रतिविषयाध्यवसायो | ५ | १३ |
| ४६. प्राप्ते शरीरभेदे | ६८ | ७७ |
| ४७. प्रीत्यप्रीतिविषादा० | १२ | २३ |
| ४८. बुद्धीन्द्रियाणि श्रोत्र० | २६ | ४२ |
| ४९. बुद्धीन्द्रियाणि तेषाम् | ३४ | ५० |
| ५०. भेदस्तमसोऽष्टविधः | ४८ | ६२ |
| ५१. भेदानां परिमाणात् | १५ | २८ |
| ५२. मूलप्रकृतिरविकृतिः | ३ | १० |
| ५३. युगपच्चतुष्टयस्य तु | ३० | ४६ |
| ५४. रङ्गस्य दर्शयित्वा | ५९ | ७१ |
| ५५. रूपादिषु पञ्चानाम् | २८ | ४४ |
| ५६. रूपैः सप्तभिरेवम् | ६३ | ७४ |
| ५७. वत्सविवृद्धिनिमित्तम् | ५७ | ७० |
| ५८. वैराग्यात्प्रकृतिलयः | ४५ | ६० |

| Karika | No. | Page |
|---|---|---|
| ५९. शिष्यपरंपरयाऽऽगतम् | ७१ | ८० |
| ६०. संघातपरार्थत्वात् | १७ | ३१ |
| ६१. सत्त्वं लघु प्रकाशकम् | १३ | २५ |
| ६२. सप्तत्यां किल येऽर्थाः | ७२ | ८० |
| ६३. सम्यग्ज्ञानाधिगमात् | ६७ | ७६ |
| ६४. सर्वं प्रत्युपभोगम् | ३७ | ५२ |
| ६५. सात्त्विक एकादशकः | २५ | ४१ |
| ६६. सांसिद्धिकाश्च भावाः | ४३ | ५८ |
| ६७. सान्तःकरणा बुद्धिः | ३५ | ५१ |
| ६८. सामान्यतस्तु दृष्टाद् | ६ | १३ |
| ६९. सूक्ष्मा मातापितृजाः | ३९ | ५४ |
| ७०. सौक्ष्म्यात्तदनुपलब्धिः | ८ | १५ |
| ७१. स्वां स्वां प्रतिपद्यन्ते | ३१ | ४७ |
| ७२. स्वालक्षण्यं वृत्तिः | २९ | ४४ |
| ७३. हेतुमदनित्यमव्यापि | १० | १९ |





## Errata

| Page | Line | Incorrect | Correct |
|---|---|---|---|
| ८ | २१ | कारणानामपरिमाणवत् | कारणानाम(०नां) परिमाणवत् |
| ११ | १७ | कस्मिंश्चिन्कर्मणि | कस्मिंश्चित्कर्मणि |
| १४ | २७ | सत्त्वात्त(स्तस्याग्रतो | सत्त्वात्त(स्त)स्याग्रतो |
| १५ | १३ | मृतपिण्डे | मृत्पिण्डे |
| १९ | ९ | रस[त्]न्मात्रेण | रस[त]न्मात्रेण |
| १९ | २८ | अनेकं न एक)मनेकं | (अनेकं न एक)मनेकं |
| २४ | ११ | ०चछन्त(न्ता) | ०च्छान्त(न्ता) |
| ३१ | ११ | कवल्यार्थं० | कैवल्यार्थं० |
| ३६ | १९ | ऽार्थंश्चौरैभिहि(ह)तः | सार्थश्चौरैरभिहि(ह)तः |
| ३७ | १५ | (वृबु)द्धिः | वृ(बु)द्धिः |
| ४० | ९ | । यत्र | यत्र । |
| ४२ | १९ | ०भुन्सृजति | ०मुत्सृजति |
| ४३ | १९ | भिन्नाः | भिन्नान् |
| ४४ | २७ | सा[५९]बमान्य० | सा[५९ब]मान्य० |
| ४५ | २४ | कुतश्चिद्- | कुतश्चिद- |
| ६३ | ४ | बुद्धे विपर्ययात्तु | बुद्धेर्विपर्ययात्तु |
| ६४ | ४ | ०[८२बश्च] | ०[८२ब]श्च |
| ६५ | १० | नास्तोति(अस्तोति ?) | नास्तीति(अस्तीति ?) |
| ७० | १५ | निवत्तितव्यमिति | निवर्त्तितव्यमिति |
| ७१ | २७ | तकयति | तर्कयति |

creative commons

# Attribution-NonCommercial-ShareAlike 3.0 Unported

## You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

## Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

## With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer